॥ श्रीगुरुभ्योनमः ॥ अथान्हिकविधिः ॥ ब्राह्मेमुहूर्तें उद्बुध्य नारायण नामस्मरणंकुर्यात् ना
रायण १०८ हरेरामहरेराम रामरामहरेहरे ॥ हरेकृष्णहरेकृष्ण कृष्णकृष्णहरेहरे इति ॥ शयनादु
त्थाय सम्यग्भूमिंप्रार्थयेत् ॥ समुद्रवसनेदेवि पर्वतस्तनमंडिते ॥ विष्णुपत्निनमस्तुभ्यं पाद
स्पर्शंक्षमस्वमे ॥ विष्टामूत्रकफोत्सर्गमपराधंक्षमस्वमे ॥ ततोविष्णुंप्रार्थयेत् ॥ प्रातःकालादिकं
कर्म नित्यनैमित्तिकात्मकं ॥ केशवाराधनार्थाय करिष्येऽहंतवाज्ञया ॥ नमोस्तुतात्विकादेवा
विष्णुभक्तिपरायणाः ॥ धर्ममार्गे प्रेरयंतु भवंतःसर्वएवहि ॥ ततोदेवंविज्ञापयेत् ॥ प्रातःप्रभृ
तिसायांतंसायादिप्रातरंततः ॥ यत्करोमिजगन्नाथ तदस्तुतवपूजनमिति ॥ अथशौचविधिः ॥
ग्रामाद्बहिर्गत्वा आन्हिकतरंगोक्तप्रकारेण मलमूत्रविसर्जनपूर्वकमृत्तिकाशौचं कृत्वा गृहमा
गत्य मृदादिनाकलशंप्रक्षाल्य आजानुपादौप्रक्षाल्य कूर्परांतंहस्तौप्रक्षाल्य आकर्णमुखंप्रक्षाल्य
दंतकाष्ठेनदंतान् संशोध्याष्टगंडूषान् वामतः कृत्वा ब्राह्मेणतीर्थेन शुत्धवारिणा आचमनंकृत्वा
शुत्धोदकंगृहीत्वातुलसीसमीपंगच्छेत् ॥ ॥ अथ तुलसीवंदनं ॥ ॥ पापानि यानि रवि
सूनुपटस्थितानि गोब्रह्मबाल पितृमातृवधादिकानि ॥ नश्यंति तानि तुलसीवनदर्शनेनगो

SGDF
Sri Gargeshwari Digital Foundation

आ० कोटिदानसदृशं फलमाशुचस्यात् ॥ इतिपठन् तुलसीमुपगम्य ॥ यादृष्टानिखिलाघसंघशमनी प०
१ स्पृष्टावपुःपावनी रोगाणामभिवंदितानिरसनीसिक्तांतकत्रासिनी ॥ प्रत्यासत्तिविधायिनीभ
गवतःकृष्णस्यसंरोपिता न्यस्तातच्चरणेविमुक्तिफलदातस्यैतुलस्यैनमः ॥ इतितुलस्याः जलं
दत्वा तन्मूलगतजलेनानात्मानं प्रोक्ष्य तन्मूलमृदंगृहीत्वा ललाटेयस्यदृश्येततुलसीमूलमृत्ति
का ॥ यमस्तंनेक्षीतुंशक्तः किमुदूताभयंकराः ॥ इतिमंत्रेण ललाटेउर्ध्वपुंड्रंधृत्वा ॥ तुलसीकान
नंयत्रयत्रपद्मवनानिच ॥ वसंतिवैष्णवायत्रतत्रसन्निहितोहरिः ॥ पुष्कराद्यानितीर्थानिगंगा
द्याःसरितस्तथा ॥ वासुदेवादयोदेवा वसंतितुलसीवने ॥ इतिपरिक्रम्य ॥ तुलसिश्रीसखिशुभे
पापहारिणिपुण्यदे ॥ नमस्तेनारदनुते नारायणमनःप्रिये ॥ इतिनमस्कारः ॥ ॥ ॥
अथ गोवंदनं ॥ ॥ गांदृष्ट्वाच नमस्कृत्य कृत्वाचैवप्रदक्षिणं ॥ प्रदक्षिणीकृतातेनसप्तद्वीपाव
सुंधरासर्वकामदुघेदेविसर्वतीर्थाभिषेचनि ॥ पावनीसुरभिश्रेष्ठे देवितुभ्यंनमोस्तुते इति ॥ ततोदे १
वगृहंगत्वादेवींदेवंचप्रार्थयेत् ॥ रमादेविनमस्तेस्तुस्वभर्त्रासहशायिनि ॥ मुंचबाहुलतापाशा
त्स्वामिनंभक्तवत्सलं ॥ उत्तिष्ठोत्तिष्ठगोविंद उत्तिष्ठगरुडध्वज ॥ उत्तिष्ठकमलाकांत त्रैलोक्यमं

SGDF
Sri Gurgeshwara Digital Foundation

गलंकुरु ॥ श्रीलक्ष्मीनृसिंहनमस्कारंकृत्वा नीराज्य प्रातःस्तोत्राणिपठेत् ॥ ॥ अथ प्रातःस्म
रणं ॥ ॥ प्रातःस्मरामिवरकुंडलशोभिगंडंशीतांशुमंडलमुखंसितवारिजाक्षं ॥ आताम्रकंम्रमु
दिताधरबिंबजृंभंध्यातृप्रहर्षकरहासरसंरमेशं ॥ प्रातर्भजामिधृतकौस्तुभकंबुकंठं स्फीतात्म वक्षसि
विराजितभूरिहारं ॥ भीतस्वभक्तभयभंजनपाणिपद्मं शातोदरार्पितजगद्धरमब्जनाभं ॥ प्रात
र्नमामिशुभकिंकिणिमेखलांगं पीतांबरंकरिकरोरुमुदारजानुं ॥ ध्याताम्घ्रियुग्मरुचिरंजितकंज
जात वातादिदेववरमौलिमाणिमुकुंदं ॥ वादिराजयतिप्रोक्तंश्लोकत्रयमिदंसदा ॥ प्रातःकालेपठ
न्मर्त्यःसर्वपापैःप्रमुच्यते ॥ ॥ अथ ध्यानस्नानं ॥ ॥ अतिनीलघनश्यामंनंलिनायतलोचं
नं ॥ स्मरामिपुंडरीकाक्षं तेनस्नातोभवाम्यहं ॥ ॥ अथभगवध्यानं ॥ ॥ संचिंतयेद्भगवतश्च
रणारविंदं वज्रांकुशध्वजसरोरुहलांछनाढ्यं ॥ उत्तुंगरक्तविलसन्नखचक्रवाल ज्योत्स्नाभिराहतम
हत्धृदयांधकारं ॥ यत्छौचनिःसृतसरित्प्रवरोदकेन तीर्थेनमूर्ध्न्यधिधृतेनशिवःशिवोभूत् ॥ ध्या
तुर्मनःशमलशैलनिसृष्टवज्रं ध्यायेच्चिरंभगवतश्चरणारविंदं ॥ ऊरूसुपर्णभुजयोरधिशोभमानावो
जोनिधीस्वतसिकाकुसुमावभासौ ॥ व्यालंबिपीतवरवाससिवर्तमानकांचीकलापपरिरंभिनित

SGDF
Sri Gangeshwar Digital Foundation

आ० बमंब॥नाभिन्हदंभुवनकोशगुहोदरस्थं यत्रात्मयोनिधिषणाखिललोकपद्मंव्यूढंहरिन्मणिमुषस्त प० ८
२ नयोरमुष्य ध्यायेद्वयंविततहारमयूखगौरं ॥ वक्षोधिवासमृषभस्यमहाविभूतेः पुंसांमनोनयन
निर्वृतिमादधानं ॥ कंठंचकौस्तुभमणेरधिभूषणार्थं कुर्यान्मनस्यखिललोकनमस्कृतस्य ॥ बाहूंश्च
मंदरगिरेःपरिवर्तनेन निर्णिक्तबाहुवलयानधिलोकपालान् ॥ संचिंतयेद्दशशतारमसह्यतेजः शं
खंचतत्करसरोरुहराजहंसं ॥ कौमोदकींभगवतोदयितांस्मरेतदिग्धामरातिभटशोणितकर्दमेन ॥
मालांमधुव्रतवरूथगिरोपघुष्टां चैत्यस्यतत्त्वममलंमणिमस्यकंठे ॥ भृत्यानुकंपितधियेहगृहीतमूर्तेः
संचिंतयेद्भगवतोवदनारविंदं ॥ यद्विस्फुरन्मकरकुंडलवल्गितेन विद्योतितामलकपोलमुदारहा
सं ॥ यच्छ्रीनिकेतमलिभिःपरिसेव्यमानंभूत्यास्वयाकुटिलकुंतलवृंदजुष्टं ॥ मीनद्वयाश्रियमधिक्षि
पदब्जनेत्रं ध्यायेन्मनोमयमतंद्रितउल्लसद्भ्रु ॥ तस्यावलोकमधिकंकृपयातिघोर तापत्रयोपश
मनायनिसृष्टमक्ष्णोः ॥ स्निग्धस्मितानुगुणितंविपुलप्रसादं ध्यायेच्चिरंविततभावनयागुहायां ॥ २
हासंहरेरवनताखिललोकतीव्रशोकाश्रुसागरविशोषणमत्युदारं ॥ संमोहनायरचितंनिजमायया
स्य भ्रूमंडलंमनुसुतेमकरध्वजस्य ॥ ध्यानायनंप्रहसितंबहुलाधरोष्ठभासारुणायिततनुद्विजकुंद

SGDF
Sri Gurgeshwari Digital Foundation

5

पंक्ति ॥ ध्यायेत्स्वत्हृत्कुहरकेवसितस्य विष्णोर्भक्त्यार्द्रयार्पितमनानपृथग्दिदृक्षेत् ॥ इति ॥ १२ ॥
॥ अथदधिवामनस्तोत्रं ॥ ॥ हेमाद्रिशिखराकारं शुद्धस्फटिकसन्निभं ॥ पूर्णचंद्रनिभंदेवंद्विभु
जंवामनंस्मरेत् ॥ पद्मासनस्थंदेवेशं चंद्रमंडलमध्यगं ॥ ज्वलत्कालानलप्रख्यं तटित्कोटिसमप्रभ
सूर्यकोटिप्रतीकाशं चंद्रकोटिसुशीतलं ॥ चंद्रमंडलमध्यस्थं विष्णुमव्ययमुच्युतं ॥ श्रीवत्सकौ
स्तुभोरस्कं दिव्यरत्नविभूषितं ॥ पीतांबरमुदारांगं वनमालाविभूषितं ॥ सुंदरंपुंडरीकाक्षं कि
रीटेनविराजितं ॥ षोडशस्त्रीयुतंसम्यगप्सरोगणसेवितं ॥ ऋग्यजुःसामथर्वाद्यैर्गीयमानंजनार्द
नं ॥ चतुर्मुखाद्यैर्देवेशैः स्तोत्राराधनतत्परैः ॥ सनकाद्यैर्मुनिगणैः स्तूयमानमहर्निशं ॥ त्र्यंब
को महादेवो नृत्यतेयस्यसन्निधौ ॥ दधिमिश्रान्नकवलंरुग्मपात्रंचदक्षिणे ॥ करेतुचिंतयेद्वामे
पीयूषममलंसुधीः साधकानांप्रयच्छंतमन्नपानमनुत्तमं ॥ ब्राह्मेमुहूर्तेचोत्थायध्यायेद्देवमधोक्षजं ॥
अतिसुविमलगात्रं रुग्मपात्रस्थमन्नंसुललितदधिखंडंपाणिनादक्षिणेन ॥ कलशममृतपूर्णंवामह
स्तेदधानंतरतिसकलदुःखाद्वामनंभावयेद्यः ॥ क्षीरमन्नंअन्नदातालभेदन्नादएवच ॥ पुरस्तादन्न
माप्नोतिपुनरावर्तिवर्जितं ॥ आयुरारोग्यमैश्वर्यंलभतेचान्नसंपदः ॥ इदंस्तोत्रंपठेद्यस्तुप्रातःका

SGDF
Sri Gurgeshwara Digital Foundation

लेद्द्विजोत्तमः ॥ अक्लेशादन्नसिध्यर्थंज्ञानसिध्यर्थमेवच ॥ अभ्रश्यामः शुभ्रयज्ञोपवीतीसत्कौपी
नःपीतकृष्णाजिनश्रीः ॥ छत्रीदंडीपुंडरीकायताक्षः पायाद्देवोवामनोब्रह्मचारी ॥ अजिनदंडक
मंडलुमेखलारुचिरपावनवामनमूर्तये ॥ मितजगत्त्रितयायजितारयेनिगमवाक्पटवेवटवेनमः ॥
श्रीभूमिसाहितंदिव्यंमुक्तामणिविभूषितं ॥ नमामिवामनंविष्णुंभुक्तिमुक्तिप्रदायकं ॥ वामनोबु
द्धिदाताचद्रव्यस्थोवामनःस्मृतः ॥ वामनस्तारकोभाभ्यांवामनायनमोनमः ॥ ॥ अथगजेंद्र
मोक्षणं ॥ ॥ श्रीशुकः ॥ तत्रापिजज्ञेभगवान्हरिण्यांहरिमेधसः ॥ हरिरित्याहुतोयेनगजेंद्रो
मोचितोग्रहात् ॥ १ ॥ राजोवाच ॥ बादरायणएतत्तेश्रोतुमिच्छामहेवयं ॥ हरिर्यथागजपतिं
ग्राहग्रस्तममूमुचत् ॥ २ ॥ तत्काथासुमहापुण्यंधन्यं स्वस्त्ययनंशुभं ॥ यत्रयत्रोत्तमश्लोकोभग
वान्गीयतेहरिः ॥ ३ ॥ सूतः ॥ परीक्षितैवंसतुबादरायणिःप्रायोपविष्टेनकथासुनोदितः उवाच
विप्राःप्रतिनंद्यपार्थिवंमुदामुनीनांसदसिस्मशृण्वतां ॥ ४ ॥ ॥ इति श्रीमद्भागवतेऽ ३
ष्टमस्कंधे गजेंद्रोपाख्याने प्रथमोध्यायः ॥ १ ॥ ॥ ॥ ॥
॥ श्रीशुकउवाच ॥ आसीद्गिरिवरोराजंस्त्रिकूटइतिविश्रुतः ॥ क्षीरोदेनावृतःश्रीमान्योजनायुत

मुछ्रितः ॥ १ ॥ तावताविस्तृतः पर्यक् त्रिभिःशृंगैःपयोनिधिं ॥ दिशश्चरोचयन्नास्तेरौप्यायस
हिरण्मयैः॥ २ ॥ अन्यैश्चककुभःसर्वारत्नधातुविचित्रितैः ॥ नानाद्रुमलतागुल्मैर्निर्घोषैर्निर्झरांभ
सां ॥ ३ ॥ सदानिर्णिज्यमानांघ्रिःसमंतात्पयऊर्मिभिः ॥ करोतिश्यामलांभूमिंशुभैर्मरकताश्म
भिः ॥ ४ ॥ सिद्धचारणगंधर्वैर्विद्याधरमहोरगैः ॥ किन्नरैरप्सरोभिश्चक्रीडद्भिर्जुष्टकंदरः ॥ ५ ॥
यत्रसंगीतसन्नादैर्नदद्गुहममर्षया ॥ अभिगर्जंतिहरयःश्लाघिनःपरशंकया ॥ ६ ॥ नानारण्य
पशुव्रातसंकुलद्रोण्यलंकृतः ॥ चित्रद्रुमसुरोद्यानकलकंठविहंगमः ॥ ७ ॥ सरित्सरोभिरच्छोदैः
पुलिनैर्मणिवालुकैः ॥ देवस्त्रीमज्जनामोदसौरभाम्वानिलैर्युतः ॥ ८ ॥ तस्यद्रोण्यांभगवतोव
रुणस्यमहात्मनः ॥ उद्यानमृतुमन्नामआक्रीडंसुरयोषितां ॥ ९ ॥ सर्वतोलंकृतंदिव्यैर्नित्यपुष्प
फलद्रुमैः ॥ मंदारैःपारिजातैश्चपाटलाशोकचंपकैः ॥ १० ॥ चूतैःप्रियालैःपनसैराम्रैराम्रातकैर
पि ॥ क्रमुकैर्नारिकेलैश्चखर्जूरैर्बीजपूरकैः ॥ ११ ॥ मधुकैःसालतालैश्चतमालैरसनार्जुनैः ॥ अ
रिष्टोदुंबरप्लक्षैर्वटैःकिंशुकचंदनैः ॥ १२ ॥ पिचुमंदैःकोविदारैःसरलैःसुरदारुभिः ॥ द्राक्षेक्षुरंभा
जंबूभिर्बदर्यक्षाभयामलैः ॥ १३ ॥ बिल्वैःकपित्थैर्जंबीरैर्वृतोभल्लातकादिभिः ॥ तस्मिन्सरःसुवि

SGDF

पुलंलसत्कांचनपंकजं ॥ १४ ॥ कुमुदोत्पलकल्हारशतपत्रश्रियोर्जितं ॥ मत्तषट्पदनिर्घुष्टंशकुं
तैःकलनिःस्वनैः ॥ १५॥ हंसकारंडवाकीर्णंचक्राव्हैःसारसैरपि ॥ जलकुक्कुटकोयष्टिदात्यूहकुल
कूजितं ॥ १६ ॥ मत्स्यकच्छपसंचारचलत्पद्मरजःपयः ॥ कदंबवेतसनलनीपवंजुलकैर्वृतं ॥१७॥
कुंदैःकुरबकाशोकैःशिरीषैःकुटजेंगुदैः ॥ कुब्जकैःस्वर्णयूथीभिर्नागपुन्नागजातिभिः ॥ १८ ॥ म
ल्लिकाशतपत्रैश्चमाधवीजालकादिभिः ॥ शोभितंतीरजैश्चान्यैर्नित्यर्तुभिरलंद्रुमैः ॥ १९ ॥ तत्रै
कदाताद्गिरिकाननाश्रयःकरेणुभिर्वारणयूथपश्चरन् ॥सकंटकंकीचकवेणुवेत्रवद्विशालगुल्मंप्ररुजन्
वनस्पतीन् ॥ २० ॥ यद्गंधमात्राद्धरयोगजेंद्राव्याघ्रादयोव्यालमृगाःसखड्गाः ॥ महोरगाश्चापि
भयाद्द्रवंतिसगौरकृष्णाः शरभाश्चमर्यः ॥ २१ ॥ वृषावराहामहिषर्क्षशल्यागोपुच्छशालावृकमर्कटा
श्च ॥ अन्येचक्षुद्राहरिणाःशशादयश्चरंत्यभीतायदनुग्रहेण ॥ २२ ॥ सघर्मतप्तःकरिभिः करेणु
भिर्वृतोमदच्युत्कलभैरनुद्रुतः ॥ गिरिंगरिम्णापरितःप्रकंपयन्निषेव्यमाणोलिकुलैर्मदाशनैः ॥२३॥
सरोनिलंपंकजरेणुरूषितंजिघ्रन्नदूरान्मदविव्हलेक्षणः ॥ वृतश्चयूथेनतृषार्दितेनतत्सरोवराभ्याश
मथागमद्द्रुतं ॥ २४ ॥ विगाह्यतस्मिन्नमृतांबुनिर्मलंहेमारविंदोत्पलरेणुवासितं॥ पपौनिकामंनि

SGDF
Sri Gargeshwari Digital Foundation

जपुष्करोद्धृतमात्मानमद्भिःस्नपयन्गतक्लमः ॥ २५ ॥ स्वपुष्करेणोद्धृतशीकरांबुभिर्निपाययन्सं
स्नपयन्यथागृही ॥ घूर्णन्करेणूःकलभांश्चदुर्मदोनाचष्टकृच्छ्रंकृपणोजमायया ॥ २६ ॥ तंतत्रकश्चि
न्नृपदैवचोदितोग्राहोबलीयांश्चरणेरुषाग्रहीत् ॥ यदृच्छयैवंव्यसनंगतोगजोयथाबलंसोतिबलोविच
क्रमे ॥ २७ ॥ तथातुरंयूथपतिंकरेणवोविकृष्यमाणंतरसाबलीयसा ॥ विचुक्रुशुर्दीनधियोपरेग
जाःपार्ष्णिग्रहास्तारयितुंनचाशकन् ॥ २८ ॥ नियुध्यतोरेवमिभेंद्रनक्रयोर्विकर्षतोरंतरतोबहिर्मि
थः ॥ समाःसहस्रंव्यगमन्महीपतेसप्राणयोश्चित्रममंसतामराः ॥ २९ ॥ ततोगजेंद्रस्यसहोबलौ
जसांकालेनदीर्घेणमहानभूद्व्ययः ॥ विकृष्यमाणस्यजलेवसीदतोविपर्ययोभूत्सकलंजलौकसः
॥ ३० ॥ इत्थंगजेंद्रस्सयदापसंकटंप्राणस्येदहीविवशोयदृच्छया ॥ अपारयन्नात्मविमोक्षणेचिरंद
ध्याविमांबुद्धिमथाभ्यपद्यत ॥ ३१ ॥ नमामिमेज्ञातयआतुरंगजाःकुतःकरिण्यःप्रभवंतिमोचितुं ॥
ग्राहेणपाशेनविधातुरावृतोप्यहंचतंयामिपरंपरायणं ॥ ३२ ॥ यःकश्चनेशोबलिनोंतकोरगात्प्रचं
डवेगादभिधावतोभृशं ॥ भीतंप्रपन्नंपरिपातियद्भयान्मृत्युःप्रधावत्यरणंतमीमहि ॥ ३३ ॥ इति
श्रीमद्भागवतेऽष्टमस्कंधे गजेंद्रोपाख्यानेद्वितीयोध्यायः ॥ २ ॥ ॥ श्रीबादरायणिः ॥

SGDF
Sri Gurgeshwari Digital Foundation

एवंव्यवसितोबुध्यासमाधायमनोत्हादि ॥ जजापपरमंजाप्यंप्राग्जन्मन्यनुशिक्षितं ॥ १ ॥ गजें
द्रः ॥ ॐनमोभगवतेतस्मैयतएतच्चिदात्मकं ॥ पुरुषायादिबीजायपरेशायाभिधीमहि ॥ २ ॥ य
स्मिन्निदंयतश्चेदंयेनेदंयइदंस्वयं ॥ योस्मात्परस्माच्चपरस्तंप्रपद्येस्वयंभुवं ॥ ३ ॥ यःस्वात्मनीदं
निजमाययार्पितंक्कचिद्विभातंक्कचतत्तिरोहितं ॥ अविद्धदृक्साक्ष्युभयंतदीक्षतेसआत्ममूलोवतु
मांपरात्परः ॥ ४ ॥ कालेनपंचत्वमितेषुकृत्स्नशोलोकेषुलीनेषुचसर्वहेतुषु ॥ तमस्तदासीद्गहनंग
भीरंयस्तस्यपारेभिविराजतेविभुः ॥ ५ ॥ नयस्यदेवाऋषयःपदंविदुर्जंतुःपुनःकोर्हतिगंतुमीरितुं॥
यथानटस्याकृतिभिर्विचेष्टतोदुरत्ययानुक्रमणःसमावतु ॥ ६ ॥ दिदृक्षवोयस्यपदंसुमंगलंविमुक्त
संगासुनयःसुसाधवः ॥ चरंत्यलोकव्रतमव्रणंवनेसर्वात्मभूतःसुत्हदःसमेगतिः ॥ ७ ॥ नविद्यते
यस्यचजन्मकर्मवाननामरूपेगुणदोषएववा ॥ तथापिलोकत्रयसंभवाययःस्वमाययातान्यनुका
लमृच्छति ॥ ८ ॥ तस्मैनमःपरेशायब्रह्मणेनंतशक्तये ॥ अरूपायोरुरूपायनमआश्चर्यकर्मणे।९।
नमआत्मप्रदीपायसाक्षिणेपरमात्मने ॥ नमोगिरांविदूरायमनसश्चेतसामपि ॥ १९ ॥ सत्वेनप्र
तिलभ्यायनैष्कर्म्येणविपश्चितां ॥ नमःकैवल्यनाथायनिर्वाणसुखसंविदे ॥ ११ ॥ नमःशांता

यघोरायमूढायगुणकर्मणे ॥ निर्विशेषायसाम्यायनमोज्ञानघनायच ॥ १२ ॥ क्षेत्रज्ञायनमस्तुभ्यं
सर्वाध्यक्षायसाक्षिणे ॥ पुरुषायात्ममूलायमूलप्रकृतयेनमः ॥ १३ ॥ सर्वेंद्रियगुणद्रष्ट्रेसर्वप्रत्ययहे
तवे ॥ असत्याच्चविमुक्तायसदाभासायतेनमः ॥ १४ ॥ नमोनमस्तेखिलकारणायनारायणाया
र्तिविनाशनाय ॥ सर्वागमाम्नायमहार्णवायनमोपवर्गायपरायणाणाय ॥ १५ ॥ गुणारणिछ
न्नचिदुष्मपायतत्क्षोभविस्फूर्जितमानसाय ॥ युक्तात्मभिःस्वत्हदयेपरिभावितायज्ञानात्मनेभग
वतेनमईश्वराय ॥ १६ ॥ यंधर्मकामार्थविमुक्तकामाभजंतइष्टांगतिमाप्नुवंति ॥ किंचाशिषोरा
त्यपिदेहमव्ययंकरोतुमेदभ्रदयोविमोक्षणं ॥ १७ ॥ एकांतिनोयस्यनकंचनार्थंवांछंतितेवैभगव
त्प्रधानाः ॥ अत्यद्भुतंयच्चरितंसुमंगलंगायंतआनंदसमुद्रमग्नाः ॥ १८ ॥ तमक्षरंब्रह्मपरंपरेशम
व्यक्तमाध्यात्मिकयोगगम्यं ॥ अतींद्रियंसूक्ष्ममिवातिदूरमनंतमाद्यंपरिपूर्णमीडे ॥ १९ ॥ यस्य
ब्रह्मादयोदेवालोकावेदाश्चराचराः ॥ नामरूपविभेदेनजल्प्याचकलयाकृताः ॥ २० ॥ यथार्चि
षोग्नेःसवितुर्गभस्तयोनिर्यांतिसंयांत्यसकृत्सरोचिषः ॥ तथायतोयंगुणसंप्रवाहोबुद्धिर्मनःखानिश
रीरसर्गः ॥ २१ ॥ सवैनदेवासुरमर्त्यतिर्यङ्नस्त्रीनषंढोनपुमान्नजंतुः ॥ नायंगुणःकर्मनसंनचा

SGDF Foundation

आ० ६

सन्निषेधशेषोजयतादशेषः ॥ २२ ॥ जिजीविषेनाहमिहामुयाकिमंतर्बहिश्चावृतयेभयोन्या ॥
इच्छामिकालेननयस्यविप्लवस्तस्यात्मलोकावरणस्यमोक्षणं ॥ २३ ॥ सोहंविश्वसृजंविश्वमवि
श्वंविश्ववेदसं ॥ विश्वात्मानमजंब्रह्मप्रणतोस्मिपरंपदं ॥ २४ ॥ योगरंधितकर्माणोहृदियोगवि
भाविते ॥ योगिनोयंप्रपश्यंतियोगेशंतंनतोस्म्यहं ॥ २५ ॥ नमोनमस्तुभ्यमसह्यवेगशक्तित्रया
याखिलधीगुणाय ॥ प्रपन्नपालायदुरंतशक्तयेबुद्धींद्रियाणामनवाप्यवर्त्मने ॥ २६ ॥ नायंवेद
स्वमात्मानंयच्छक्त्याहंधियाहतः ॥ तंदुरत्ययमाहात्म्यंभगवंतंनतोस्म्यहं ॥ २७ ॥ श्रीशुकः ॥
एवंगजेंद्रमुपवर्णितनिर्विशेषंब्रह्मादयोविविधलिंगभिदाभिमानाः ॥ नैतेयदोपससृपुर्निखिला
त्मकत्वात्तत्राखिलामरवरोहरिराविरासीत् ॥ २८ ॥ तंतद्वदार्तमुपलभ्यजगन्निवासःस्तोत्रंनि
शम्यदिविजैःसहसंस्तुवद्भिः ॥ छंदोमयेनगरुडेनसमुह्यमानश्चक्रायुधोभ्यगमदाशुयतोगजेंद्रः २९
सोंतःसरस्युरुबलेन गृहीतआर्तोदृष्ट्वागरुत्मतिहरिंखउपात्तचक्रं ॥ उत्क्षिप्य सांबुजकरंगिरमाह
कृच्छ्रान्नारायणाखिलगुरोभगवन्नमस्ते ॥ ३० ॥ तंवीक्ष्यपीडितमजःसहसावतीर्यसग्राहमाशुसरसः
कृपयोज्जहार ॥ ग्राहाद्विपाटितमुखादरिणागजेंद्रंसंपश्यतांहरिरमूमुचदुस्रियाणां ॥ ३१ ॥ इति

प०

SGDF
Sri Gargeshwari Digital Foundation

श्रीमद्भागवतेऽष्टमस्कंधे गजेंद्रोपाख्याने तृतीयोऽध्यायः ॥ ३ ॥ ॥ ॐ श्रीशुकः ॥
तदादेवर्षिगंधर्वाब्रह्मेशानपुरोगमाः ॥ मुमुचुःकुसुमासारंशंसंतःकर्मतत्धरेः ॥ १ ॥ नेदुर्दुंदुभयो
दिव्यागंधर्वाननृतुर्जगुः ॥ ऋषयश्चारणाःसित्धास्तुष्टुवुःपुरुषोत्तमं ॥ २ ॥ योसौग्राहःसवैसद्यः
परमाश्चर्यरूपधृक् ॥ मुक्तोदेवलशापेनहूहूर्गंधर्वसत्तमः ॥ ३ ॥ प्रणम्यशिरसाधीशमुत्तमश्लोक
मव्ययं ॥ अगायतयशोधामकीर्तन्यगुणसत्कथं ॥ ४ ॥ सोनुकंपितईशेनपरिक्रम्यप्रणम्यतं ॥
लोकस्यपश्यतोलोकंस्वमगान्मुक्तकिल्बिषः ॥ ५ ॥ गजेंद्रोभगवत्स्पर्शाद्विमुक्तोज्ञानबंधनात् ॥
प्राप्तोभगवतोरूपंपीतवासाश्चतुर्भुजः ॥ ६ ॥ सवैपूर्वमभूद्राजापांड्योद्रविडसत्तमः ॥ इंद्रद्युम्नइ
तिख्यातोविष्णुव्रतपरायणः ॥ ७ ॥ सएकदाराधनकालआत्मवान्गृहीतमौनव्रतईश्वरंहरिं ॥
जटाधरस्तापसआप्लुतोच्युतंसमर्चयामासकुलाचलाश्रयः ॥ ८ ॥ यदृच्छयातत्रमहायशामुनिः
समागमत्छिष्यगणैःपरिश्रितः ॥ तंवीक्ष्यतूष्णीमकृतार्हणादिकंरहस्युपासीनमृषिश्चुकोपह ॥ ९ ॥
तस्माइमंशापमदादसाधुरयंदुरात्माऽकृतबुत्धिरद्य ॥ मत्धेलनात्प्राविशतांतामिस्त्रंयथागजःस्तब्ध
मतिःसदोषः ॥ १० ॥ श्रीशुकः ॥ एवंशप्त्वागतोगस्त्योभगवान्नृपसानुगः ॥ इंद्रद्युम्नोपिराज

SGDF
Sri Gurgaskara Digital Foundation

14

आ० ७ र्षिर्दिष्टंतद्रुपधारयन् ॥ ११ ॥ आपन्नःकौंजरींयोनिमात्मस्मृतिविनाशिनीं ॥ हर्यर्चनानुभावेन प८
नभक्यानधियाहृतः॥ १२ ॥ एवंविमोक्ष्यगजयूथपमब्जनाभस्तेनापिपार्षदगतिंगमितेनयुक्तः॥
गंधर्वसिद्धविबुधैरुपगीयमानकर्माद्भुतं स्वभवनंगरुडासनोगात् ॥ १३ ॥ एवंमहाराजतवेरि
तोमयाकृष्णानुभावोगजराजमोक्षणं ॥ स्वर्ग्यंयशस्यंकलिकल्मषापहं दुःस्वप्ननाशंकुरुवर्यशृण्व
तां ॥ १४ ॥ अथानुकीर्तयंत्येतच्छ्रेयस्कामाद्विजातयः ॥ शुचयःप्रातरुत्थायदुःस्वप्नाद्युपशांतये
॥ १५ ॥ इदमाहहरिःप्रीतोगजेंद्रंकुरुसत्तम ॥ शृण्वतांसर्वभूतानांसर्वभूतमयोविभुः ॥ १६ ॥
श्रीभगवानुवाच ॥ येमांत्वांचसरश्चेदंगिरिकंदरकाननं ॥ वेत्रकीचकवेणूनांगुल्मानिसुरपादपा
न् ॥ १७ ॥ शृंगाणीमानिधिष्ण्यानिब्रह्मणोमेशिवस्यच ॥ क्षीरोदंमेप्रियंधामश्वेतद्वीपंचभास्व
रं ॥ १८ ॥ श्रीवत्संकौस्तुभंमालांगदांकौमोदकींमम ॥ सुदर्शनंपांचजन्यंसुपर्णंपतगेश्वरं १९
शेषंचमत्कलांसूक्ष्मांश्रियंदेवींमदाश्रयां ॥ ब्रह्माणंनारदमृषिंभवंप्रल्हादमेवच ॥ २० ॥ मत्स्यकू ७
र्मवराहाद्यैरवतारैःकृतानिमे ॥ कर्माण्यनंतपुण्यानिसूर्यंसोमंहुताशनान् ॥ २१ ॥ प्रणवंसत्यम
व्यक्तंगोविप्रान्धर्ममक्षयं ॥ दाक्षायणीर्धर्मपत्नीःसोमकश्यपयोरपि ॥ २२ ॥ गंगांसरस्वतींनंदां

15

कालिंदींसितवारणां ॥ ध्रुवंब्रह्मऋषीन्सप्तपुण्यश्लोकांश्चमानवान् ॥ २३ ॥ उत्थायापररात्रांतेप्रय
तास्सुसमाहिताः ॥ स्मरंतिममरूपाणिमुच्यंतेतेंऽहसोखिलात् ॥ २४ ॥ येमांस्तुवंत्यनेनांगप्र
तिबुध्यनिशात्यये ॥ तेषांप्राणात्ययेचाहंददामिविमलांमतिं ॥ २५ ॥ श्रीशुकः ॥ इत्यादिश्य
हृषीकेशःप्राध्मायजलजोत्तमं ॥ हर्षयन्विबुधानीकमारुरोहखगाधिपं ॥ २६ ॥ इतिश्रीमद्भा
गवतेऽष्टमस्कंधे गजेंद्रमोक्षणंनाम चतुर्थोध्यायः ॥ ४ ॥ ॥ अंतःसरस्युरुबलेनपदेगृहीतो
ग्राहेणयूथपतिरंबुजहस्तआर्तः ॥ आहेदमादिपुरुषाखिललोकनाथतीर्थश्रवःश्रवणमंगलनामधे
य ॥ १ ॥ स्मृत्वाहरिस्तमरणार्थिनमप्रमेयश्चक्रायुधः पतगराजभुजाधिरूढः ॥ चक्रेणनक्रवदनं
विनिपाट्यतस्मात्धस्तेप्रगृह्यभगवान्कृपयोज्जहार ॥ २ ॥ हरेकृष्णहरेकृष्णशंखचक्रगदाधर॥सर्व
दासर्वतोमह्यं कुरुमाधवरक्षणं ॥ अथस्नानविधिः ॥ केशव २४ अस्यांमहानद्यां पूर्ववाहिन्यां प
श्चिमेकूले उत्तरतटाके गंगातीरे श्रीविष्णुवैष्णवसंनिधौ सालग्रामचक्रांकितसंनिधौ श्रीतुलस्य
श्वत्थसंनिधौ अस्मदादिगुरूणां परमगुरूणां श्रीमदानंदतीर्थभगवत्पादाचार्याणामंतर्यामिसी
तापतिश्रीरामचंद्रप्रीत्यर्थं प्रातः कृष्णाभागीरथीस्नानमहंकरिष्ये ॥ समस्तजगदाधारशंखचक्रग

SGDF
Sri Gargeshwari Digital Foundation

दाधर ॥ देवदेहिममानुज्ञांयुष्मत्तीर्थनिषेवणे ॥ योसौसर्वगतोविष्णुश्चित्स्वरूपीनिरंजनः ॥ स
एवद्रवरूपेणगंगांभोनात्रसंशयः ॥ गंगागंगेतियोब्रूयाद्योजनानांशतैरपि ॥ मुच्यतेसर्वपापेभ्यो
विष्णुलोकंसगच्छति ॥ नंदिनीनलिनीसीतामालतीचमलापहा ॥ विष्णुपादाब्जसंभूतागंगा
त्रिपथगामिनी ॥ भागीरथीभोगवतीजान्हवीत्रिदशेश्वरी ॥ द्वादशैतानिनामानियत्रयत्रजला
शये ॥ स्नानकालेपठेन्नित्यंतत्रतत्रवसाम्यहं ॥ वसिष्ठऋषिः सर्वानद्योदेवता अतिजगतीछंदः
प्रार्थनेविनियोगः ॥ याःप्रवतोनिवतउद्वतउदन्वतीरनुदकाश्चयाः ॥ ताअस्मभ्यंपयसापिन्वमा
नाःशिवादेवीरशिपदाभवंतुसर्वानद्योअशिमिदाभवंतु ॥ गंडूषंपादविक्षेपंक्षालनंमलिनस्यच ॥
उत्क्षेपक्षेपणंदेविमत्कृतंक्षमपाहिमां ॥ इत्थमुत्का नाभिमात्रजलेस्थित्वा उपवस्त्रंवामप्रकोष्ठेधृत्वा
प्रवाहाभिमुखःसन् मलापकर्षस्नानंकृत्वाविष्णवादिभ्योर्घ्यंदद्यात् ॥ तत्रमंत्रः ॥ नमःकमलना
भाय नमस्तेजलशायिने ॥ नमस्तेस्तुहृषीकेशग्रहाणार्घ्यंनमोस्तुते ॥ कृष्णेकृष्णांगसंभूतेजंतूनां
पापहारिणि ॥ नमस्तेसलिलश्रेष्ठेग्रहणार्घ्यंनमोस्तुते ॥ पापोहंपापकर्माहं पापात्मापापसंभवः॥
त्राहिमांकृपयाकृष्णेसर्वपापहराभव ॥ शरीरेझर्झरीभूतेव्याधिग्रस्तेकलेवरे ॥ औषधंजान्हवीतो

SGDF
Sri Gargeshwari Digital Foundation

यंवैद्योनारायणोहरिः ॥ शरीरशुध्यर्थं मूलमृत्तिकास्नानमहंकरिष्ये ॥ उद्धृतासिवराहेणकृष्णेन शतबाहुना ॥ मृत्तिकेहनमेपापंयन्मयादुष्कृतंकृतं ॥ संलेपयतियोदेहेतुलसीमूलमृत्तिकां ॥ सर्व तीर्थमयोदेहस्तत्क्षणादेवजायते ॥ तन्मूलमृत्तिकाभ्यंगंकृत्वास्नानंदिनेदिने ॥ दशाश्वमेधावभृ थस्नानजंलभतेफलं ॥ इतिसर्वांगंलिप्त्वा ॥ प्रयागःप्रयागः ॥ ब्रह्मांताग़ुरवःसाक्षादिष्टंदैवंश्रियः पतिः ॥ आचार्याःश्रीमदाचार्याःसंतुमेजन्मजन्मनि ॥ स्नानार्थमाज्ञा ॥ भागीरथिस्नानफल मस्तु । हरयेनमः मध्वराजगुरुभ्योनमः ॥ इत्यवगाहनं ॥ मासत्रये ॥ वैशाखेमषगेभानौप्रातः स्नानंकरोम्यहं ॥ तीर्थेजलमयेपुण्येपुनीहिमधुसूदन ॥ कार्तिकेहंकरिष्यामिप्रातःस्नानंजनार्द न ॥ प्रीत्यर्थंतवदेवेशदामोदरमयासह ॥ माघस्नानंकरिष्यामि मकरस्थेदिवाकरे ॥ आसमा प्तिमाहादेवनिर्विघ्नंकुरुमाधव ॥ इति ॥ वक्ष्यमाणऋतंचसत्यंचेतितृचेनअघमर्षणस्नानंकार्यं ॥

॥ अथ स्नानांगतर्पणं ॥ ॥ ब्रह्मादयोयेदेवाः तान्देवांस्तर्पयापि भूर्देवांस्तर्पयामि भुवर्देवां स्तर्पयामि स्वर्देवांस्तर्पयामि भूर्भुवस्वर्देवांस्तर्पयामि ॥ निवीति ॥ कृष्णद्वैपायनादयोयेऋषयः॥ तान्ऋषींस्तर्पयामि भूर्ऋषींस्तर्पयामि भुवर्ऋषींस्तर्पयामि स्वर्ऋषींस्तर्पयामि भूर्भुवस्वर्ऋषींस्तर्प

SGDF
Sri Gangeshwari Digital Foundation

यामि ॥ प्राचीनावीति ॥ सोमःपितृमान्यमोंगिरस्वानग्निष्वात्ताः कव्यवाहनादयोयेपितरः ता
न्पितॄंस्तर्पयामि भूःपितॄंस्तर्पयामि भुवःपितॄंस्तर्पयामि स्वःपितॄंस्तर्पयामि भूर्भुवःस्वःपितॄंस्त
र्पयामि ॥ येकेचास्मत्कुलेजाताह्यपुत्रागोत्रिणोमृताः ॥ तेगृण्हंतुमयादत्तंवस्त्रनिष्पीडनोदकं ॥
इतिवस्त्रांभोदत्वा ॥ ततःदक्षिणांसेनशिखोदकंदत्वा तीरमागत्य यक्ष्माणंतर्पयेत् ॥ यन्मयादू
षितंतोयंशारीरमलशोधनं ॥ तत्पापसंक्षयार्थाययक्ष्माणंतर्पयाम्यहमिति ॥ इतिजलतर्पणम् ॥
॥ अथउष्णोदकस्नानविधिः ॥ ॥ पात्रेकिंचित्सीतोदकंप्रक्षिप्यतदुपरिउष्णोदकेनपात्रमापूर्य
ॐ शनोदेवीरभिष्टयआपोभवंतुपीतये ॥ शंयोरभिस्त्रवंतुनः ॥ आपःपुनंतुपृथिवींपृथिवीपूता
पुनातुमां ॥पुनंतुब्रह्मणस्पतिर्ब्रह्मपूतापुनातुमां ॥ द्रुपदादिवेन्मुमुचानः ॥ स्विन्नस्नात्वीमलादि
व॥ पूतंपवित्रेणेवाज्यं ॥ आपःशुंधंतुमैनसः ॥ ऋतंचसत्यंचाभीत्धात्तपसोध्यजायत ॥ ततोरा
त्र्यजायतततःसमुद्रोअर्णवः ॥ आपोहिष्टामयोभुवस्तानऊर्जेदधातन ॥ महेरणायचक्षसे ॥ इ १
तिपंचमंत्रैः उदकमभिमंत्र्य गंगादितीर्थानि स्मरन्स्नात्वा आचम्य आपोहिष्ठेतितिसृभिःमा
र्जनंकुर्यात् ॥ इतिउष्णोदकस्नानविधिः ॥ उष्णोदकस्नानेसंकल्पाघमर्षणतर्पणानिनकुर्यात् ॥

॥ अथभागीरथीगद्यं ॥ ॥ तत्रभगवतः साक्षाद्यज्ञलिंगस्यविष्णोर्विक्रमतो वामपादांगुष्ठनख
निर्भिन्नोर्ध्वांडकटाहविवरेणांतःप्रविष्टाया बाह्यजलधारातच्चरणपंकजावनेजनारुणकिंजल्कोपरं
जिताखिलजगदघमलापहोपस्पर्शनामलासाक्षाद्भगवत्पदीत्यनुपलक्षितवचोभिरभिधीयमाना
तिमहताकालेनयुगसहस्त्रोपलक्षणेनदिवोमूर्धन्यवततार ॥ यत्तद्विष्णुपदमाहुः ॥ यत्रहवाववी
रव्रतऔत्तानपादिःपरमभागवतोस्मत्कुलदेवताचरणारविंदोदकमिति यामनुसवनमुत्कृष्यमाण
भगवद्भक्तियोगेनदृढंक्लिद्यमानांतर्हृदयऔत्कंठयाद्विवशामीलितलोचनयुगलकुड्मलविगालि
तामलबाष्पकलयाभिव्यज्यमानरोमपुलककुलकअधुनापिपरमादरेणशिरसाबिभर्ति ॥ ततऋषय
स्तत्प्रभावज्ञाऋपिलोकेइयं ननुतपसआत्यंतिकी सिद्धिरेतावतीतिभगवतिसर्वात्मनिवासुदेवेन
वरतभक्तियोगलाभेनैवोपेक्षितान्यार्थात्मगतयो मुक्तिमिवागतांमुमुक्षवःसबहुमानमेवाद्यापिज
टाजूटैरुद्वहंति ॥ ततोनेकसहस्त्रकोटिविमानानीकसंकुलदेवयानेनावतरंतींदुमंडलमाप्लाव्यब्रह्म
सदनेनिपतति ॥ तत्रचतुर्धाभिद्यमानाचतुर्भिर्नामभिश्च चतुर्दिशमभिस्यंदतीनदनदीपतिमेवा
भिनिविशतिसीतालकनंदाचक्षुर्भद्रेति ॥ सीतातुब्रह्मसदनात्केसराद्रिशिखरेभ्योधोधः पतंतीगं

SGDF

धमादनमूर्ध्निपतित्वांतरेण भद्राश्ववर्षंप्राच्यांदिशिक्षारसमुद्रंप्रविशति ॥ एवंमाल्यवच्छिखरान्निष्प
तंत्यनुपरतवेगाकेतुमालमभिचक्षुः प्रतीच्यांदिशिसरित्पतिंप्रविशति ॥ भद्राचोत्तरतोमेरुशिरसो
निपंततीगिरिशिखराद्गिरिशिखरमतिहायशृंगवतः शृंगादभिस्यंदमानाउत्तरांस्तुकुरूनतिक्रम्यो
दीच्यांदिशिलवणार्णवंप्रविशति ॥ तथैवालकनंदादक्षिणेनतुब्रह्मसदनाद्बहूनिगिरिकूटान्यति
क्रम्यहेमकूटाद्धिमकूटान्यतिरभसतररंहसालुठंती भारतमेववर्षंदक्षिणस्यांदिशिजलनिधिंप्रविशति॥
अन्येनदानद्यश्चवर्षेस्मिन्संतिबहुशोमेर्वादिगिरिदुहितरः अत्रापिजंबूद्वीपेभारतमेववर्षंकर्मक्षेत्रं ॥
अथान्यान्यष्टवर्षाणिस्वर्गिणांपुण्यशेषोपभोगस्थानानिभौमानिस्वर्गपदानिव्यपदिशंति ॥ स्ना
त्वापादोदकंविष्णोःपिबन्शिरसिधारयन् ॥ सर्वपापविनिर्मुक्तोवैष्णवींसिद्धिमाप्नुयात् ॥ ॥
नाममुद्राधारणविधिः ॥ ॥ श्री केशव० २४ प्रणवस्य० वःस्वरोम् ॥ पूर्वोच्चरि० श्रीविष्णु
प्रीत्यर्थं गोपीचंदनतिलकायुधधारणमहंकरिष्ये ॥ यस्मिन्गृहेतिष्ठतिगोपिचंदनंभक्त्याललाटे
मनुजोबिभर्ति ॥ तस्मिन्गृहेतिष्ठतिसर्वदाप्रभुःश्रियार्चितःकंसनिषूदनोहरिः ॥ श्रीरंगेद्वारका
यांचश्रीकूर्मेचतथास्थितां ॥ सिंहाद्रौचप्रयागेचवाराहेतुलसीवने ॥ गृहीत्वामृत्तिकांभक्त्यासाल

१० SGDF Sri Gangeshwari Digital Foundation

ग्रामजलैःसह ॥ गायत्रीमूलमंत्राभ्यांत्रिवारमभिमंत्र्यच ॥ तयोर्ध्वपुंड्रंधृत्वांगेविष्णोःसायुज्य माप्नुयात् ॥ ॥ वामकरे सालग्रामतीर्थेन गोपीचंदनमर्दनंकृत्वा तदुपरिनारायणमुद्रयां कनंकृत्वा मूलमंत्रेणाभिमंत्र्य भक्त्याद्वादशस्थलेष्वतिलकान्धारयेत् ॥ तत्क्रमः ॥ ललाटे ना सादिकेशपर्यंतं दंडाकारंछिद्रान्वितं पुंड्रंतर्जन्याकेशवायनमइतिधारयेत ॥ १ ॥ हृदि दशांगुल परिमितं पद्माकारंपुंड्रंनारायणायनमइतिधारयेत् ॥ २ ॥ वक्षस्थले अष्टांगुलपरिमितंदीपाकृतिं पुंड्रंमाधवायनमइतिधारयेत् ॥ ३ ॥ कंठेचतुरंगुलविस्तृतं पुंड्रं दी०गोविंदायनमइतिविन्यसेत ॥ ४ ॥ दक्षकुक्षौ दशांगुलपरिमितंपुंड्रंविष्णवेनमइतिविन्यसेत् ॥ ५ ॥ दक्षबाहुमूले अष्टांगुल परिमितं वेणुपत्राकृतिंपुंड्रं मधुसूदनायनमइतिविन्यसेत् ॥ ६ ॥ दक्षांसे चतुरंगुलपरिमितंपुंड्रं त्रिविक्रमायनमइतिधारयेत् ॥ ७ ॥ वामकुक्षौ दशांगुलपरिमितं दी० पुंड्रंवामनायनमइतिधार येत् ॥ ८ ॥ वामबाहुमूले अष्टांगुलपरिमितं वेणुपत्राकृतिंपुंड्रं श्रीधरायनमइतिधारयेत ॥ ९ ॥ वामांसेचतुरंगुलपरिमितं पुंड्रं हृषीकेशायनमइतिविन्यसेत् ॥ १० ॥ पृष्ठे चतुरंगुलविस्तृतंपुंड्रं पद्मनाभायनमइतिधारयेत ॥ ११ ॥ ककुदि चतुरंगुलमायतंपुंड्रं दामोदरायनमइतिविन्यसे

SGDF
Sri Gangeshwari Digital Foundation

त् ॥ १२ ॥ नमोवासुदेवायेतिमूर्ध्निविन्यसेदिति ॥ ॥ अथतिलकोपरिमुद्राधारणं ॥ ॥
आयुधप्रार्थनामंत्रः ॥ ॐ सुदर्शनमहाज्वालकोटिसूर्यसमप्रभ ॥ अज्ञानांधस्यमेनित्यंविष्णोर्मा
र्गंप्रदर्शय ॥ पांचजन्यनिजध्वानध्वस्तपातकसंचय ॥ त्राहिमांपापिनंघोरसंसारार्णवपातिनं ॥
संसारभयभीतानां योगिनामभयप्रद ॥ पद्महस्तास्थितंविष्णोः पाहिमांसर्वतोभयात् ॥ दैत्यशो
णितादिग्धांगे कौमोदकिगदेहरेः ॥ भिंधिभिंधितमोंतस्थं त्वांनमामिपुनःपुनः ॥ नाममुद्रेनम
स्तुभ्यं त्वदंकिततनुर्हरेः ॥ प्रसादाद्विष्णुलोकेहि चिरंस्थास्यामिनिर्वृतः ॥ दक्षकपोलेएकांहृद
येतिस्रः उदरेपंच दक्षपार्श्वेद्वे दक्षस्तनेतिस्रः दक्षबाहुतिलकोपरिद्वे वामबाहुतिलकाधस्तादेकां
कर्णमूलेकंठेचैकैकामिति चक्रमुद्राविन्यसेत् ॥ वामकपोलेएकां वामपार्श्वेद्वे वामस्तनेतिस्रः वा
मबाहुतिलकोपरिद्वे दक्षबाहुतिलकाधस्तादेकां कर्णमूलेचैकामितिशंखमुद्राविन्यसेत् ॥ ललाटे
एकां वामपार्श्वेस्तनेचैकैकां वामबाहुतिलकाधस्ताद्वे इतिगदामुद्राविन्यसेत् ॥ वक्षसिएकां द
क्षपार्श्वाधोभागेस्तनेचैकैकां दक्षबाहुतिलकाधस्ताद्वेइति पद्ममुद्राविन्यसेत् ॥ सर्वत्रनाममुद्रां ११
विन्यसेत् ॥ नमोमुद्राभ्यः इति प्रार्थयेत् ॥ तुलसीकाष्ठसंभूतेमालेकृष्णजनप्रिये ॥ कंठेत्वांधार

यिष्यामिकुरुमांविष्णुवल्लभं ॥ अक्षमालेनमस्तुभ्यं पद्मासनधृतेसदा ॥ पद्मापतिप्रसादंतेकुरुधा
रणतोमयि ॥ येकंठलग्नतुलसीनलिनाक्षमाला येबाहुमूलपरिचिन्हितशंखचक्राः ॥ येवाललाटफ
लकेलसदूर्ध्वपुंड्रास्तेवैष्णवाभुवनमाशुपवित्रयंति ॥ इति तिलकायुधतुलस्यक्षमालाधारणं ॥ ॥
॥ अथ ऋग्वेदिनां अर्घ्यप्रदानांतप्रातःसंध्या ॥ ॥ केशवायनमः १ नारायणायनमः २मा
धवायनमः ३ (इतिप्राश्य) गोविंदायनमः४ विष्णवेनमः ५ (करौप्रक्षालयेत्) मधुसूदना
यनमः ६ त्रिविक्रमायनमः ७(कपोलद्वयं स्पृशेत्) वामनायनमः ८श्रीधरायनमः ९(ओ
ष्ठद्वयं) हृषीकेशायमः १० (वामकरं)पद्मनाभायनमः ११ (पादौ) दामोदरायनमः१२(शिरः)
संकर्षणायनमः१३ (नासाग्रं) वासुदेवायनमः १४ प्रद्युम्नायनमः १५ (नासापुटद्वयं) अ
निरुद्धायनमः१६ पुरुषोत्तमायनमः१७(चक्षुर्द्वयं) अधोक्षजायनमः १८ नारसिंहायनमः१९
(कर्णद्वयं) अच्युतायनमः २० (नाभिं) जनार्दनायनमः २१ (हृदयं) उपेंद्रायनमः२२
(शिरः) हरयेनमः २३ श्रीकृष्णायनमः २४ (भुजद्वयं) रेचक पूरक कुंभकरीत्याप्राणाया
मंकुर्यात् ॥ सेत्थं पंचांगुलिभिर्नासापुटमापीड्य सकृदर्थानुसंधानपूर्वकंमंत्रंचित्तेआवर्तयन् द

SGDF

आ० क्षिणनासापुटेन वायुं विसृज्य तथैव द्वि वारंजपन् वामनासापुटेनपूरयित्वा कुंभकेदशप्रणवयु प०
१२ क्तांगायत्रीं त्रि वारंजपेत् ॥ तद्यथा ॥ प्रणवस्य परब्रह्मऋषिः परमात्मादेवता दैवीगायत्रीछंदः
प्राणायामेविनियोगः ॥ ॐ भूः ॐ भुवः ॐ स्वः ॐ महः ॐ जनः ॐ तपः ॐ सत्यं ॐ
तत्सवितुर्वरेण्यं भर्गोदेवस्यधीमहि॥धियोयोनःप्रचोदयात् ओमापोज्योतीरसोमृतं ब्रह्मभूर्भुवःस्व
रों॥श्रीगोविंदगोविंद श्रीमद्भगवतो महापुरुषस्य श्रीविष्णोराज्ञयाप्रवर्तमानस्य आद्यब्रह्मणः
द्वितीयपरार्धे श्रीश्वेतवाराहकल्पे वैवस्वतमन्वंतरे कलियुगे प्रथमचरणे भरतवर्षे भरतखंडे जंबू
द्वीपे दंडकारण्येदेशे गोदावर्याः दक्षिणेतीरे शालिवाहनशके बुत्धावतारे रामक्षेत्रे अस्मिन्वर्त
माने संवत्सरे अयने ऋतौ मासे पक्षे तिथौ वासरे श्रीविष्णुदिनसनक्षत्रे विष्णुयोगे विष्णुक
रणे एवंगुणविशेषण विशिष्टायांपुण्यतिथौ श्रीविष्णुप्रेरणया श्रीविष्णुप्रीत्यर्थं प्रातःसंध्यामुपा
सिष्ये ॥ आपोहिष्ठेति तृचस्य मंत्रस्य सिंधुद्वीपऋषिः आपोदेवता दैवीगायत्रीछंदः मार्जने
विनियोगः ॥ ॐ आपोहिष्ठामयोभुवस्तानऊर्जेदधातन॥महेरणायचक्षसे॥योवःशिवतमोरसस्त १२
स्यभाजयतेहनः उशतीरिवमातरः तस्माअरंगमामवोयस्यक्षयायजिन्वथ आपोजनयथाचनः॥

SGDF
Sri Gargeshwari Digital Foundation

25

सूर्यश्चेत्यस्यमंत्रस्य हिरण्यगर्भऋषिः सूर्यमामन्युमन्युपतयश्चदेवताः प्रकृतीछंदः जलाभिमंत्र
णेविनियोगः ॐ सूर्यश्चमामन्युश्चमन्युपतयश्चमन्युकृतेभ्यः पापेभ्योरक्षंतां यद्रात्र्यापापमकार्षं
मनसावाचाहस्ताभ्यां पद्भ्यामुदरेणशिश्ना रात्रिस्तदवलुंपतु यत्किंचदुरितंमयि इदमहंमाममृत
योनौ सूर्येज्योतिषिजुहोमिस्वाहा ॥ केशव २४॥ आपोहिष्ठेति नवर्चस्य सूक्तस्य सिंधुद्वीपोंब
रीषोवा आपंगायत्रं अनुष्टुबंतं पंचमीवर्धमाना सप्तमीप्रतिष्ठा अंतेद्वे अनुष्टुभौ मार्जने विनि
योगः ॥ ॐ आपोहि० शन्नोदेवीरभिष्टय आपोभवंतुपीतये शंयोरभिस्रवंतुनः ईशानावार्यी
णां क्षयंतीश्चर्षणीनां अपोयाचामिभेषजं अप्सुमेसोमोअब्रवीदंतर्विश्वानिभेषजा अग्निंचविश्वशं
भुवं आपःपृणीतभेषजंवरूथंतन्वे ३ मम ज्योक्च सूर्यंदृशे इदमापःप्रवहतयत्किंचदुरितंमयि य
द्वाहमभि दुद्रोहयद्वा शेपउतानृतं आपोअद्यान्वचारिषं रसेनसमगस्महि पयस्वानग्नआगहितं
मासंसृजवर्चसा ॥ ससुषीस्तदपसोदिवा नक्तंचससुषीः वरेण्यक्रतूरहमादेवीरवसेहुवे ॥ ऋतंचे
तिसूक्तस्य अघमर्षणऋषिः भाववृतोदेवता अनुष्टुप्छंदः पापपुरुष विसर्जनेविनियोगः ॥ ॐ
ऋतंचसत्यंचाभिद्धात्तपसोध्यजायत ततोरात्र्यजायत ततःसमुद्रोअर्णवः समुद्रादर्णवादधिसं

SGDF
Sri Gurgeshwar Digital Foundation

आ० वत्सरो अजायत अहोरात्राणिविदधद्विश्वस्यमिषतोवशी सूर्याचंद्रमसौ धातायथापूर्वमकल्प प०
१३ यत् दिवंचपृथिवींचांतरिक्षमथोस्वः ॥ केशव २४॥ प्राणायामः॥ पूर्वोच्च० श्रीसूर्यांतर्गतनारा
यणप्रीत्यर्थं प्रातःसंध्यांगार्घ्यप्रदानंकरिष्ये॥गायत्र्याविश्वामित्रःसवितागायत्री प्रतिचक्ष्व वसिष्ठ
इंद्रासोमावनुष्टुप् प्रातरर्घ्यदानेविनियोगः॥ ॐ भूर्भुवस्वः ॐ तत्सवितुर्वरेण्यं भर्गोदेवस्यधीम
हि॥ धियोयोनःप्रचोदयात् ३इति॥ प्रतिचक्ष्वविचक्ष्वेंद्रश्चसोमजागृतं रक्षोभ्योवधमस्यतमशनिं
यातुमद्भ्यः॥ प्रातर्देवीमदितिंजोहवीमिमध्यंदिनउदितासूर्यस्य रायेमित्रावरुणासर्वतातेळेतोका
यतनयायशंयोः॥ उत्तिष्ठोत्तिष्ठगंतव्यं पुनरागमनायच॥उत्तिष्ठदेविस्थातव्यंप्रविश्यहृदयंमम ॥अ
सावादित्योब्रह्म शुक्लपक्षेकेशवादिदामोदरांतंकृष्णेसंकर्षणादिकृष्णांतंतर्पणंकुर्यात् ॥केशव२४॥
॥ अथ गुरुमंत्रः ॥ ॥ आसनेउपविश्य ॥ ममशरीरस्यअंतर्यामिऋषिः सत्योदेवता प्रकृतीपु
रुषश्छंदः समस्तभूतोच्चाटनेविनियोगः ॥ अपसर्पंतुयेभूतायेभूताभुविसंस्थिताः ॥ येभूताविघ्न १३
कर्तारस्तेनश्यंतुशिवाज्ञया ॥ अपक्रामंतुभूतानिपिशाचाःसर्वतोदिशं ॥ अपसर्पंतुयेभूताःक्रूरा
श्चैवतुराक्षसाः॥ येचान्येनिवसंत्येवदेवताभुविसंस्थिताः तेषामप्याविरोधेनब्रह्मकर्मसमारभे इति॥

पृथ्वित्वयाधृतालोकादेवित्वंविष्णुनाधृता ॥ त्वंचधारयमांदेविपवित्रंकुरुचासनं ॥ मांचपूतंकुरु
धरेनतोस्मित्वांसुरेश्वरि ॥ आसनेसोममंडलेकूर्मस्कंधेउपविष्टोस्मि ॥ भूर्भुवस्वरोम् अनंतासना
यनमः ॐ मंमंडूकायनमः ॐ कुंकूर्मायनमः ॐ वंवराहायनमः ॐ शंशेषायनमः ॐ कंका
लाग्निरुद्रायनमः ॐ वंवज्रायनमः॥ इत्यासनं ॥ अथदिग्बंधः॥ ऐंद्रीमाग्नेयींदिशंसुदर्शनेनबध्ना
मि नमश्चक्रायस्वाहा ॥ याम्यांनैर्ऋतींदिशंसुदर्शनेनबध्नामिनमश्चक्रायस्वाहा ॥ वारुणींवाय
वींदिशंसुदर्शनेनबध्नामिनमश्चक्रायस्वाहा ॥ कौबेरीमैशानींदिशंसुदर्शनेनबध्नामि नमश्चक्राय
स्वाहा ॥ अस्त्रायफट् ॥ इतिदिग्बंधः॥ ॥ अथकरशुद्धिः ॥ ॥ मणिबंधेप्रकोष्टेचकूर्परेहस्त
संधिषु ॥ तत्पृष्ठपार्श्वयोश्चैव करशुद्धिरुदाहृता ॥ ॐ यं ३ ॐ रं ३ ॐ वं ३ ॥ इतिकरशु
द्धिः॥ओं श्रीगुरुभ्योनमः ॐ परमगुरुभ्योनमः ॐ श्रीमदानंदतीर्थभगवत्पादाचार्येभ्योनमः॥
ॐ श्रीवेदव्यासायनमः ॐ भारत्यैनमः ॐ सरस्वत्यैनमः ॐ वायवेनमः ॐ ब्रह्मणेनमः ॐ
लक्ष्म्यैनमः ॐ नारायणायनमः ॐ एकादशस्थानेतत्तन्मंत्रदेवताभ्योनमः ॥ ॐ वासुदेवाय
नमः ॥ इतिद्वादशनमस्काराः ॥ ततःहृत्स्थंभगवंतंसुषुम्नामार्गतःमूर्ध्निविन्यसेत् ॥ वामकुक्षिंस्पृ

SGDF
Sri Gangeshwari Digital Foundation

ष्ट्वा पापपुरुषंध्यायेत् ॥ ब्रह्महत्याशिरस्कंचस्वर्णस्तेयभुजद्वयं ॥ सुरापानहृदायुक्तंगुरुतल्पक
टिद्वयं ॥ तत्संयोगपदद्वंद्वमंगप्रत्यंगपातकं ॥ उपपातकरोमाणंरक्तश्मश्रुविलोचनं ॥ खड्गचर्मध
रंकृष्णंकुक्षौपापंविचिंतयेत् ॥ तन्नाभिदेशमानीयनाभिंस्पृष्ट्वा ॥ षट्कोणमंडलमध्यस्थोनीलव
र्णोवायुबीजवाच्यः शंखगदाब्जचक्रायुधः श्रीप्रद्युम्नोभगवान्मच्छरीरस्थं पापपुरुषंवायुनाशोषय
तु ॐ यं इतिरेचकपूरकरीत्याकुंभके ६ वारंजप्त्वाशुष्कंभावयेत् ॥ ततस्तंहृदयदेशमानीयहृद
यंस्पृष्ट्वा ॥ त्रिकोणमंडलमध्यस्थोरक्तवर्णोग्निबीजवाच्यःशंखाब्जारिगदायुधः श्रीसंकर्षणोभग
वान्मच्छरीरस्थं पापपुरुषंअग्निनानिर्दहतु ॐ रं इतिकुंभके १२ ॥ वारंजप्त्वा तंदग्धंध्यात्वात
द्भस्मवामनासापुटेनबहिःक्षिपेत् ॥ ततःशिरसिवर्तुलमंडलमध्यस्थःश्वेतवर्णोवरुणबीजवाच्यः
शंखचक्रपद्मगदायुधः श्रीवासुदेवोभगवान्मच्छरीरममृतवृष्ट्यावरुणेनाप्लावयतु ॥ ॐ वमितिकुंभ
के २४ वारंजप्त्वा तेनस्वदेहममृतधाराप्लुतंभावयेत् ॥ ॥ ॥
॥ अथतत्वन्यासः ॥ ॐ नमोनारायणायेति मूलमंत्रेण प्राणायामंकृत्वा १२ ॐ भूः अग्न्या
त्मने श्री अनिरुद्धाय हृदयायनमः ॐ भुवः वाय्वात्मने श्रीप्रद्युम्नाय शिरसेस्वाहा ॐ स्वः

SGDF Sri Gurgaon Digital Foundation

२९

सूर्यात्मने संकर्षणाय शिखायैवौषट् ॐ भूर्भुवस्वः प्रजापत्यात्मने श्रीवासुदेवाय कवचायहुं ॐ सत्यंसत्यात्मने श्रीनारायणाय अस्त्रायफट् इतिदिग्बंधः ॥ एतेषांतत्वमंत्राणामंतर्यामीऋषिः शिरसि दैवीगायत्रीछंदः मुखे श्रीनारायणोदेवता हृदये ध्यानेविनियोगः ॐ प्रधानोपमवर्णानिद्विभुजान्यप्यशेषतः ॥ कृतांजलिपुटान्येवप्रधानंतंहरिंप्रति ॥ तत्वांतर्यामिश्रीनारायणप्रेरणया तत्प्रीत्यर्थं तत्वन्यासमहंकरिष्ये ॥ शक्तिप्रतिष्ठासंविच्चस्फूर्तिःप्रवृत्तिरेवच ॥ कलाविद्यामतिर्नियतिमायाकालोह्यिपूरुषः ॥ ॐ परायशक्त्यात्मने श्रीलक्ष्मीनारायणाभ्यांनमः ॐ प० प्रतिष्ठात्मने श्रीलक्ष्मीना० ॐ प० संविदात्मने श्रीलक्ष्मीना० ॐ प० स्फूर्त्यात्मने श्रीलक्ष्मीना० ॐ प० प्रवृत्यात्मने श्रीलक्ष्मीना० ॐ प० कलात्मने श्रीलक्ष्मीना० ओं प० विद्यात्मने श्रीलक्ष्मीना० ओं प० मत्यात्मने श्रीलक्ष्मीना० ओं प० नियत्यात्मने श्रीलक्ष्मीना० ओं प० मायात्मने श्रीलक्ष्मीनारायणा० ओं प० कालात्मने श्रीलक्ष्मीना० ओं प० पुरुषात्मने श्रीलक्ष्मीना० इति १२ देवतात्हृदयेमालाकारेणाविन्यसेत् ॥ ओं प० अव्यक्तात्मनेब्रह्माणीभारतीभ्यां० दक्षिणभुजे ॥ ओं प० महदात्मने ब्रह्मवायुभ्यांनमः वामभुजे ॥ ओं

SGDF
Sri Gurgeshwari Digital Foundation

आ० प० अहंकारात्मने गरुडशेषरुद्रेभ्योनमः दक्षिणोरौ ॥ ओं प० मनआत्मने स्कंदेंद्राभ्यांनमः प०
१५ वामोरौ ॥ ओं परा० श्रोत्रात्मने दिग्देवताभ्योनमः ओं प० त्वगात्मने प्राणायनमः ओं
प० चक्षुरात्मने सूर्यायनमः ओं प० जिव्हात्मने वरुणायनमः ओं प० घ्राणात्मने अश्वि
भ्यांनमः दक्षिणहस्तपंचांगुलिषु ॥ ओं प०वागात्मने वन्हयेनमः कों प० पाण्यात्मने दक्षाय
नमः ओं परा० पादात्मने जयंतायनमः ओं प० पाय्वात्मने मित्रायनमः ओं प० उपस्था
त्मनेमनवेनमः वामहस्तपंचांगुलिषु ॥ ओं प० शब्दात्मने बृहस्पातिप्राणाभ्यांनमः ओं प०
स्पर्शात्मने अपानायनमः ओं प० रूपात्मने व्यानायनमः ओं प० रसात्मने उदानायनमः
ओं प० गंधात्मने समानायनमः दक्षिणपादपंचांगुलिषु ॥ ओं प० आकाशात्मने महागण
पतये० ओं प०वाय्वात्मने प्रवहायनमः ओं प० तेजआत्मने वन्हयेनमः ओं प०अबात्मने
वरुणायनमः ओं प०पृथिव्यात्मने शनैश्वरधराभ्यांनमः वामपादपंचांगुलिषु॥एवंविन्यसेत॥अ १५
नेन तत्वन्यासेनभगवान् तत्वांतर्गतश्रीनारायणःप्रीयतां प्रीतोभवतु श्रीकृष्णार्पणमस्तु ॥ ॥
॥ अथमातृकान्यासः॥ ॥ पूर्ववत् मूलमंत्रेण प्राणायामादिदिग्बंधांतंकृत्वा ॥ एतेषांमातृका

मंत्राणामंतर्यामिऋषिः शिरसि दैवीगायत्रीछंदः मुखे अजादिरूपी श्रीनारायणोदेवता हृदये
ध्यानेविनियोगः ॥ तादृग्रूपाश्चपंचाशज्ज्ञानमुद्राभयोद्यताः॥ टंकीदंडीचधन्वीचतत्तद्युक्तास्तुवा
मतः ॥ अजादिरूपिश्रीनारायणप्रेरणया श्रीनारायणप्रीत्यर्थं मातृकान्यासमहंकरिष्ये ॥ ॐ
अंअजायनमः शिरसि ओं आं आनंदायनमः मुखेअभितः ओं इं इंद्रायनमः दक्षिणनेत्रे ओं
ईं ईशानायनमः वामनेत्रे ओं उं उग्रायनमः दक्षिणकर्णे ओं ऊं ऊर्जायनमः वामकर्णे ओं ऋं
ऋतंभरायनमः दक्षिणनासापुटे ओं ॠं ॠघायनमः वामनासापुटे ओं ऌं ऌशायनमः दक्षि
णकपोले ओं ॡं ॡजयेनमः वामकपोले ओं एं एकात्मनेनमः ऊर्ध्वोष्ठे ओं ऐं ऐरायनमः अ
धरोष्ठे ओं ओं ओजोभृतेनमः ऊर्ध्वदंतपंक्तौ ओं औं औरसायनमः अधरदंतपंक्तौ ओं अं अ
नंतायनमः तालुमूले ओं अः अर्धगर्भायनमः वाचि ओं कं कपिलायनमः ओं खं खपतये
नमः ओं गं गरुडासनायनमः ओं घं घर्मायनमः ओं ङं ङसारायनमः दक्षिणबाहुसंधिचतु
ष्टयेअग्रेच ॥ ओं चं चार्वंगायनमः ओं छं छंदोगम्यायनमः ओं जं जनार्दनायनमः ओं झं
झाटितारयेनमः ओं ञं ञमायनमः वामबाहुसंधिचतुष्टयेअग्रेच ॥ ओं टं टंकिनेनमः ओं ठं

SGDF

ठरकायनमः ओं डं डरकायनमः ओं ढं ढरिणेनमः ओं णं णात्मनेनमः दक्षिणपादसंधिचतु
ष्टयेअग्रेच ॥ ओं तं तारायनमः ओं थं थबायनमः ओं दं दंडिनेनमः ओं धं धन्विनेनमः
ओं नं नम्यायनमः वामपादसंधिचतुष्टयेअग्रेच ॥ ओं पं परायनमः दक्षिणकुक्षौ ओं फं फ
लिनेनमः वामकुक्षौ ओं बं बलिनेनमः पृष्ठे ओं भं भगायनमः गुह्ये ओं मं मनवेनमः उदरे
ओं यं यज्ञायनमः हृदये ओं रं रामायनमः त्वचि ओं लं लक्ष्मीपतयेनमः चर्मणि ओं वं व
राहायनमः मांसे ओं शं शांतसंविदेनमः रुधिरे ओं षं षड्गुणात्मनेनमः मेदसि ओं सं सा
रात्मनेनमः मज्जायां ओं हं हंसायनमः अस्थिषु ओं ळं ळाळुकायनमः प्राणे ओं क्षं श्रीनृ
सिंहायनमः जीवे एवं विन्यसेत् ॥ अनेन मातृकान्यासेन भगवानजादिरूपी श्रीनारायणः
प्रियतां प्रीतोभवतु श्रीकृष्णार्पणमस्तु ॥ ॥ ॥ ॥
॥ अथ विश्वामित्रगायत्रीमंत्रः ॥ ॥ गुरुनमस्काराः एकादशस्थाने सवितृनामक श्रीनारा
यणायनमः प्रणवस्य परब्रह्मऋषिः परमात्मादेवता दैवीगायत्रीछंदः तिसृणांव्याहृतीनां वि
श्वामित्रजमदग्निभरद्वाजाऋषयः अग्निवायुसूर्यांतर्गत अनिरुद्धप्रद्युम्नसंकर्षणादेवताः गायत्र्यु

SGDF Sri Gangadharan Digital Foundation

ष्णिगनुष्टुभश्छंदांसि प्राणायामेविनियोगः ॐ भूः ॐ भुवः ॐ स्वः ओं महः ओं जनः
ओं तपः ओं सत्यं ओं तत्सवितुर्वरेण्यंभर्गोदेवस्यधीमहि धियोयोनःप्रचोदयात् ओमापोज्यो
तीरसोमृतंब्रह्मभूर्भुवस्वरोम् ओं तत्सवितुरंगुष्ठाभ्यांनमः वरेण्यं तर्जनीभ्यांनमः भर्गोदेवस्य म
ध्यमाभ्यांनमः ॥ धीमहि अनामिकाभ्यांनमः धियोयोनः कनिष्ठिकाभ्यांनमः ॥ प्रचोदयात्
करतलकरपृष्ठाभ्यांनमः ॥ तत्सवितुर्हृदयायनमः ॥ वरेण्यं शिरसेस्वाहा भर्गोदेवस्यशिखायैवौ
षट् धीमहि कवचाहुं धियोयोनः नेत्राभ्यांवैषट् प्रचोदयात् अस्त्रायफट् इतिदिग्बंधः ॥ अ
स्य श्री गायत्रीमंत्रस्य विश्वामित्रऋषिः सवितृनामकनारायणोदेवता दैवीगायत्रीछंदः गाय
त्रीमंत्रमूर्तिध्यानेविनियोगः ॥ ध्येयःसदासवितृमंडलमध्यवर्तीनारायणःसरसिजासनसन्निवि
ष्टः ॥ केयूरवान्मकरकुंडलवान्किरीटीहारीहिरण्मयवपुर्धृतशंखचक्रः ॥ १ ॥ रक्तवर्णअग्निमुख
ब्रह्मशिर विष्णुर्हृदयरुद्रललाट पृथिवीयोनिप्राणोपान व्यानोदानसमान सप्राण सांख्यानस
गोत्र सावित्रीनाम गायत्रीनाम गायत्र्याचतुर्विंशत्यक्षरत्रिपदाषट्कुक्षिः पंचशीर्ष उपनयना
दि यथाशक्तिगायत्रीमंत्रजपंकरिष्ये ओं भूर्भुवःस्वः ओं तत्सवितुर्वरेण्यं भर्गोदेवस्यधीमहि ॥

SGDF
Sri Gangeshwar Digital Foundation

आ० धियोयोनःप्रचोदयात् १०००।१००।१०। इति प्राणायामन्यासादि पूर्ववत् गायत्रीमं प०
१७ त्रजपःसंपूर्णः ॥ ॥ श्रीकृष्णार्पणमस्तु ॥ ॥ ॥

प्रणवोष्टौव्याहृतयोद्विषट्सावित्रमात्रका: ॥ पौरुषंवैष्णवंचेतिजपेक्रमउदाहृतः ॥ प्रणवमंत्रस्य जपःसन्यासिविषयः ॥ अतोत्रनोक्तः ॥ ॥ अथ नारायणाष्टाक्षरमंत्रः ॥ ॥ गुरुनमस्कारेषुएकादशस्थानेश्रीनारायणायनमः ॥ ओं नमोनारायणायेतिमंत्रेणप्राणायामः ॥ १२।२४ ३६ ॥ अथअष्टांगन्यासः ॥ ॥ ओं ओं विश्वायनमः ॥ शिरसि ॥ ओं नंतैजसायनमः ॥ नेत्रयोः ॥ ओं मोंप्राज्ञायनमः ॥ नसि । ओं नांतुरीयायनमः ॥ वाचि । ओं रांआत्मनेनमः हृदि ॥ ओं यंअंतरात्मनेनमः नाभौ ॥ ओं णांपरमात्मनेनमः जान्वोः ॥ ओं यंज्ञानात्मने नमः पादयोः ॥ दक्षिणवामहस्तांगुलिषु ॥ क्रुध्योल्कायांगुष्ठकाभ्यांनमः ॥ महोल्कायतर्जनीभ्यांनमः । वीरोल्कायमध्यमाभ्यांनमः । द्युल्कायानामिकाभ्यांनमः । सहस्रोल्कायकनिष्ठिकाभ्यांनमः । ज्येष्ठांगुलिंविहायअंगुलिचतुष्टयेदक्षिणहस्तेक्रमेण । ओं विश्वायनमः ओं तैजसा १७
यनमः। ओं प्राज्ञायनमः। ओं तुरीयायनमः। वामहस्तेज्येष्ठांविना। ओं आत्मनेनमः। ओं अंत

रात्मनेनमः।ओं परमात्मनेनमः।ओं ज्ञानात्मनेनमः।क्रुद्धोल्कायहृदयाय० हृदि । महोल्कायशिरसेस्वाहा । शिरसि । वीरोल्कायशिखायैवौषट् । शिखायां। द्युल्कायकवचायहुं । इतिकवचकरणं । सहस्रोल्कायअस्त्रायफट् । इतिदिग्बंधः । एतानिविष्णुरूपनामानि । अस्यश्रीनारायणाष्टाक्षरमंत्रस्यांतर्यामीऋषिः । शिरसि । दैवीगायत्रीछंदः मुखे । परमात्माश्रीनारायणोदेवता हृदये। ध्यानं। उद्यद्भास्वत्समाभासश्चिदानंदैकदेहवान्॥ चक्रशंखगदापद्मधरोध्येयोहमीश्वरः॥ लक्ष्मीधराभ्यामाश्लिष्टः स्वमूर्तिगणमध्यगः॥ ब्रह्मवायुशिवाहीशविपैःशक्रादिकैरपि ॥ सेव्यमानोधिकंभक्त्यानित्यनिःशेषशक्तिमान् ॥ मूर्तयोष्टावपिध्येयाश्चक्रशंखवराभयैः ॥ युक्ताःप्रदीपवर्णाश्चसर्वाभरणभूषिताः ॥ १ ॥ शंखचक्रवराभीतिहस्तान्येतानिसर्वशः । मूलरूपसवर्णानि कृष्णवर्णाशिखोच्यते ॥ २ ॥ श्रीलक्ष्मीनारायणप्रेरणयाश्रीलक्ष्मीनारायणप्रीत्यर्थंनारायणाष्टाक्षरमंत्रजपंकरिष्ये ॥ ततःसंध्यांगगायत्र्याः त्रिगुणं जप्त्वा। पूर्ववत्प्राणायामादिध्यानांतंकृत्वासमाप्यजलेश्रीकारंलिखित्वाविष्णुमावाह्यसंपूज्यमंत्रमुच्चार्यनारायणंतर्पयामीतितर्पयेत् । तर्पणसंख्या १०८।५४।२४।१२। जपदशांशतर्पणंपुनश्चरणविषयं। सृष्टिन्यासएवगृहस्थानामितिसएव

SGDF

कथितः ॥ ॥ अथ व्याहृतिमंत्रः ॥ ॥ गुरुनमस्कारेषुएकादशस्थानेहरयेनमः । ओं भूः
ओं भुवः ओं स्वः ओं भूर्भुवःस्वइतिमंत्रेणैवप्राणायामः । ओं भूः वासुदेवायनमः शिरसि ।
ओं भुवः संकर्षणायनमः हृदि । ओं स्वः प्रद्युम्नायनमः नाभौ । ओं भूर्भुवःस्वः अनिरुध्दा
यनमइति हृदयमारभ्यशिरःपर्यंतंहस्ताभ्यांसर्वांगेव्यापकाकारेणन्यसेत् । ओं नमोनारायणाय
हृदयायनमः हृदि । ओं भूःवासुदेवायशिरसेस्वाहा शिरसि । ओं भुवःसंकर्षणायशिखायैवौषट्
शिखायां । ओं स्वः प्रद्युम्नायकवचायहुं । ओं भूर्भुवस्वः अनिरुध्दाय अस्त्रायफट् । इतिदिग्बंधः ।
अस्यश्रीव्याहृतिमंत्रस्य ब्रह्माऋषिः शिरसि । गायत्रीछंदः मुखे । हरिर्देवता हृदये । उद्यदादित्य
वर्णश्च ज्ञानमुद्राभयोद्यतः ॥ लक्ष्मीधराभ्यामाश्लिष्टइत्यादिनित्यानिःशेषशक्तिमानित्यंतेनहरिं
ध्यात्वा वासुदेवादिकाः शुक्लरक्तपीतासितोज्वलाः ॥ चक्रशंखगदाब्जेतःप्रथमोमुसलीहली ॥
सचक्रशंखस्त्वपरस्तृतीयःशार्ङबाणवान् चक्रशंखस्तुरीयस्तुचक्रशंखासिचर्मवान् ॥ इतिवासुदेवा
दिचतुरश्चध्यात्वाजप्त्वाजपोपसंहारःपूर्ववत्कार्यः । तर्पणंतु । ॐ भूः अनिरुध्दंतर्पयामि । ॐ भु
वः प्रद्युम्नंतर्पयामि । ॐ स्वः संकर्षणंतर्पयामि । ओं भूर्भुवःस्वः वासुदेवंतर्पयामीतितर्पणं १२

SGDF
Sri Gangeshwari Digital Foundation

॥ अथ द्वादशाक्षरमंत्रः ॥ ॥ ॐ नमोभगवतेवासुदेवायेतिमंत्रेणप्राणायामः । एकादश स्थाने वासुदेवायनमः । ॐ ॐ केशवायनमः शिरसि । ॐ नं नारायणायनमः । चक्षुषोः । ॐ मों माधवायनमः नसि । ॐ भं गोविंदायनमः वाचि । ॐ गं विष्णवेनमः हृदि । ॐ वं मधुसूदनायनमः नाभौ । ॐ तें त्रिविक्रमायनमः जान्वोः । ॐ वां वामनायनमः पादयोः । ॐ सुं श्रीधरायनमः दक्षिणबाहौ । ॐ दें हृषीकेशायनमः वामबाहौ । ॐ वां पद्मनाभायनमः दक्षिणोरौ । ॐ यं दामोदरायनमः वामोरौ । ॐ ॐ अनिरुद्धायहृदयायनमःहृदये । ॐ नमःप्रद्युम्नायशिरसेस्वाहा । ॐ भगवतेसंकर्षणाय शिखायैवौषट् । ॐ वासुदेवाय कवचायहुं । ॐ ॐ नमोभगवतेवासुदेवाय नारायणायास्त्रायफट् । इतिदिग्बंधः । अस्यश्रीवासुदेव द्वादशाक्षरमंत्रस्यांतर्यामीऋषिःशिरसि । जगतीछंदःमुखे । श्रीवासुदेवोदेवताहृदये । अच्छवर्णो भयवरकरोध्येयोमितद्युतिः॥ लक्ष्मीधराभ्यामाश्लिष्टइत्यादिनित्यनिःशेषशक्तिमानित्यंतेन मंत्रदेवतांध्यात्वा वासुदेवादिकाःशुक्लेत्यादिनावासुदेवादिकाःपददेवताध्यात्वा चक्रशंखगदाब्जेतः केशवःसूर्यसप्रभः ॥ नारायणःसाब्जगदाचक्रशंखोरविप्रभः ॥ माधवश्चक्रशंखाब्जगदेतोरवि

SGDF
Sri Gargeshwari Digital Foundation

आ० सुप्रभः ॥ गदाब्जशंखचक्रैतोगोविंदोभास्करद्युतिः ॥ कंजकंबुचक्रगदायुतोविष्णूरविप्रभः ॥ प०
१९ सशंखाब्जगदाचक्रःसूर्याभोमधुसूदनः ॥ त्रिविक्रमोगदाचक्रशंखपद्मोरविप्रभः ॥ श्रीधरोरिग
दाकंबुपद्मैतोर्कसमद्युतिः ॥ सारिपद्मःशंखगदोहृषीकेशोर्कसप्रभः ॥ पद्मनाभःसाब्जचक्रगदा
शंखोर्कसंनिभः ॥ दामोदरःशंखगदाचक्रशंखोर्कसप्रभइति ॥ केशवादिदामोदरांताःवर्णदेवता
श्चध्यात्वा जप्त्वोपसंहारःपूर्ववत् । तर्पणंतुमंत्रमुक्त्वावासुदेवंतर्पयामीति ॥ १२ ॥ ॥
अथब्रह्मगायत्रीमंत्रः ॥ ॥ एकादशस्थानेसवितृनामकश्रीनारायणायनमः ॐतत्सवितुर्वरेण्यं
भर्गोदेवस्यधीमहि धियोयोनःप्रचोदयादितिमंत्रः। ॐ भूः ॐ भुवः ॐ स्वः ॐ महः ॐ जनः
ॐ तपः ॐ सत्यं ॐ तत्सवितुर्वरेण्यंभर्गोदेवस्यधीमहि धियोयोनःप्रचोदयात् । ओमापोज्यो
तीरसोमृतंब्रह्मभूर्भुवस्वरोमितिदशप्रणवसप्तव्याहृतियुक्तगायत्र्याप्राणायामः ॥ १२ ॥ दक्षिण
बाहुसंधिचतुष्टयेअग्रेच । ॐ तं केशवायनमः । ॐ त्सं नारायणायनमः । ॐ विं माधवायन १९
मः । ॐ तुं गोविंदायनमः । ॐ वें विष्णवेनमः । वामबाहुसंधिष्वग्रेच । ॐ रें मधुसूदनाय
नमः । ॐ ण्यं त्रिविक्रमायनमः । ॐ भं वामनायनमः । ॐ र्गो श्रीधरायनमः । ॐ दें हृषी

केशायनमः । दक्षिणपादसंधिष्वग्रेच । ॐ वं पद्मनाभायनमः । ॐ स्यं दामोदरायनः । ॐ
धीं संकर्षणायनमः । ॐ मं वासुदेवायनमः । ॐ हिं प्रद्युम्नायनमः । वामपादसंध्यग्रेषु ।
ॐ धिं अनिरुद्धायनमः । ॐ यों पुरुषोत्तमायनमः । ॐ यों अधोक्षजायनमः । ॐ नं
नारसिंहायनमः । ॐ प्रं अच्युतायनमः । ॐ चों जनार्दनायनमः शिरसि । ॐ दें उपेंद्रा
यनमः मुखे । ॐ यां हरयेनमः हृदये । ॐ तं कृष्णायनमः नाभौन्यस्य । अस्यश्रीब्रह्मगाय
त्रीमंत्रस्य प्रजापतिऋषिःशिरसि।दैवीगायत्रीछंदःमुखे।सविताश्रीनारायणोदेवता हृदयेप्रोद्यदा
दित्यवर्णश्चसूर्यमंडलमध्यगः ॥ चक्रशंखधरोंकस्थदोर्द्वयोध्येयएवच ॥ लक्ष्मीधराभ्यामितिध्या
त्वा शंखचक्रगदाब्जेतइत्यादिनाकेशवादिदामोदरांताः शंखाब्जादिगदीसूर्यप्रभःसंकर्षणोवि
भुः॥शंखचक्रीपद्मगदीवासुदेवोरविद्युतिः॥ प्रद्युम्नोरविभःशंखगदाब्जारिधरोविभुः॥ अनिरुद्धो
गदाशंखपद्मचक्रीरविप्रभः ॥ पद्मशंखगदाचक्रीसूर्याभःपुरुषोत्तमः ॥ रविप्रभोगदाशंखचक्रा
ब्जेतोह्यधोक्षजः ॥ नृसिंहःसूर्यभःपद्मगदाशंखोरिसंयुतः ॥ सूर्याभोच्युतनामाब्जशंखचक्रगदा
युतः ॥ जनार्दनश्चक्रशंखगदाब्जेतोरविद्युतिः ॥ उद्यदर्कनिभोपेंद्रोगदाचक्राब्जशंखयुक् ॥

SGDF

आ० सारिपद्मगदाशंखोहरिः प्रोद्यद्रविप्रभः॥ उद्यदर्कनिभः कृष्णोगदापद्मारिशंखभृदितिसंकर्षणादि प०
२० कृष्णांताश्चेत्यक्षरमूर्तीर्ध्यात्वा उद्यद्भास्वदितिनारायणवासुदेवादिकांश्चध्यात्वाआद्यंतयोः प्रण
वसहितचतुर्विंशत्यक्षरगायत्रींजप्त्वोपसंहारः पूर्ववत् कार्यः। तर्पणंतुमंत्रमुक्त्वासावितृनामकश्री
नारायणंत० ॥१२॥ अथ मातृकामंत्रः॥गुरुनमस्कारे एकादशस्थाने अजादिरूपिश्रीनारायणा
यनमः॥प्रणवेनाष्टाक्षरेणवादशप्रणवयुक्तगायत्र्यावाप्राणायामः। ॐभूरित्यादि मातृकान्यासोक्त
प्रकारेण पंचांगन्यासादिध्यानांतंकृत्वा अजादिदेवतासहितमातृकाणांजपंकुर्यात्। त्रिचतुःषड्
दशावृत्तिरितिवचनोक्तप्रकारेषु मध्येयथाशक्तिमंत्रावृत्तिजपंकुर्यात् । ॐ अंअजायनमः। अ
जंतर्पयामीत्यादि। अंतेनरसिंहायनमः। नरसिंहंतर्पयामीतिविशेषः॥ ॥ अथ पुरुषसूक्तमं
त्रः॥ ॥ एकादशस्थाने पुरुषायनमः। ॐ नमोनारायणायेति प्राणायामः। ॐ भूःअ
ग्न्यात्मनेअनिरुद्धाय हृदयायनमः। ॐ भुवः वाय्वात्मनेप्रद्युम्नायाशिरसेस्वाहा । ॐ स्वः २०
सूर्यात्मनेसंकर्षणायशिखायैवौषट्। ॐ भूर्भुवःस्वःप्रजापत्यात्मने श्रीवासुदेवाय कवचायहुं।
ॐ सत्यंसत्यात्मनेनारायणायास्त्रायफट्। इतिदिग्बंधः। अस्यश्रीपुरुषसूक्तमंत्रस्यांतर्यामीऋषिः

SGDF
Sri Gangadhar Digital Foundation

शिरसि । आद्याःपंचदशर्चअनुष्टुभः अंत्यात्रिष्टुप्छंदः इतिऋग्वेदिनां । यजुर्वेदिनांतुपंचदशा नुष्टुभः । शेषास्त्रिष्टुभइति मुखे । पुरुषनामकश्रीनारायणोदेवताहृदये । उद्यद्भास्वदित्यादिश क्तिमानित्यंतंध्यात्वावासुदेवादिकान् ध्यात्वापुरुषसूक्तमंत्रंत्रिचतुः षड्दशावृत्तिरित्युक्तेषु यथा शक्तिजप्त्वोपसंहारः पूर्ववत् । तर्पणंतुएकांऋचमुक्त्वापुरुषंतर्पयामीति । पूर्णषड्गुणत्वात्पुरुषः सर्वंजगत्स्रष्टृत्वंसामान्यतः पुरुषसूक्तार्थः विशेषस्त्वन्यत्रोक्तः ॥ ॥ अथ विष्णुमंत्रः ॥ ॥ गुरुनमस्कारः । एकादशस्थाने विष्णवेनमः । ॐ विष्णवेनमइति मंत्रः । अनेनैवप्राणाया मः । ॐ विंविश्वायहृदयायनमः । ॐ षंतैजसायशिरसेस्वाहा । ॐ णंप्राज्ञायशिखायैवौष ट् । ॐ वेंतुर्यायकवचायहुं । ॐ नंआत्मनेनेत्राभ्यांवौषट् । ॐ मंअंतरात्मनेअस्त्रायफट् । इतिदिग्बंधः।ॐ विंविश्वायनमःशिरसि। ॐ षंतैजसायनमः नसि । ॐ णंप्राज्ञायनमःहृदि । ॐ वेंतुर्यायनमःनाभौ। ॐ नंआत्मने॰जान्वोः। ॐ मोंअंतरात्मने॰पादयोरिति। अस्यश्रीवि ष्णुषडक्षरमंत्रस्यांतर्यामीऋषिः शिरसि । दैवीगायत्रीछंदःमुखे । विष्णुर्देवताहृदये । नीलमेघ समाभासश्चिदानंदैकदेहवान्।चक्रशंखगदेत्यारभ्यानित्यनिःशेषशक्तिमानित्यंतंध्यात्वा।मूर्तयःप

SGDF
Sri Gargeshwari Digital Foundation

डितिध्येयाश्चक्रशंखवराभयैः॥युक्ताःप्रदीपवर्णाश्चसर्वाभरणभूषिताइत्यक्षरदेवताश्चध्यात्वाजप्त्वो
पसंहारः पूर्ववत् । ॐ विष्णवेनमः विष्णुंतर्पयामीतितर्पणं । विष्णुशब्दार्थस्तुविशिष्टप्रमाणब
लरूपत्वं ॥ ॥ अथ कृष्णषडक्षरमंत्रः ॥ ॥ गुरुनमनेषुएकादशस्थाने श्रीकृष्णायनमः ॥
ॐ क्लींकृष्णायनमइत्यनेन प्राणायामः १२ षडंगन्यासः ॥ ॐ पूर्णज्ञानात्मनेअंगुष्ठाभ्यांनमः
ॐ पूर्णैश्वर्यात्मने तर्जनीभ्यांनमः ॐ पूर्णप्रभात्मनेमध्यमाभ्यांनमः ॐ पूर्णानंदात्मने अना
मिकाभ्यांनमः ॐ पूर्णतेजआत्मने कनिष्ठिकाभ्यांनमः ॐ पूर्णशक्त्यात्मने करतलकरपृष्ठा
भ्यांनमः एवंहृदयादिन्यासः इतिदिग्बंधः ॥ अस्यश्रीकृष्णषडक्षरमंत्रस्य ब्रह्माऋषिः दैवीगा
यत्रीछंदः श्रीकृष्णोदेवता ध्यानेविनियोगः ॥ ध्यायेत्धरिन्मणिनिभंजगदेकवंद्यं सौंदर्यसारम
रिशंखवराभयानि ॥ दोर्भिर्दधानमजितंसरसंचभैष्मी सत्यासमेतमखिलप्रदमिंदिरेशं ॥ श्रीकृ
ष्णप्रेरणया श्रीकृष्णप्रीत्यर्थं श्रीकृष्णषडक्षरमंत्रजपंकरिष्ये ॥ ॐ क्लीं कृष्णायनमः १०८ जपा
नंतरं पूर्ववंन्यासध्यानांतंकृत्वा श्रीमत्कृष्णषडक्षरमंत्रजपःसंपूर्णः श्रीकृष्णार्पणमस्तु ॥ ॐ क्लीं
कृष्णायनमः कृष्णंतर्पयामीति १२ मातृकान्यासतत्वन्यासौकृत्वासमापयेत् ॥ ॥

अथ संध्योपस्थानं ॥ ॥ कश्यपऋषिः दुर्गाजातवेदाग्निर्देवता त्रिष्टुप्छंदः संध्योपस्थानेविनि
योगः ॥ ॐ जातवेदसेसुनवामसोममरातीयतोनिदहातिवेदः ॥ सनःपर्षदतिदुर्गाणि विश्वा
नावेवसिंधुंदुरितात्यग्निः ॥ तच्छंयोरावृणीमहे गातुंयज्ञायगातुंयज्ञपतये दैवीस्वस्तिरस्तुनः स्व
स्तिर्मानुषेभ्यः ॥ ऊर्ध्वंजिगातुभेषजं शन्नोअस्तुद्विपदेशंचतुष्पदे ॥ ॐ नमोब्रह्मणेनमोअस्त्व
ग्नयेनमःपृथिव्यैनमओषधीभ्यः ॥ नमोवाचेनमोवाचस्पतयेनमोविष्णवेमहतेकरोमि ३ ॐ न
मःप्राच्यैदिशेयाश्चदेवता एतस्यांप्रतिवसंति एताभ्यश्चनमोनमः ॥ ॐ नमोदक्षिणायैदिशेया
श्चदेवता एतस्यांप्रतिवसंति एताभ्यश्चनमोनमः ॥ ॐ नमःप्रतीच्यैदिशे याश्चदेवता एतस्यां
प्रतिवसंति एताभ्यश्चनमोनमः ॥ ॐ नमोदीच्यैदिशे याश्चदेवता एतस्यांप्रतिवसंति एताभ्य
श्चनमोनमः ॥ ॐ ऊर्ध्वायै दिशेयाश्च०नमः ॐ अधरायैदिशेयाश्च०नमः ॐ अंतरिक्षायैदिशे
याश्च०नमः संध्यायैनमः सावित्र्यैनमः गायत्र्यैनमः सरस्वत्यैनमः सर्वेभ्योदेवेभ्यो०ऋषिभ्यो
गुरुभ्यो० ब्राह्मणेभ्योनमोनमः॥ कामोकार्षीतमन्युराकार्षीत् यांसदासर्वभूतानिस्थावराणिचरा
णिच ॥ सायंप्रातर्नमस्यंति सामासंध्याभिरक्षतु श्रीसामासंध्याभिरक्षत्वोंनमः । ब्रह्मण्योदेवकी

आ० पुत्रोब्रह्मण्योमधुसूदनः ॥ ब्रह्मण्यःपुंडरीकाक्षोब्रह्मण्योविष्णुरच्युतः नमोब्रह्मण्यदेवायगोब्राह्मण प०
२२ हितायच ॥ जगद्धितायकृष्णायगोविंदायनमोनमः ॥ क्षीरेणस्नापितेदेविचंदनेनविलेपिते ॥
बिल्वपत्रार्चितेदेविदुर्गेहंशरणंगतः ॥ श्रीदुर्गेहंशरणागच्छत्योंनमः ॥ आकाशात्पतितंतोयंयथा
गच्छतिसागरं ॥ सर्वदेवनमस्कारःकेशवंप्रतिगच्छति ॥ श्रीकेशवंप्रतिगच्छत्योंनमः ॥ उत्तमे
शिखरेजातेभूम्यांपर्वतमूर्धनि॥ ब्राह्मणेभ्योभ्यनुज्ञातागच्छदेवियथासुखं॥ श्रीगच्छदेवियथासुखं
गच्छत्योंनमः ॥ वासनाद्वासुदेवोसिवासितंतेजगत्त्रयं ॥ सर्वभूतनिवासोसिवासुदेवनमोस्तुते॥
नमोस्त्वनंतायसहस्रमूर्तयेसहस्रपादाक्षिशिरोरुबाहवे ॥ सहस्रनाम्नेपुरुषायशाश्वतेसहस्रकोटियु
गधारिणेनमः ॥ भद्रंनोअपिवातयमनः ॥ ॐ शांतिः शांतिः शांतिः सर्वारिष्टशांतिरस्तु सम
स्तमंगलावाप्तिरस्तु चतुःसागरयपर्यंतं गोब्राह्मणेभ्यःशुभंभवतु प्रवरगोत्रोच्चारणं॥ अमुकशर्मा
हं भोअभिवादयामि ॥ यस्यस्मृत्याचनामोक्त्या तपःसंध्याक्रियादिषु ॥ न्यूनंसंपूर्णतांयातिस
द्योवंदेतमच्युतं॥ मंत्रहीनंक्रियाहीनंभक्तिहीनंजनार्दन॥ यत्कृतंतुमयादेवपरिपूर्णंतदस्तुमे॥ अ
नेनप्रातःसंध्यावंदनेन भगवान् भारतीरमणमुख्यप्राणांतर्गत श्रीलक्ष्मीनृसिंहःप्रीयतांप्रीतोभव

SGDF Sri Gargeshwari Digital Foundation

तु श्रीकृष्णार्पणमस्तु केशव २४ ॥ ॥ अथयजुःशाखिनांप्रातःसंध्याप्रारंभः ॥ हरिः ॐ
आचम्य केशव० २४ ॥ ॐ भूः । ॐ भुवंः । ओ ३ सुवंः । ॐ महंः । ॐ जनंः । ॐ तपः ।
ओ ३ सत्यं । ॐ तत्संवितुर्वरेण्यंभर्गोदेवस्यधीमहि । धियोयोनंःप्रचोदयात् । ओमापोज्यो
तीरसोमृतं ब्रह्मभूर्भुवःसुवरों । पूर्वोक्तएवंगुणविशेषणाविशिष्टायां पुण्यतिथौ । सूर्यांतर्गतश्रीना
रायणप्रीत्यर्थं प्रातःसंध्यामुपासिष्ये । आपोहिष्ठामंयोभुवः । तानंऊर्जेदंधातन । महेरणांयचक्ष
से । योवंःशिवतंमोरसंः॥ तस्यभाजयतेहनंः । उशतीरिंवमातरंः । तस्माअरंगमामवोयस्यक्षयां
यजिन्वंथ । आपोजनयंथाचनः । सूर्यश्चमामन्युश्चमन्युपतयश्चमन्युकृतेभ्यः । पापेभ्योरक्षंतां ।
यद्रात्र्यापापंमकार्षं । मनसावाचाहस्ताभ्यां पद्भ्यामुदरेणशिश्ना । रात्रिस्तदंवलुंपतु । यत्किंचं
दुरितंमयिं । इदमाहंमाममृतयोनौ सूर्येज्योतिषिजुहोमिस्वाहा ॥ आचम्य । केशव० २४ ॥ द
धिक्रावुण्णोअकारिषं । जिष्णोरश्वंस्यवाजिनंः । सुरभिनोमुखाकरत्प्रणआयूंꣳषितारिषत् । आ
पोहिष्ठामंयो० । हिरंण्यवर्णाःशुचंयःपावकायासुंजातःकश्यपोयास्विंद्रः । अग्निंयागर्भंदधिरेवि
रूपास्तानआपःश ꣳस्योनाभंवंतु । यासाꣳराजावरुंणोयातिमध्येसत्यानृतेअंवपश्यंजनांनां । म

SGDF
Sri Gangadhara Digital Foundation

आ० २३ धुरुच्युतःशुचयोयाःपावकास्तानआपःशꣳस्योनाभवंतु । यासांदेवादिविकृण्वंतिभक्षंयाअंतरिक्षे प०
२३ बहुधाभवंति । याःपृथिवींपयसोदंतिशुक्रास्तानआपःशꣳस्योनाभवंतु । शिवेनमाचक्षुषापश्य
तापःशिवयातनुवोपस्पृशतत्वचंमे । सर्वाꣳअग्नीꣳरप्सुषदोहुवेवोमयिवर्चोबलमोजोनिधत्तद्रुप
दादिवमुंचतु । द्रुपदादिवेन्मुमुचानः । स्विन्नःस्नात्वीमलादिवापूतंपवित्रेणेवाज्यं । आ
पःशुंधंतुमैनसः । आचम्यप्राणानायम्यपूर्वोक्तएवंगुण० । सूर्यांतर्गतश्रीनारायणप्रीत्यर्थं प्रात
रर्घ्यप्रदानंकरिष्ये । ॐ भूर्भुवःसुवः तत्सवितुर्वरेण्यंभर्गोदेवस्यधीमहि । धियोयोनःप्रचोदया
त् ॥ ३ ॥ उत्तिष्ठोत्तिष्ठगंतव्यंपुनरागमनायच । उत्तिष्ठदेविस्थातव्यंप्रविश्यहृदयंमम । उद्यंत
मस्तंयंतमादित्यमभिध्यायन् । कुर्वन्ब्राह्मणोविद्वांत्सकलंभद्रमश्नुतेसावादित्योब्रह्मेतिब्रह्मैवसन्ब्र
ह्माप्येतियएववेदा । असावादित्योब्रह्मेति । आचम्यकेशव० ॥ पूर्ववत्गुरुमंत्रतत्वन्यासमातृ
कान्यासाःकार्याः । ओमित्येकाक्षरंब्रह्म । अग्निर्देवताब्रह्मइत्यार्षं । गायत्रंछंदं परमात्मंसरूपं ।
सायुज्यंविनियोगं । आयातुवरदादेविअक्षरंब्रह्मसंमितं । गायत्रींछंदसांमातेदंब्रह्मजुषस्वमे । २३
यदन्हात्कुरुतेपापं तदन्हात्प्रतिमुच्यते ॥ यद्रात्र्यात्कुरुतेपापंतद्रात्रियात्प्रतिमुच्यते । सर्ववर्णेम

हादेविसंध्याविद्येसरस्वति । ओजोसिसहोसिबलमसिभ्राजोसि ॥ देवानांधामनामासिविश्वम
सि ॥ विश्वायुःसर्वमसिसर्वायुरभिभूरों ॥ गायत्रीमावाहयामि ॥ सावित्रीमावाहयामि ॥ स
रस्वतीमावाहयामि ॥ छंदऋषीनावाहयामि ॥ श्रियमावाहयामि ॥ गायत्रियागायत्रीछंदो
विश्वामित्रऋषिः सवितादेवताग्निर्मुखंब्रह्माशिरोविष्णुहृदयꣳरुद्रशिखापृथिवीयोनिः प्राणापान
व्यानोदानसमानाः सप्राणाः श्वेतवर्णासांख्यायनसगोत्रागायत्रीचतुर्विंꣳशत्यक्षरात्रिपदाषट्कु
क्षिः ॥पंचशीर्षोपनयनेविनियोगः । ॐभूः ॐभुवः ओꣳसुवः ॐमहः ॐ जनः ॐ तपः ओꣳ
सत्यं ॐ तत्सवितुर्वरेण्यंभर्गोदेवस्यधीमहि । धियोयोनःप्रचोदयात् । ओमापोज्योतीरसोमृ
तंब्रह्मभूर्भुवःसुवरों । तत्सवितुअंगुष्ठकाभ्यांनमः । वरेण्यंतर्जनीभ्यांनमः । भर्गोदेवस्यमध्यमा
भ्यांनमः । धीमहिअनामिकाभ्यांनमः । धियोयोनःकनिष्ठिकाभ्यांनमः । प्रचोदयातकरतल
करपृष्ठाभ्यांनमः । तत्सवितुर्हृदयायनमः । वरेण्यंशिरसेस्वाहा । भर्गोदेवस्यशिखायैवौषट् । धी
महिकवचायहुं । धियोयोनःनेत्राभ्यांवौषट् । प्रचोदयातअस्त्रायफट् । इतिदिग्बंधः । अस्यश्री
गायत्रीमंत्रस्यविश्वामित्रऋषिः सवितादेवतागायत्रीछंदःगायत्रीमूर्तिध्यानेविनियोगः । ध्येयः

SGDF
Sri Gargeshwari Digital Foundation

आ० २४ सदासवितृमंडलमध्यवर्तीनारायणः सरसिजासनसन्निविष्टः। केयूरवान्मकरकुंडलवान्किरीटीहा प०
रीहिरण्मयवपुर्धृतशंखचक्रः।सवितृनामकश्रीविष्णुप्रेरणया।श्रीविष्णुप्रीत्यर्थं प्रातःसंध्यांगगायत्री
मंत्रजपंकरिष्ये ॐभू० १०००।१००।१०। पुनःप्राणायामन्यासंकृत्वाध्यानश्लोकं पठित्वाजपं
समापयेत्। पूर्ववत्संध्यांगगायत्र्यास्त्रिगुणमष्टाक्षरमंत्रंजप्त्वाव्याहृत्यादिमंत्रान्यथाशक्तिजपेत्॥
उपस्थानं॥ मित्रस्यचर्षणीधृतश्रवोदेवस्यसानसिं। सत्यंचित्रश्रवस्तमं। मित्रोजनान्यातयतिप्र
ज्ञानन्मित्रोदाधारपृथिवीमुतद्यां। मित्रःकृष्टीरनिमिषाभिचष्टेसत्यायहव्यंघृतवद्विधेम। प्रसमित्र
मर्तोअस्तुप्रयस्वान्यस्तआदित्यशिक्षतिव्रतेन। नहन्यतेनजीयतेत्वोतोनैनमंहोअश्नोत्यंतितो
नदूरात्। ॐ नमःप्राच्यैदिशेयाश्चदेवताएतस्यांप्रतिवसंत्येताभ्यश्चनमोनमः। दक्षिणायैदिशे०
प्रतीच्यैदिशे०। उदीच्यैदिशे०। ऊर्ध्वायैदिशे०। अधरायैदिशे०। अंतरिक्षायैदिशे०। न
मोनमोगंगायमुनयोर्मध्येयेवसंतितेमेप्रसन्नात्मानश्चिरंजीवितंवर्धयंति नमोनमोगंगायमुन
योर्मुनिभ्यश्चनमोनमोगंगायमुनयोर्मुनिभ्यश्चनमः। संध्यायैनमः। सावित्र्यैनमः। गा २४
यत्र्यैनमः। सरस्वत्यैनमः। सर्वाभ्योदेवताभ्योनमः। देवेभ्योनमः। ऋषिभ्योनमः। मुनिभ्योनमः।
१

SGDF
Sri Gargeshwari Digital Foundation

गुरुभ्योनमः । कामोकार्षीन्मन्युराकार्षीन्नमोनमः । याः सदासर्वभूतानिस्थावराणिचराणिच ।
सायंप्रातर्नमस्यंतिसामासंध्याभिरक्षतु । नमोब्रह्मण्यदेवायगोब्राह्मणहितायच । जगद्धितायकृ
ष्णायगोविंदायनमोनमः । उत्तमेशिखरेजातेभूम्यांपर्वतमूर्धनि । ब्राह्मणेभ्योभ्यनुज्ञातागछदे
वियथासुखं । स्तुतोमयावरदावेदमाताप्रचोदयंतीपवनेद्विजाता । आयुःपृथिव्यांद्रविणंब्रह्मवर्च
सं मह्यंदत्वाप्रजातुंब्रह्मलोकं । नमोस्त्वनंतायसहस्रमूर्तयेसहस्रपादाक्षिशिरोरुबाहवे । सहस्र
नाम्नेपुरुषायशाश्वतेसहस्रकोटियुगधारिणेनमः । आकाशात्पतितंतोयंयथागच्छतिसागरं । स
र्वदेवनमस्कारःकेशवंप्रतिगछति । सर्वदेवेषुयत्पुण्यंसर्वतीर्थेषुयत्फलं । तत्फलंसमवाप्नोतिस्तुत्वा
देवंजनार्दनं । वासनाद्वासुदेवोसिवासितंतेजगत्त्रयं । सर्वभूतनिवासोसिवासुदेवनमोस्तु
ते । चतुःसागरपर्यंतंगोब्राह्मणेभ्यःशुभंभवतु । काश्यपावत्सारनैध्रुवत्रियाऋषयत्रिप्रवरान्वितका
श्यपगोत्रोत्पन्नोहं । अमुकशर्माहं । अहं भो अभिवादये । अभिवादयामि । यस्यस्मृत्याचना
मोक्त्या तपःसंध्याक्रियादिषु । न्यूनंसंपूर्णतांयातिसद्योवंदेतमच्युतं । मंत्रहीनंक्रियाहीनंभक्ति
हीनंजनार्दन । यत्कृतंतुमयादेवपरिपूर्णंतदस्तुमे । अनेन प्रातःकालसंध्यावंदनेन भगवान्सवि

SGDF
Sri Gargeshwari Digital Foundation

त्वनामकसंवत्सरांतर्गतश्रीलक्ष्मीनारायणःप्रीयतांप्रीतोभवतु श्रीकृष्णार्पणमस्तु। आचम्य केशव २४
॥ अथ निर्माल्यविसर्जनक्रमः ॥ ॥ यःप्रातरुत्थायविधायनित्यंनिर्माल्यमीशस्यनिराकारोति ॥ नतस्यदुःखंनदरिद्रताचनकालमृत्युर्नचरोगमात्रं ॥ ॐ वंदेविष्णुंनमामिश्रियमथचभुवंब्रह्मवायूचवंदेगायत्रींभारतींतामपिगरुडमनंतंभजेरुद्रदेवं ॥ देवींवंदेसुपर्णीमहिपतिदयितांवारुणीमप्युमातामिंद्रादीन्कामसुख्यानपिसकलसुरांस्तद्गुरून्मद्गुरूंश्च ॥ नास्तिनारायणसमंनभूतंनभविष्यति ॥ एतेनसत्यवाक्येनसर्वार्थान्साधयाम्यहं ॥ अपराधसहस्राणिक्रियंतेहर्निशंमया॥ तानिसर्वाणिमेदेवक्षमस्वपुरुषोत्तम ॥ इतिदेवंप्रार्थ्य आगमार्थंतुदेवानांगमनार्थंतुरक्षसां ॥ करुघंटारवंतत्रदेवताव्हानलांछनं ॥ इतिघंटानादंकृत्वा ॥ सालग्रामनिवासायक्षीराब्धिशयनायच॥ श्रीशैलाद्रिनिवासायशिलावासायतेनमः ॥ इतिदेवंस्पृष्ट्वानमस्कृत्यस्नानपात्रेसंस्थाप्य अग्न्योदककलशमष्टाक्षरेणाभिमंत्र्य अंभ्रणीसूक्तेननिर्माल्यविसर्जनंकृत्वा रुद्रभागजलंत्यक्त्वाशेषंब्रह्मयज्ञतर्पणार्थंनिदध्यात् ॥ ॥ अथ निर्माल्यविसर्जनेअंभ्रणीसूक्तं ॥ ॥ ॐ अहंरुद्रेभिर्वसुभिश्चराम्यहमादित्यैरुतविश्वदेवैः ॥ अहंमित्रावरुणोभाबिभर्म्यहमिंद्राग्नीअहमश्विनोभा ॥ अहं

सोमंमाहनसंबिभर्म्यहंत्वष्टारमुतपूषणंभगं ॥ अहंदधामिद्रविणंहविष्मतेसुप्राव्ये ३ यजमानायसुन्वते ॥ अहंराष्ट्रीसंगमनीवसूनां चिकितुषीप्रथमायज्ञियानां ॥ तांमादेवाव्यदधुःपुरुत्राभूरिस्थात्रांभूर्यावेशयंतीं ॥ मयासोअन्नमत्तियोविपश्यतियःप्राणितियईं शृणोत्युक्तं ॥ अमंतवोमांतउपक्षियंतिश्रुधिश्रुतश्रद्धिवंतेवदामि ॥ अहमेवस्वयमिदंवदामिजुष्टंदेवेभिरुतमानुषेभिः यंकामयेतंतमुग्रंकृणोमितंब्रह्माणंतमृषिंतंसुमेधां ॥ १॥ अहंरुद्रायधनुरातनोमिब्रह्मद्विषेशरवेहंतवाउ॥ अहंजनायसमदंकृणोम्यहंद्यावापृथिवीआविवेश ॥ अहंसुवेपितरमस्यमूर्धन्ममयोनिरप्स्वं ३ तःसमुद्रे ॥ ततोवितिष्ठेभुवनानिविश्वोतामूंद्यांवर्ष्मणोपस्पृशामि ॥ अहमेववातइवप्रवाम्यारभमाणाभुवनानिविश्वा ॥ परोदिवापरएनापृथिव्यैतावतीमहिनासंबभूव ॥२॥ कलशस्थशेषोदकेन मुख्यप्राणाभिषेकंकुर्यात् ॥ श्रीहनुमतेनमः नमस्तेप्राणेशप्रणतविभवायावनिमगानमःस्वामिन् रामप्रियतमहन्वन्मनघगुरुगुण ॥ नमस्तुभ्यंभीमप्रबलतमकृष्णेष्टभगवन्नमः श्रीमन्मध्वप्रदिशसुदृशंनोजयजय ॥ इतिध्यात्वा ॥ स्नानपात्रेत्रिरूपात्मकवायुंसंस्थाप्य ॥ पूर्वो० श्रीविष्णुप्रीत्यर्थं श्रीमुख्यप्राणस्यमन्युसूक्तबळित्थासूक्तवायुस्तुतिभिःअभिषेकंकरिष्ये॥ वायवेनमः ॥ ॥

SGDF Sri Gangeshwari Digital Foundation

॥ अथ मुख्यप्राणाभिषेके मन्युसूक्तं ॥ ॥ श्री ॥ यस्तेमन्योविधद्वज्रसायकसहओजः
पुष्यातिविश्वमानुषक् ॥ साह्यामदासमार्यंत्वयायुजासहस्कृतेनसहसासहस्वता ॥ मन्युरिंद्रोम
न्युरेवासदेवोमन्युर्होतावरुणोजातवेदाः॥ मन्युंविशईळतेमानुषीर्याःपाहिनोमन्योतपसासजोषाः
॥ अभीहिमन्योतवसस्तवीयांतपसायुजाविजहिशत्रून् ॥ अमित्रहावृत्रहादस्युहाचविश्वावसून्या
भरात्वंनः ॥ त्वंहिमन्योअभिभूत्योजाःस्वयंभूर्भामोअभिमातिषाहः ॥ विश्वचर्षणिःसहुरिःस
हावानस्मास्वोजःपृतनासुधेहि ॥ अभागःसन्नपपरेतोअस्मितवक्रत्वातविषस्यप्रचेतः ॥ तंत्वा
मन्योअक्रतुर्जिहीळाहंस्वातनूर्बलदेयायमेहि ॥ अयंतेअस्म्युपमेह्यर्वाङ्प्रतीचीनःसहुरेविश्वधा
यः ॥ मन्योवज्रिन्नभिमामाववृत्स्वहनावदस्युंरुतबोध्यापेः ॥ अभिप्रेहिदक्षिणतोभवामेधावृत्रा
णिजंघनावभूरिं ॥ जुहोमितेधरुणंमध्वो अग्रमुभाउपांशुप्रथमापिबाव ॥ १ ॥ त्वयामन्योसर
थमारुजंतोहर्षमाणासोधृषितामरुत्वः ॥ तिग्मेषवआयुधासंशिशानाअभिप्रयंतुनरोअग्निरूपाः २६
॥ अग्निरिवमन्योत्विषितःसहस्वसेनानीर्नःसहुरेहूतएधि ॥ हत्वायशत्रून्विभजस्ववेदओजोमि
मानोविमृधोनुदस्व ॥ सहस्वमन्योअभिमातिमस्मेरुजन्मृणन्प्रमृणन्प्रेहिशत्रून् ॥ उग्रंतेपाजोन

SGDF
Sri Gargeshwari Digital Foundation

न्वारुरुभ्रेवशीवशंनयसएकजत्वं ॥ एकोबहूनामसिमन्यवीळितोविशंविशंयुधयेसंशिशाधि ॥
अकृत्तरुक्त्वयायुजावयंद्युमंतंघोषंविजयायकृण्महे ॥ विजेषकृदिंद्रइवानवब्रवो३ स्माकंमन्यो
अधिपाभवेह ॥ प्रियंतेनामसहुरेगृणीमसिविद्मातमुत्संयतआबभूथ ॥ आभूत्यासहजावज्रसाय
कसहोबिभर्ष्यभिभूतउत्तरं ॥ क्रत्वानोमन्योसहमेद्येधिमहाधनस्यपुरुहूतसंसृजि ॥ संसृष्टंधनमुभ
यंसमाकृतमस्मभ्यंदत्तांवरुणश्चमन्युः ॥ भियंदधानाहृदयेषुशत्रवःपराजितासोअपनिलयंतां ।२।
॥ अथ बळित्थासूक्तं ॥ ॥ ॐ बळित्थातद्वपुषेधायिदर्शतंदेवस्यभर्गःसहसोयतोजनि ॥ यदी
मुपह्वरतेसाधतेमतिर्ऋतस्यधेनाअनयंतसस्रुतः ॥ पृक्षोवपुःपितुमान्नित्यआशयेद्वितीयमासप्त
शिवासुमातृषु ॥ तृतीयमस्यवृषभस्यदोहसेदशप्रमतिंजनयंतयोषणः ॥ निर्यदीं बुध्नान्महिषस्यव
र्पसईशानासःशवसाक्रंतसूरयः ॥ यदीमनुप्रदिवोमध्वआधवेगुहासंतंमातरिश्वामथायति ॥ प्रय
त्पितुःपरमान्नीयतेपर्यापृक्षुधोवीरुधोदंसुरोहति ॥ उभायदस्यजनुषंयदिन्वतआदिद्यविष्ठोअभवद्घृ
णाशुचिः ॥ आदिन्मातॄराविशद्यास्वाशुचिरहिंस्यमानउर्वियाविवावृधे ॥ अनुयत्पूर्वाअरुहत्स
नाजुवोनिनव्यसीष्ववरासुधावते ॥ १ ॥ ॥ ॥ ॥

SGDF
Sri Gargeshwari Digital Foundation

आ० अथ वायुस्तुतिः ॥ ॐ पांत्वस्मान्पुरुहूतवैरिबलवन्मातंगमाद्यद्घटाकुंभोच्चाद्रिविपाटनाधिकपटुप्र प०
२७ त्येकवज्रायिताः ॥ श्रीमत्कंठीरवास्यप्रततसुनखवरादारितारातिदूरप्रध्वस्तध्वांतशांतप्रविततमन
साभाविताना किवृंदैः ॥ १ ॥ लक्ष्मीकांतसमंततोविकलयन्नैवेशितुस्तेसमं पश्याम्युत्तमवस्तुदूर
तरतोपास्तंरसोयोष्टमः ॥ यद्रोषोत्करदक्षनेत्रकुटिलप्रांतोत्थिताग्निस्फुरत्खद्योतोपमविस्फुलिंगभ
सिताब्रह्मेशशक्रोत्कराः ॥ २ ॥ श्रीमद्विष्ण्वंघ्रिनिष्ठातिगुणगुरुतमश्रीमदानंदतीर्थ त्रैलोक्याचा
र्यपादोज्ज्वलजलजलसत्पांसवोस्मान्पुनंतु ॥ वाचांयत्रप्रणेत्री त्रिभुवनमहिता शारदाशारदेंदु
ज्योत्स्नाभद्रस्मितश्रीधवलितककुभाप्रेमभारंबभार ॥ १ ॥ उत्कंठाकुंठकोलाहलजवविदिताजस्र
सेवानुवृद्ध प्राज्ञात्मज्ञानधूतांधतमससुमनोमौलिरत्नावलीनां ॥ भक्त्युद्रेकावगाढप्रघटनसघटा
त्कारसंघृष्यमाणप्रांतप्राग्र्यांघ्रिपीठोत्थितकनकरजःपिंजरारंजिताशाः ॥ २ ॥ जन्माधिव्याध्यु
पाधिप्रतिहतिविरहप्रापकाणांगुणानामग्र्याणामर्पकाणां चिरमुदितचिदानंदसंदोहदानां ॥ ए २७
तेषामेषदोषप्रमुषितमनसांद्वेषिणांदूषकाणां दैत्यानामार्तिमंधेतमसिविदधतांसंस्तवेनास्मिशक्तः
॥ ३ ॥ अस्याविष्कर्तुकामंकलिमलकलुषेस्मिंजनेज्ञानमार्गं वंद्यंचंद्रेंद्ररुद्रद्युमणिफणिवयोनाय

काद्यैरिहाद्य ॥ मध्वाख्यंमंत्रसिद्धं किमुतकृतवतोमारुतस्यावतारंपातारंपारमेष्ठ्यंपदमपविपदः
प्राप्तुरापन्नपुंसां ॥ ४ ॥ उद्यद्विद्युत्प्रचंडांनिजरुचिनिकरव्याप्तलोकावकाशोबिभ्रद्भीमो भुजेयो
भ्युदितदिनकराभांगदाढ्यप्रकांडे ॥ वीर्योद्धार्यांगदाग्र्यामयमिहसुमतिंवायुदेवोविदध्यादध्या
त्मज्ञाननेतायतिवरमहितो भूमिभूषामणिर्मे ॥ ५ ॥ संसारोत्तापनित्योपशमदसदयस्नेहहासां
बुपूरप्रोद्यद्विद्यानवद्यद्युतिमणिकिरणश्रेणिसंपूरिताशः ॥ श्रीवत्सांकाधिवासोचिततरसरलश्रीम
दानंदतीर्थ क्षीरांभोधिर्विभिंद्याद्भवदनभिमतंभूरिमेभूतिहेतुः ॥ ६ ॥ मूर्धन्येषोंजलिर्मेदृढतर
मिहतेबध्यतेबंधपाशछेत्रेदात्रेसुखानांभजतिभुविभविष्यद्विधात्रेद्युभर्त्रे ॥ अत्यंतंसंततंत्वंप्रदिश
पदयुगेहंतसंतापभाजामस्माकंभक्तिमेकांभगवतउततेमाधवस्याथवायोः ॥७॥ साभ्रोष्णाभीशुशु
भ्रप्रभमभयनभो भूरिभूभृद्विभूतिभ्राजिष्णुर्भूर्ऋभूणांभवनमपिविभोभेदिबभ्रेबभूवे ॥ येन
भ्रूविभ्रमस्तेभ्रमयतुसुभृशंबभ्रुवद्दुर्भृताशान् भ्रांतिर्भेदावभासस्त्वितिभयमभिभूर्भोक्ष्यतोमायिभि
क्षून् ॥ ८ ॥ येंमुंभावंभजंतेसुरसुखसुजनाराधितंतेतृतीयं भासंतेभासुरैस्तेसहचरचलितैश्चामरै
श्चारुवेषाः॥ वैकुंठेकंठलग्नस्थिरशुचिविलसत्कांतितारुण्यलीलालावण्यापूर्णकांताकुचभरसुलभाश्ले

SGDF

षसंमोदसांद्राः ॥ ९ ॥ आनंदान्मंदमंदादातिहिमरुतःकुंदमंदारनंद्यावर्तामोदान् दधानामृडुपद
मुदितोद्गीतकैःसुंदरीणां ॥ वृंदैरावंद्यमुक्तेंद्रहिमगुमदनाहींद्रदेवेंद्रसेव्येमौकुंदेमंदिरेस्मिन्नविरत
मुदयन्मोदिनांदेवदेव ॥ १० ॥ उत्तप्तात्युत्कटत्विद्प्रकटकटकटध्वानसंघट्टनोद्यद्विद्युव्द्यूढ
स्फुलिंगप्रकरविकिरणोत्कातिथैबाधितांगान् ॥ उद्गाढपात्यमानातमसिततइतःकिंकरैःपंकि
लेतेपङ्क्तिगर्वाणांगरिम्णाग्लपयतिहिभवद्द्वेषिणोविद्वदाद्य ॥ ११ ॥ अस्मिन्नस्मद्गुरूणांहरिचर
णाचिरध्यानसन्मंगलानांयुष्माकंपार्श्वभूमिंधृतरणरणिकःस्वर्गिसेव्यांप्रपन्नः॥ यस्तूदास्तेसआस्ते
धिभवमसुलभक्लेशनिर्मोकमस्तप्रायानंदंकथंचिन्नवसतिसततंपंचकष्टेतिकष्टे।१२।क्षुत्क्षामान्रूक्षर
क्षोरदखरनखरक्षुण्णविक्षोभिताक्षानामभ्रानंधकूपेक्षुरमुखमुखरैः पक्षिभिर्विक्षतांगान् ॥ पूयासृङ्मू
त्रविष्टाक्रिमिकुलकलिलेतत्क्षणक्षिप्तशक्त्याद्यस्त्रव्रातार्दितांस्त्वद्द्विषउपाजिहतेवज्रकल्पाजलूकाः॥
१३ ॥ मातर्मेमातरिश्वन्पितरतुलगुरोभ्रातारिष्टाप्तबंधो स्वामिन्सर्वांतरात्मन्नजरजरयितर्जन्म
मृत्यामयानां ॥ गोविंदेदेहिभक्तिंभवतिचभगवन्नूर्जितांनिर्निमित्तांनिर्व्याजांनिश्चलांसद्गुणग
णबृहतींशाश्वतीमाशुदेव ॥ १४ ॥ विष्णोरत्युत्तमत्वादखिलगुणगणैस्तत्रभक्तिंगरिष्ठांसंश्लिष्टे

SGDF
Sri Gargeshwari Digital Foundation

श्रीधराभ्याममुमथपरिवारात्मनासेवकेषु ॥ यःसंधत्तेविरिंचिश्वसनविहगपानंतरुद्रेंद्रपूर्वेष्वाध्या
यंस्तारतम्यंस्फुटमवतिसदावायुरस्मद्गुरुस्तं ॥ १५ ॥ तत्वज्ञान्मुक्तिभाजः सुखयसिहिगुरोयो
ग्यतातारतम्यादाधत्सेमिश्रबुद्धींस्त्रिदिवनिरयभूगोचरान्नित्यबद्धान् ॥ तामिस्रांधादिकाख्येतम
सिसुबहुलं दुःखयस्यन्यथाज्ञान्विष्णोराज्ञाभिरित्थंश्रुतिशतमितिहासादिचाकर्णयामः ॥ १६ ॥
वंदेहंतंहनूमानितिमहितमहापौरुषोबाहुशाली ख्यातस्तेग्न्योवतारःसहितइहबहुब्रह्मचर्यादिध
र्मैः ॥ सस्नेहानांसहस्वानहरहरहितंनिर्दहन्देहभाजामंहोमोहापहोयः स्पृहयतिमहतींभक्तिम
द्यापिरामे ॥ १७ ॥ प्राक्पंचाशत्सहस्रैर्व्यवहितममितंयोजनैःपर्वतंत्वंयावत्संजीवनाद्यौषधनि
धिमधिकप्राणलंकामनैषीः ॥ अद्राक्षीदुत्पतंतंततउतगिरिमुत्पाटयंतंगृहीत्वायांतंखेराघवांघ्रौप्रण
तमपितदैकक्षणेत्वांहिलोकः ॥ १८ ॥ क्षिप्तःपश्चात्सलीलंशतमतुलमते योजनानांसउच्चस्ताव
द्विस्तारवांश्चाप्युपललवइवव्यग्रबुध्यात्वयातः॥ स्वस्वस्थानस्थितातिस्थिरशकलशिलाजालसंश्ले
षनष्टछेदांकः प्रागिवाभूत्कपिवरवपुषस्तेनमःकौशलाय ॥ १९ ॥ दृष्ट्वादुष्टाधिपोरःस्फुटितकन
कसद्वर्मघृष्टास्थिकूटंनिष्पिष्टंहाटकाद्रिप्रकटतटतटाकातिशंकोजनोभूत् ॥येनाजौरावणारिप्रियनट

SGDF
Sri Gargeshwari Digital Foundation

आ० नपद्गुर्मुष्टिरिष्टंप्रदेष्टुंकिंनेष्टेमेसतेष्टापदकटकतटित्कोटिभामृष्टकाष्ठः ॥ २० ॥ देव्यादेशप्रणीतिद्रु प०
२९ हिणहरवरावध्यरक्षोविघाताद्यासेवोद्यद्दयार्द्रः सहभुजमकरोद्रामनामासुकुंदः ॥ दुष्प्रापेपारमेष्ठ्ये
करतलमतुलंमूर्ध्निविन्यस्यधन्यं तन्वन्भूयःप्रभूतप्रणयविकसिताब्जेक्षणस्त्वेक्षमाणः ॥ २१ ॥
जघ्नेनिघ्नेनविघ्नोबहुलबलबकध्वंसनाद्येनशोचद्विप्रानुक्रोशपाशैरसुविधृतिसुखस्यैकचक्राजनानां
॥ तस्मैतेदेवकुर्मःकुरुकुलपतयेकर्मणाचप्रणामान्किर्मीरंदुर्मतीनां प्रथममथचयोनर्मणानिर्ममाथ
॥ २२ ॥ निर्मृत्यन्नत्ययत्नंविजरवरजरासंधकायास्थिसंधीन्युद्धेत्वंस्वध्वरेवापशुमिवदमयन्
विष्णुपक्षद्विडीशं ॥ यावत्प्रत्यक्षभूतंनिखिलमखभुजंतर्पयामासिथासौतावत्यायोजितृप्त्याकि
मुवदभगवन्राजसूयाश्वमेधे ॥ २३ ॥ क्ष्वेळाक्षीणाट्टहासंतवरणमरिहंनुद्धदोद्दामबाहो बव्हक्षौ
हिण्यनीकक्षपणसुनिपुणंयस्यसर्वोत्तमस्य ॥ शुश्रूषार्थंचकर्थस्वयमयमथसंवक्तुमानंदतीर्थ श्रीम
न्नामन्समर्थस्त्वमपिहियुवयोः पादपद्मंप्रपद्ये ॥ २४ ॥ द्रुह्यंतींत्वद्दुहंमांद्रुतमनिलबलाद्रावयं २९
तीमविद्यानिद्रांविद्राव्यसद्योरचनपटुमथापाद्यविद्यासमुद्र ॥ वाग्देवीसासुविद्याद्रविणदविदि
ताद्रौपदीरुद्रपत्न्या द्युद्रिक्ताद्रागभद्राद्रहयतुदयितापूर्वभीमाज्ञयाते ॥ २५॥ याभ्यांशुश्रूषुरासीः

कुरुकुलजननेक्षत्रविप्रोदिताभ्यां ब्रह्मभ्यांबृंहिताभ्यां चितिसुखवपुषाकृष्णनामास्पदाभ्यां ॥
निर्भेदाभ्यांविशेषाद्विवचनविषयाभ्यासुभाभ्याममूभ्यांतुभ्यं चक्षेमदेभ्यः सरसिजविलसल्लोचने
भ्योनमोस्तु ॥२६॥ गच्छन्सोगंधिकार्थंपथिसहनुमतः पुच्छमच्छस्यभीमःप्रोद्धर्तुनाशकत्सत्वमु
सुरुवपुषाभीषयामासचेति ॥ पूर्णज्ञानौजसोस्तेगुरुतमवपुषोः श्रीमदानंदतीर्थ क्रीडामात्रंतदेत
त्प्रमदद सुधियांमोहकद्वेषभाजां ॥ २७ ॥ बव्हीःकोटीरटीकःकुटिलकटुमतीनुत्कटाटोपकोपान्
द्राक्चत्वं सत्वरत्वाच्छरणदगदयापोथयामासिथारीन् ॥ उन्मथ्यातथ्यमिथ्यात्ववचनवचनाद्यु
त्पथस्थांस्तथान्यान्प्रायच्छःस्वप्रियायै प्रियतमकुसुमंप्राणतस्मैनमस्ते ॥२८॥ देहादुत्क्रामितानाम
धिपतिरसतामक्रमाद्वक्रबुद्धिः क्रुद्धःक्रोधैकवश्यः क्रिमिरिवमणिमान्दुष्कृतीनिष्क्रियार्थं ॥ चक्रे
भूचक्रमेत्यक्रकचमिवसतांचेतसः कष्टशास्त्रं दुस्तर्कंचक्रपाणेर्गुणगणविरहंजीवतांचाधिकृत्य ॥
॥ २९ ॥ तद्दुष्प्रेक्षानुसारात्कतिपयकुनरैरादृतोन्यैर्विसृष्टोब्रह्माहंनिर्गुणोहंवितथमिदमितिह्येषपा
षंडवादः ॥ तद्युक्त्याभासजालप्रसरविषतरूद्दाहदक्षप्रमाण ज्वालामालाधरोभिःपवनविजयतेते
वतारस्तृतीयः ॥ ३० ॥ आक्रोशंतोनिराशाभयभरविवशास्वाशयाश्छिन्नदर्पावाशंतोदेशना

SGPF Foundation

शस्त्विवतिबतकुधियांनाशमाशादशाशु ॥ धावंतोऽश्लीलशीलावितथशपथशापाशिवाःशातशौ
र्यास्त्वद्व्याख्यासिंहनादेसपदिददृशिरेमायिगोमायवस्ते ॥ ३१ ॥ त्रिष्वप्येवावतारेष्वरिभिर
पघृणंहिंसितोनिर्विकारःसर्वज्ञः सर्वशक्तिःसकलगुणगणापूर्णरूपप्रगल्भः ॥ स्वछःस्वछंदमृत्युःसु
खयसिसुजनंदेवकिंचित्रमत्रत्रातायस्यात्रिधामाजगदुतवशगांकिंकराःशंकराद्याः ॥ ३२ ॥ उ
द्यन्मंदस्मितश्रीमृदुमधुमधुरालापपीयूषधारापूरासेकोपशांतासुखसुजनमनोलोचनापीयमानं ॥
संद्रक्ष्येसुंदरंसंदुहदिहमहदानंदमानंदतीर्थश्रीमद्वक्त्रेंदुबिंबंदुरितनुदुदितंनित्यदाहंकदानु ॥ ३३ ॥
प्राचीनाचीर्णपुण्योच्चयचतुरतराचारतश्चारुचित्तानत्युच्चांरोचयंतीं श्रुतिचितवचनांश्रावकांश्चो
द्यचंचून् ॥ व्याख्यामुत्खातदुःखांचिरमुचितमहाचार्यचिंतारतांस्ते चित्रांसच्छास्त्रकर्तश्चरणपरिच
रांश्रावयास्मांश्चकिंचित् ॥ ३४ ॥ पीठेरत्नोपक्लृप्तेरुचिररुचिमणिज्योतिषासंनिषण्णंब्रह्माणंभा
विनंत्वांज्वलतिनिजपदेवैदिकाद्याहिविद्याः॥ सेवंतेमूर्तिमत्यःसुचरितचरितंभातिगंधर्वगीतंप्रत्ये
कंदेवसंसत्स्वपितवभगवन्नर्तितद्योवधूषु ॥ ३५ ॥ सानुक्रोशैरजस्त्रंजनिमृतिनिरयाद्यूर्मिमालावि
लेस्मिन्संसाराब्धौनिमग्नांछरणमशरणानिछतोवीक्ष्यजंतून् ॥ युष्माभिःप्रार्थितःसन्जलनिधिश

SGDF
Sri Gargeshwari Digital Foundation

यनःसत्यवत्यांमहर्षेर्व्यक्तश्चिन्मात्रमूर्तिर्नखलुभगवतःप्राकृतोजातुदेहः ॥ ३६ ॥ अस्तव्यस्तंस
मस्तश्रुतिगतमधमैरत्नपूगंयथार्धैरर्थंलोकोपक्लप्त्यैगुणगणनिलयःसूत्रयामासकृत्स्नं ॥ योसौ
व्यासाभिधानस्तमहमहरहर्भक्तितस्त्वत्प्रसादात्सद्योविद्योपलब्ध्यैगुरुतममगुरुंदेवदेवंनमामि ३७
आज्ञामन्यैरधार्यांशिरसिपरिसरद्रश्मिकोटीरकोटौ कृष्णस्याक्लिष्टकर्मादधदनुसरणादर्थितोदेवसं
घैः ॥ भूमावागत्यभूमन्नसुकरमकरोर्ब्रह्मसूत्रस्यभाष्यं दुर्भाष्यंव्यस्यदस्योर्मणिमतउदितंवेदसद्यु
क्तिभिस्त्वं ॥३८॥ भूत्वाक्षेत्रेविशुद्धेद्विजगणनिलये रौप्यपीठाभिधानेतत्रापिब्रह्मजातिस्त्रिभुव
नविशदेमध्यगेहाख्यगेहे ॥ पारिव्राज्याधिराजःपुनरपिबदरींप्राप्यकृष्णंचनत्वाकृत्वाभाष्याणिस
म्यग्व्यतनुतचभवान्भारतार्थप्रकाशं ॥३९॥ वंदेतंत्वासुपूर्णप्रमतिमनुदिनासेवितंदेववृंदैर्वंदेवंदा
रुमीशेश्रियउतनियतंश्रीमदानंदतीर्थं ॥ वंदेमंदाकिनीसत्सरिदमलजलासेकसाधिक्यसंगंवंदेहं
देवभक्त्याभवभयदहनं सज्जनान्मोदयंतं ॥ ४० ॥ सुब्रह्मण्याख्यसूरेःसुतइतिसुभृशंकेशवानं
दतीर्थश्रीमत्पादाब्जभक्तःस्तुतिमकृतहरेर्वायुदेवस्यचास्य ॥ तत्पादार्चादरेणग्रथितपदलसन्मा
लयात्वेतयाये संराध्यामूनमंतिप्रततमतिगुणामुक्तिमेतेव्रजंति ॥ ४१ ॥ पांतवस्मान्पुरु० ॥२॥

SGDF
Sri Gargeshwari Digital Foundation

आ० वायुर्भीमोभीमनादोमहौजाःसर्वेषांचप्राणिनांप्राणभृतः ॥ अनावृत्तिर्देहिनांदेहपातेतस्माद्वायुर्दे ५०
३१ वदेवोविशिष्टः ॥ १॥ प्रथमोहनुमान्नामद्वितीयोभीमएवच ॥ पूर्णप्रज्ञस्तृतीयस्तुभगवत्कार्यसाध
कः॥२॥ब्रह्मांताग्गुरुवःसाक्षादिष्टंदैवंश्रियःपतिः ॥आचार्याःश्रीमदाचार्याःसंतुमेजन्मजन्मनि॥३
॥ अथ ब्रह्मयज्ञः ॥ ॥ केशव २४ प्रणव० वस्वरोम् ॥ पूर्वो० श्रीविष्णुप्रेरणया श्रीविष्णु
प्रीत्यर्थं देवर्ष्याचार्यपितृतुष्टयर्थंब्रह्मयज्ञेनयक्ष्ये ॥ विद्युदसिविद्यमेपाप्मानमृतात्सत्यमुपैमि ॥
अपउपस्पृश्य ॥ गायत्र्यागाथिनोविश्वामित्रःसवितागायत्री अग्निमीळइत्याद्यानांछंदसांमधुश्छं
दादयऋषयः अग्न्यादयोदेवताः गायत्र्यादीनिछंदांसि पच्छोर्धर्चशोऋक्शःकरिष्ये ॥ ॐ भू
र्भुवस्वः ॐ तत्सवितुर्वरेण्यं॥ भर्गोदेवस्यधीमहि॥ धियोयोनः प्रचोदयात्॥ॐ तत्सवितुर्वरेण्यं
भर्गोदेवस्यधीमहि ॥ धियोयोनः प्रचोदयात् ॥ ॐ तत्सवितुर्वरेण्यंभर्गोदेवस्यधीमहिधियोयो
नःप्रचोदयात् ॥ अग्निमीळेपुरोहितंयज्ञस्यदेवमृत्विजं ॥ होतारंरत्नधातमं ॥ अग्निःपूर्वेभिर्ऋषिभि ३१
रीड्योनूतनैरुत ॥ सदेवांएहवक्षति ॥ अग्निनारयिमश्नवत्पोषमेवदिवेदिवे॥यशसंवीरवत्तमं ॥अ
ग्नेयंयज्ञमध्वरं विश्वतःपरिभूरसि ॥ सइद्देवेषुगच्छति॥ अग्निर्होताकविक्रतुः सत्यश्चित्रश्रवस्तमः॥

देवोदेवेभिरागमत् ॥ १ ॥ यदंगदाशुषेत्वमग्नेभद्रंकरिष्यसि ॥ तवेत्तत्सत्यमंगिरः ॥ उपत्वाग्ने
दिवेदिवेदोषावस्तर्धियावयं ॥ नमोभरंतएमसि ॥ राजंतमध्वराणांगोपामृतस्यदीदिविं ॥ वर्ध
मानंस्वेदमे ॥ सनःपितेवसूनवेग्नेसूपायनोभव ॥ सचस्वानःस्वस्तये ॥ २ ॥ वायवायाहिदर्श
त ॥ अग्निर्वैदेवानामवमोविष्णुःपरमः अथ महाव्रतं एषपंथाएतत्कर्म अथातःसंहितायाउपनि
षत् विदामघवन्विदा महाव्रतस्यपंचविंशतिंसामिधेन्यः इषेत्वोर्जेत्वा अग्नआयाहिवीतये शं
नोदेवीरभिष्टये अथैतस्यसमाम्नायस्य समाम्नायः समाम्नातः मयरसतजभनलगसंमितं गौः
ग्मा ज्मा क्ष्मा पंचसंवत्सरमयं अथशिक्षांप्रवक्ष्यामि वृद्धिरादैच् योगीश्वरंयाज्ञवल्क्यं नारायणं
नमस्कृत्य अथातोधर्मंव्याख्यास्यामः ॐ अथातोधर्मजिज्ञासा ॐ अथातोब्रह्मजिज्ञासा जन्मा
द्यस्ययतोन्वयादितरतश्चार्थेष्वभिज्ञः स्वराट्तेनेब्रह्महृदाय आदिकवयेमुह्यंतियंसूरयः॥ तेजोवा
रिमृदांयथाविनिमयोयत्रत्रिसर्गोमृषाधाम्नास्वेनसदानिरस्तकुहकंसत्यंपरंधीमहि ॥ नारायणं
सुरगुरुंजगदेकनाथं भक्तप्रियंसकललोकनमस्कृतंच ॥ त्रैगुण्यवर्जितमजंविभुमाद्यमीशं वंदेभव
घ्नममरासुरसिद्धवंद्यं ॥ अशोच्यानन्वशोचस्त्वंप्रज्ञावादांश्चभाषसे ॥ गतासूनगतासूंश्चनानुशोचं

64

आ० तिपंडिताः ॥ नारायणंगुणैःसर्वैरुदीर्णदोषवर्जितं ॥ ज्ञेयंगम्यंगुरूंश्चापिनत्वासूत्रार्थउच्यते ॥ प०
३२ ॐ तछंयोरावृणीमहे गातुंयज्ञायगातुंयज्ञपतयेदैवीस्वतिरंस्तुनः॥स्वस्तिर्मानुषेभ्यः ॥ ऊर्ध्वंजिगा
तुभेषजं शंनोअस्तुद्विपदेशंचतुष्पदे ॥ ॐ नमोब्रह्मणेनमोअस्त्वग्नयेनमः पृथिव्यैनमओषधी
भ्यः ॥ नमोवाचेनमोवाचस्पतयेनमोविष्णवेमहतेकरोमि ॥ ३ ॥ ॐ शांतिः शांतिः शांतिः ॥
वृष्टिरसिवृश्चमेपाप्मानमृतात्सत्यमुपागां अपउपस्पृश्य ॥ अथ देवतास्तर्पयाति १ अग्निस्तृप्यतु
२ विष्णुस्तृप्यतु ३ प्रजापतिस्तृप्यतु ४ ब्रह्मातृप्यतु ५ वेदास्तृप्यंतु ६ देवास्तृप्यंतु ७ ऋष
यस्तृप्यंतु ८ सर्वाणिछंदांसितृप्यंतु ९ ॐ कारस्तृप्यतु १० वषट्कारस्तृप्यतु ११ व्याहृतयस्तृ
प्यंतु १२ सावित्रीतृप्यतु १३ यज्ञास्तृप्यंतु १४ द्यावापृथिवीतृप्येतां १५ अंतरिक्षंतृप्यतु १६
अहोरात्राणितृप्यंतु १७ सांख्यास्तृप्यंतु १८ सिद्धास्तृप्यंतु १९ समुद्रास्तृप्यंतु २० नद्यस्तृप्यं
तु २१ गिरयस्तृप्यंतु २२ क्षेत्रौषधिवनस्पति गंधर्वाप्सरसस्तृप्यंतु २३ नागास्तृप्यंतु २४ व ३२
यांसितृप्यंतु २५ गावस्तृप्यंतु २६ साध्यास्तृप्यंतु २७ विप्रास्तृप्यंतु २८ यक्षास्तृप्यंतु २९
रक्षांसितृप्यंतु ३० भूतानितृप्यंतु ३१ एवमंतानितृप्यंतु ० एकोनत्रिंशन्मंत्रैः देवतीर्थेन एकै

SGDF
Sri Gargeshwari Digital Foundation

कमंजलिंदद्यात्। अथऋषयः। निवीति शतर्चिनस्तृप्यंतु माध्यमास्तृप्यंतु गृत्समदस्तृप्यतु विश्वामित्रस्तृप्यतु वामदेवस्तृप्यतु अत्रिस्तृप्यतु भरद्वाजस्तृप्यतु वसिष्ठस्तृप्यतु प्रगाथास्तृप्यंतु पावमान्यस्तृप्यंतु क्षूद्रसूक्तास्तृप्यंतु १२ महासूक्तास्तृप्यंतु॥ १ ॐ सनकस्तृप्यतु २ सनंदनस्तृप्यतु ३ सनातनस्तृप्यतु ४ सनत्कुमारस्तृप्यतु १ आसुरस्तृप्यतु २ वोळ्हस्तृप्यतु ३ कपिलस्तृप्यतु ४ पंचशिखस्तृप्यतु इति एकोनविंशतिमंत्रैः द्वौद्वौ अंजलीदद्यात् प्राचीनावीति सुमंतुजैमिनिवैशंपायनपैलसूत्रभाष्यभारतमहाभारतधर्माचार्यास्तृप्यंतु २ जानंतिबाहविगार्ग्यगौतमशाकल्यबाभ्रव्यमांडव्यमांडूकेयास्तृप्यंतु ३ गर्गीवाचक्नवीतृप्यतां ४ वडवाप्रातीथेयी तृप्यतां ५ सुलभामैत्रेयीतृप्यतां ६ कहोलंतर्पयामि ७ कौषीतकंतर्पयामि ८ महाकौषीतकंतर्पयामि ९ भरद्वाजंतर्पयामि १० पैंग्यंतर्पयामि ११ महापैंग्यंतर्पयामि १२ सुयज्ञंतर्पयामि १३ सांख्यायनंतर्पयामि १४ ऐतरेयंतर्पयामि १५ महैतरेयंतर्पयामि १६ शाकलंतर्पयामि १७ बाष्कलंतर्पयामि १८ सुजातवक्त्रंतर्पयामि १९ औदवाहिंतर्पयामि २० महौदवाहिंतर्पयामि २१ सौजामिंतर्पयामि २२ शौनकंतर्पयामि २३ आश्वलायनंतर्पयामि २४ येचान्ये

SGDF
Sri Gurgeshwari Digital Foundation

आ० आचार्याः तेसर्वेतृप्यंतुतृप्यंतु इतिपितृतीर्थेनत्रीन्त्रिनंजलीन्दद्यात् इत्याचार्यतर्पणं ॥ ॥ प०
३३ अथ पितृतर्पणम् ॥ ॥ तातांबात्रितयंसपत्नजननी मातामहादित्रयं सस्त्रिस्त्रीतनया
दितातजननी स्वभ्रातरःसस्त्रियः ॥ तातांबात्मभगिन्यपत्यधवयुक्जायापितासद्गुरुः शिष्या
प्ताः कथितामहालयविधौतीर्थेतथातर्पणे ॥ अस्मत्पितरं वासुदेवशर्माणं वसिष्ठगोत्रंवस्वंतर्गतमु
ख्यप्राणांतर्गत प्रद्युम्नं स्वधानमस्तर्पयामि ३ पितामहं रुद्रांतर्गत मु० संकर्षणंस्व० ३ प्रपि
तामहं आदित्यांतर्गत मु० वासुदेवंस्व० ३ अग्रेप्येवमेव एकैकमंजलिंदेवाद्यौद्वौतुऋषयस्तथा
अर्हंतिपितरस्त्रींस्त्रीन्स्त्रियश्चैकैकमंजलिमिति ॥ आब्रह्मस्तंबपर्यंतंदेवर्षिपितृमानवाः ॥ तृप्यंतु
पितरः सर्वेमातृमातामहादयः ॥ अतीतकुलकोटीनांसप्तद्वीपनिवासिनां ॥ आब्रह्मभवनाल्लो
काइदमस्तुतिलोदकं ॥ येकेचास्मत्कुलेजाताअपुत्रागोत्रिणोमृताः ॥ तेगृह्णंतुमयादत्तंसूत्रनिष्पी
डनोदकं ॥ यस्यस्मृत्या० ॥ अनेनब्रह्मयज्ञांगदेवर्ष्याचार्यपितृतर्पणेनभगवान्श्रीमज्जनार्दन ३३
वासुदेवात्मकश्रीनृसिंहःप्रीयतां प्रीतोभवतु श्रीकृष्णार्पणमस्तु ॥ केशव २४ ॥ ॥ ॥
तातात्रियंपिता १ पितामहः २ प्रपितामहः ३ अंबात्रितयं। माता १ पितामही २ प्रपिताम

ही ३ सपत्नजननी १ मातामहः १ मातुःपितामहः २ मातुःप्रपितामहः ३ मातामही १ मा
तुःपितामही २ मातुःप्रपितामही ३ आत्मपत्नी १ तनयःसपत्नीकः १ पितृव्यःसपत्नीकः
१ मातुलः सपत्नीकः १ भ्राता सपत्नीकः १ पितृभगिनी सभर्तृकासपुत्रका १ मातृभागि
नी सभर्तृ० १ आत्मभागिनी सभ० १ श्वशुरः १ सद्गुरुः १ शिष्याः १ आप्ताः १ एवंतर्पणं॥
॥ अथ यजुर्वेदिनांब्रह्मयज्ञः ॥ ॥ आचम्य । प्रणवस्य० ब्रह्मभूर्भुवःस्वरों० ॥ श्रीगोविंद
गोविंद श्रीमद्भगवतो० श्रीविष्णुप्रीत्यर्थंदेवर्षिपितृतुष्ट्यर्थंब्रह्मयज्ञेनयक्ष्ये ॥ विद्युदसिविद्युमे ।
पाप्मानमृतात्सत्यमुपैमि । हस्तावनिज्य । त्रिराचामेत । द्विःपरिमृज्य । सकृदुपस्पृश्य ।
यत्सव्यंपाणिंपादौप्रोक्षंतिशिरश्चक्षुषीनासिकेश्रोत्रेहृदयमालभ्य । देवसवितुःप्रसुव । ॐ ऋचो
अक्षरेपरमेव्योमन्यस्मिन्देवा अधिविश्वेनिषेदुः । यस्तन्नवेदकिमृचाकरिष्यतियइत्तद्विदुस्तइमे
समासते । त्रिः ३ । ॐ भूः तत्सवितुर्वरेण्यं । ॐ भुवः भर्गोदेवस्यधीमहि । ॐ सुवः धि
योयोनः प्रचोदयात् । ॐ भूर्भुवः तत्सवितुर्वरेण्यं भर्गोदेवस्यधीमहि । ॐ सुवः धियोयोनः
प्रचोदयात् । ॐ भूर्भुवःसुवः तत्सवितुर्वरेण्यं भर्गोदेवस्यधीमहि धियोयोनःप्रचोदयात् । इषे

SGDF
Sri Gurgeshwari Digital Foundation

आ०
३८

त्वोर्जेत्वावायवस्थोपायवस्थदेवोवः सविताप्रार्पयतुश्रेष्ठतमायकर्मणआप्यायध्वमघ्नियादेवभागमू
र्जस्वतीः पयस्वतीः प्रजावतीरनमीवाअयक्ष्मामावस्तेनईशतमाघशꣳ सोरुद्रस्यहेतिः परिवोवृण
क्तुध्रुवाअस्मिन्गोपतौस्यातबह्वीर्यजमानस्यपशून्पाहि ॥ ब्रह्मसंधत्तंतन्मेजिन्वतं । क्षत्रꣳसंध
त्तंतन्मेजिन्वतं । इषꣳ संधत्तंतांमेजिन्वतं । ऊर्जꣳ संधत्तंतांमेजिन्वतं । रयिꣳ संधत्तंतांमेजिन्वतं
पुष्टिꣳ संधत्तंतांमेजिन्वतं । प्रजाꣳसंधत्तंतांमेजिन्वतं । पशूꣳसंधत्तंतांमेजिन्वतं । स्तुतोसिजन
धाः ॥ देवास्त्वाशुक्रपाः प्रणयंतु । सुवीराः प्रजाः प्रजनयन्परीहि । भद्रंकर्णेभिः शृणुयामदेवाः ॥
भद्रंपश्येमाक्षभिर्यजत्राः । स्थिरैरंगैस्तुष्टुवाꣳ संस्तनूभिर्व्यशेमदेवहितंयदायुः । स्वस्तिदाविश
स्पतिर्वृत्रहाविमृधोवशी । वृषेंद्रः पुरएतुनः सोमपाअभयंकरः । अग्निमीळेपुरोहितंयज्ञस्यदेवमृत्वि
जं । होतारंरत्नधातमं । अग्नआयाहिवीतये । गृणानोहव्यदातये । निहोतासत्सिबर्हिषि ।
शन्नोदेवीरभिष्टयेआपोभवंतुपीतये । शंयोरभिस्रवंतुनः । अथशिक्षांप्रवक्ष्यामि । मयरसतजभ
नलगसंमितं । गौः ग्मा ज्मा क्ष्मा पंचसंवत्सरमयं । समाम्नायः समाम्नातः । योगीश्वरंयाज्ञवल्क्यं ।
नारायणंनमस्कृत्य । अथातोब्रह्मजिज्ञासा । अथातोधर्मजिज्ञासा । अथातोदर्शपूर्णमासौव्याख्यास्या

प०
३४

SGDF
Sri Gurgeshwari Digital Foundation

मः।वृद्धिरादैच।नमोब्रह्मणेनमोस्त्वग्नयेनमः पृथिव्यैनमओषधीभ्यः।नमोवाचेनमोवाचस्पतयेनमो
विष्णवेबृहतेकरोमि ।सचाꣳ शिक्यःपूरोवाचौपनिषदिंद्रोज्येष्ठइंद्रियायऋषिभ्योनमोदेवेभ्यः स्व
धापितृभ्योभूर्भुवः सुवः छंदः । ॐ ऋतंतपः सत्यंतपः श्रुतंतपः शातंतपोदमस्तपः शमस्तपो
दानंतपोयज्ञंतपोभूर्भुवःसुवर्ब्रह्मैतदुपास्यैतत्तपः । यथावृक्षस्यसंपुष्पितस्यदूराद्गंधोवात्येवंपुण्य
स्यकर्मणोदूराद्गंधोवातियथासिधारांकर्त्तेवहितामवक्रामेयद्युवेयुवेहवाविह्वयिष्यामि कर्त्तंपाति
ष्यामीत्येवममृतादात्मानं जुगुप्सेत् । वृष्टिरसिवृश्चिमेपाप्मानमृतात्सत्यमुपागां । शातिःशां
तिःशांतिः । ब्रह्मादयोदेवाः । तांदेवाꣳ स्तर्पयामि । सर्वांदेवाꣳ स्त० । सर्वांदेवगणाꣳ स्त०।
सर्वादेवापत्नी स्त० । सर्वांदेवपुत्राꣳ स्त० । सर्वांदेवपौत्राꣳ स्त० । भूर्देवाꣳ स्त० । भुवर्दे
वा२ स्त० । सुवर्देवाꣳ स्त० । भूर्भुवःसुवर्देवाꣳ स्त० । निवीति । कृष्णद्वैपायनादयोयेऋष
यः । तानृषीꣳ स्त० । सर्वानृषीꣳ स्त० । सर्वानृषिगणाꣳ स्त० । सर्वाऋषिपत्नीस्त० ।
सर्वानृषिपुत्राꣳ स्त० । सर्वानृषिपौत्राꣳ स्त० । भूऋषीꣳ स्त० । भुवऋषीꣳ स्त० । सुव
ऋषीꣳ स्त० । भूर्भुवःसुवऋषी२ स्त० । अपसव्य । सोमःपितृमानग्निकव्यवाहनादयोयेपित

SGDF
Sri Gangeshwari Digital Foundation

आ० रः । तान्पितॄ२ स्त० । सर्वान्पितॄ२ स्त० । सर्वान्पितृगणा२ स्त० । सर्वाःपितृपत्नीस्तर्प प०
३५ यामि । सर्वान्पितृपुत्रा२ स्त० । सर्वान्पितृपौत्रा२ स्त० । भूःपितॄ२ स्त० । भुवःपितॄ२
स्त० । सुवःपितॄ२ स्त० । भूर्भुवःसुवःपितॄ२ स्त० ॥ ॥ अथ पितृतर्पणक्रमः ॥ आदौपि
तातथामातासापत्नीजननीतथा । मातामहाःसपत्नीकाआत्मपत्नीतथैवच । सुतभ्रातृपितृ
व्याश्चमातुलाःसहभार्यकाः । दुहिताभगिनीचैवदौहित्रोभागिनेयकः । पितृष्वसामातृष्वसाश्च
रोगुरुबांधवाः । एतेमहालयेतीर्थेतर्पणेचैवदेवताः ॥ अस्मत्पितरं वासुदेशर्माणं वशिष्ठगोत्रं व
स्वंतर्गतमुख्यप्राणांतर्गतप्रद्युम्नं स्वधानमस्तर्पयामि३ पितामहं रुद्रांतर्गतमु० संकर्षणं स्व० ३
प्रपितामहं आदित्यांतर्गतमु० वासुदेवं स्व० ३ अग्रेप्यनेनक्रमेणनामगोत्ररूपोच्चारणपूर्वकं
समस्तपितॄंस्तर्पयेत् । एकैकमंजलिंदेवाद्वौद्वौतुऋषयस्तथा ॥ अर्हंतिपितरस्त्रींस्त्रीन्स्त्रियश्चैकैक
मंजलिमिति ॥ ३ ॥ आब्रह्मस्तंबपर्यंतंदेवर्षिपितृमानवाः तृप्यंतुपितरःसर्वेमातृमातामहादयः
अतीतकुलकोटीनांसप्तद्वीपनिवासिनां । आब्रह्मभवनाल्लोकाइदमस्तुतिलोदकं । येकेचास्म ३५
त्कुलेजाताअपुत्रागोत्रिणोमृताः । तेतृप्यंतुमयादत्तंवस्त्रनिष्पीडनोदकं । यस्यस्मृत्या० । अने

नदेवऋषिपितृतर्पणेन भगवान्श्रीमज्जनार्दनवासुदेवःप्रीयतांप्रीतोभवतु । श्रीकृष्णार्पणमस्तु॥
इति यजुर्वेदिनां ब्रह्मयज्ञः ॥ ॥ श्रीगुरुभ्योनमः ॥ ॥ ततः टीकाकृत्पादगुरोर
भिषेकंकृत्वा ॥ राघवेंद्रगुरूनभिषेचयेत् ॥ ॥ अथ राघवेंद्रस्तोत्रं ॥ श्रीपूर्णबोधगुरुतीर्थपयो
ब्धिपाराकामारिमाक्षविषमाक्षशिरःस्पृशंती ॥ पूर्वोत्तरामिततरंगचरत्सुहंसा देवालिसेवितपरां
घ्रिपयोजलग्ना ॥ १ ॥ जीवेशभेदगुणपूर्तिजगत्सुसत्वा नीचोच्चभावसुखनक्रगणैःसमेता ॥ दु
र्वाद्यजापतिगिलैर्गुरुराघवेंद्र वाग्देवतासरिदमुंविमलीकरोतु ॥ २ ॥ श्रीराघवेंद्रस्सकलप्रदाता
स्वपादकंजद्वयभक्तिमद्भ्यः ॥ अघाद्रिसंभेदनदृष्टिवज्रः क्षमासुरेंद्रोवतुमांसदायं ॥ ३ ॥ श्रीराघ
वेंद्रोहरिपादकंज निषेवणाल्लब्धसमस्तसंपत ॥ देवस्वभावोदिविजद्रुमोयमिष्टप्रदोमेसततंसभू
यात् ॥ ४ ॥ भव्यस्वरूपोभवदुःखतूल संघाग्निचर्यःसुखधैर्यशाली ॥ समस्तदुष्टग्रहनिग्रहेशो
दुरत्ययोपप्लवसिंधुसेतुः ॥ ५ ॥ निरस्तदोषोनिरवद्यवेषः प्रत्यर्थिमूकत्वनिदानभाषः ॥ विद्वत्प
रिज्ञेयमहाविशेषो वाग्वैखरीनिर्जितभव्यशेषः ॥ ६ ॥ संतानसंपत्परिशुद्धभक्ति विज्ञानवाग्दे
हसुपाटवादीन् ॥ दत्वाशरीरोत्थसमस्तदोषान्हत्वासनोव्याद्गुरुराघवेंद्रः ॥७॥ यत्पादोदकसंच

SGDF Foundation

यस्सुरनदीमुख्यापगासादिता संख्यानुत्तमपुण्यसंघविलसत्प्रख्यातपुण्यावहः ॥ दुस्तापत्रयना
शनोभुविमहावंध्यासुपुत्रप्रदो व्यंगस्वंगसमृद्धिदोग्रहमहापापापहस्तंश्रये ॥ ८ ॥ यत्पादकं
जरजसापरिभूषितांगा यत्पादपद्ममधुपायितमानसाये ॥ यत्पादपद्मपरिकीर्तनजीर्णवाच स्त
द्दर्शनंदुरितकाननदावभूतं ॥ ९ ॥ सर्वतंत्रःस्वतंत्रोसौ श्रीमध्वमतवर्धनः ॥ विजयींद्रकराब्जो
त्थ सुधींद्रवरपुत्रकः ॥ १० ॥ श्रीराघवेंद्रोयतिराड्गुरुर्मेस्याद्भयापहः ॥ ज्ञानभक्तिसुपुत्रायुर्यश
श्रीपुण्यवर्धनः ॥ ११ ॥ प्रतिवादिजयस्वांत भेदचिन्हादरोगुरुः ॥ सर्वविद्याप्रवीणोन्यो राघ
वेंद्रान्नविद्यते ॥ १२ ॥ अपरोक्षीकृतश्रीशः समुपेक्षितभावजः ॥ अपेक्षितप्रदातान्योराघवेंद्रा
न्नविद्यते ॥ १३ ॥ दयादाक्षिण्यवैराग्य वाक्पाटवमुखांकितः ॥ शापानुग्रहशक्तोन्यो राघवेंद्रा
न्नविद्यते ॥ १४ ॥ अज्ञानविस्मृतिभ्रांतिसंशयापस्मृतिक्षयाः ॥ तंद्रीकंपवचःकौंठ्यमुखायेचेंद्रि
योद्भवाः ॥ १५ ॥ दोषास्तेनाशमायांति राघवेंद्रप्रसादतः ॥ ॐ श्रीराघवेंद्रायनमइत्यष्टाक्षरमं
त्रतः ॥ जपिताद्भावितान्नित्यमिष्टार्थास्युर्नसंशयः ॥ १६ ॥ हंतुनः कायजान्दोषानात्मात्मी
यसमुद्भवान् ॥ सर्वानपिपुमर्थांश्च ददातुगुरुरात्मवित् ॥ १७ ॥ इतिकालत्रयेनित्यं प्रार्थनीयः

SGDF Sri Gurgeshwari Digital Foundation

73

करोतिसः ॥ इहामुत्राप्तसर्वेष्टो मोदतेनात्रसंशयः ॥ १८ ॥ अगम्यमहिमालोके राघवेंद्रो महायशाः ॥ श्रीमध्वमतदुग्धाब्धि चंद्रोवतुसदानघः ॥ १९ ॥ सर्वयात्राफलावाप्त्यै यथा शक्तिप्रदक्षिणं ॥ करोमितववसित्थस्य वृंदावनगतंजलं ॥ शिरसाधारयाम्यद्य सर्वतीर्थफ लाप्तये ॥ २० ॥ सर्वाभीष्टार्थसिध्यर्थं नमस्कारंकरोम्यहं ॥ तवसंकीर्तनंवेदशास्त्रार्थज्ञान सिद्धये ॥ २१ ॥ संसारेक्षयसागरेप्रकृतितोगाधेसदादुःस्तरे सर्वावद्यजलग्रहैरनुपमैःकामादि भंगाकुले ॥ नानाविभ्रमदुर्भ्रमेमितभयस्तोमादिफेनोत्कटे दुःखोत्कृष्टविषेसमुद्धरगुरोमामंमग्न रूपंसदा ॥ २२ ॥ राघवेंद्रगुरुस्तोत्रं यःपठेद्भक्तिपूर्वकं ॥ तस्यकुष्ठादिरोगाणां निवृत्तिस्त्वरया भवेत् ॥ २३ ॥ अंधोपिदिव्यदृष्टिःस्यादेडमूकोपिवाक्पतिः ॥ पूर्णायुःपूर्णसंपत्तिःस्तोत्रस्या स्यजपाद्भवेत् ॥ २४ ॥ यःपिबेज्जलमेतेन स्तोत्रेणैवाभिमंत्रितं ॥ तस्यकुक्षिगतादोषाः सर्वे नश्यंतितत्क्षणात् ॥ २५ ॥ यद्वृंदावनमासाद्यपंगुःखंजोपिवाजनः ॥ स्तोत्रेणानेनयःकुर्यात् प्रदक्षिणनमस्कृती ॥ सजंघालोभवेदेव गुरुराजप्रसादतः ॥ २६ ॥ सोमसूर्योपरागेच पुष्या र्कादिसमागमे ॥ योनुत्तममिदंस्तोत्र मष्टोत्तरशतंजपेत् ॥ भूतप्रेतपिशाचादि पीडातस्यनजा

SGDF
Sri Gangeshwari Digital Foundation

आ० यते ॥ २७ ॥ एतत्स्तोत्रंसमुच्चार्य गुरोर्वृंदावनांतिके ॥ दीपसंयोजनाज्ज्ञानं पुत्रलाभोभवे प०
३७ त्ध्रुवं ॥ २८ ॥ परवादिजयोदिव्य ज्ञानभक्त्यादिवर्धनं ॥ सर्वाभीष्टप्रवृद्धिःस्या न्नात्रकार्याविचारणा
चारणा ॥ २९ राजचोरमहाव्याघ्र सर्पनक्रादिपीडनं ॥ नजायतेस्यस्तोत्रस्य प्रभावान्नात्र
संशयः ॥ ३० ॥ योभक्त्यागुरुराघवेंद्रचरणद्वंद्वंस्मरन्यःपठेत्स्तोत्रंदिव्यमिदंसदानाहिभवेत्तस्या
सुखंकिंचन ॥ किंत्विष्टार्थसमृद्धिरेवकमलानाथप्रासादोदया त्कीर्तिर्दिग्विदिताविभूतिरतुला
साक्षीहयास्योत्रहि ॥ ३१ ॥ इति श्रीराघवेंद्रार्य गुरुराजप्रसादतः ॥ कृतंस्तोत्रमिदंपुण्यं श्री
मद्भिर्ह्यप्पणाभिधैः ॥ ३२ ॥ पूज्यायराघवेंद्रायसत्यधर्मरतायच ॥ भजतांकल्पवृक्षायनमतांका
मधेनवे ॥ ३३ ॥ इतिराघवेंद्रस्तोत्रं ॥ ॥ अथ शांतिपूर्वकपाठप्रवचनं ॥
श्रीगुरुभ्योनमः ॥ ॐ शंनोमित्रःशंवरुणः ॥ शंनोभवत्वर्यमा ॥ शंनइंद्रोबृहस्पतिः शंनोवि
ष्णुरुरुक्रमः नमोब्रह्मणे । नमस्तेवायो । त्वमेवप्रत्यक्षंब्रह्मासि । त्वमेवप्रत्यक्षंब्रह्मवदिष्यामि ३७
ऋतंवदिष्यामि सत्यंवदिष्यामि तन्मामवतु तद्वक्तारमवतु अवतुमां । अवतुवक्तारं ॐ शांतिः
शांतिःशांतिः । सहनाववतु सहनौभुनक्तु सहवीर्यंकरवावहै तेजस्विनावधीतमस्तुमाविद्विषा

वहै ॐ शांतिः शांतिः शांतिः ॐ शुध्धानंदोरु संवि० नारायणं गुणैः सर्वै० ॐ ॐ अथा
तोब्रह्मजिज्ञासा ॐ इत्यादिप्रवचनंकृत्वापुनः श्रीगुरुभ्योनमः ॐ शंनोमित्रः० त्वमेवप्रत्य
क्षंब्रह्मावादिषं । ऋतमवादिषं । सत्यम वादिषं । तन्मामावीत् तद्वक्तारमावीत् । आवीन्मां ।
आवीद्वक्तारं ॐ शांतिः शांतिः शांतिः सहनाववत्वित्यादि०॥ शांतिः३ इत्युक्त्वासमापयेत्।
॥ अथोपनिषत् ॥ ॥ ॐ भृगुर्वैवारुणिः वरुणंपितरमुपससार अधीहिभगवोब्रह्मेति तस्मा
एतत्प्रोवाचअन्नंप्राणंचक्षुःश्रोत्रंमनोवाचमिति तꣳहोवाच यतोवाइमानिभूतानिजायंते येन
जातानिजीवंति यत्प्रयंत्यभिसंविशंति तद्विजिज्ञासस्व तद्ब्रह्मेति ॥ सतपोतप्यत सतपस्त
प्त्वा ॥ १ ॥ अन्नंब्रह्मेतिव्यजानात् अन्नाध्द्येवखल्विमानिभूतानिजायंते अन्नेनजातानिजीवं
ति अन्नंप्रयंत्यभिसंविशंतीति तद्विज्ञाय पुनरेववरुणंपितरमुपससार । अधीहिभगवोब्रह्मेति
तꣳहोवाच तपसाब्रह्मविजिज्ञासस्व तपोब्रह्मेति सतपोतप्यत सतपस्तप्त्वा ॥ २ ॥ प्राणोब्र
ह्मेतिव्यजानात् प्राणाध्द्येवखल्विमानिभूतानिजायंते प्राणेनजातानिजीवंति प्राणंप्रयंत्यभिसं
विशंतीति तद्विज्ञाय पुनरेववरुणंपितरमुपससार अधीहिभगवोब्रह्मेति तꣳहोवाच तपसाब्र

SGRF
Sri Gangadharan Digital Foundation

आ० ह्मविजिज्ञासस्व तपोब्रह्मेति सतपोतप्यत सतपस्तप्त्वा ॥ ३ ॥ मनोब्रह्मेतिव्यजानात् मन प०
३८ सोह्येवखल्विमानिभूतानिजायंते मनसाजातानिजीवंति मनःप्रयंत्यभिसंविशंतीति तद्विज्ञाय
पुनरेववरुणंपितरमुपससार अधीहिभगवोब्रह्मेति तꣳहोवाच तपसाब्रह्मविजिज्ञासस्व तपोब्र
ह्मेति सतपोतप्यत सतपस्तप्त्वा ॥ ४ ॥ विज्ञानंब्रह्मेतिव्यजानात् विज्ञानाद्ध्येवखल्विमानिभू
तानिजायंते विज्ञानेनजातानिजीवंति विज्ञानंप्रयंत्यभिसंविशंतीति तद्विज्ञाय पुनरेववरुणंपि
तरमुपससार अधीहिभगवोब्रह्मेति तꣳहोवाच तपसाब्रह्मविजिज्ञासस्व तपोब्रह्मेति सतपोत
प्यत सतपस्तप्त्वा ॥ ५ ॥ आनंदोब्रह्मेतिव्यजानात् आनंदाद्ध्येवखल्विमानिभूतानिजायंते
आनंदेनजातानिजीवंति आनंदंप्रयंत्यभिसंविशंतीति ॥ सैषाभार्गवीवारुणीविद्यापरमेव्योम
न्प्रतिष्ठित यएवंवेदप्रतितिष्ठति अन्नवानन्नादोभवति महान्भवतिप्रजयापशुभिर्ब्रह्मवर्चसेन
महान्कीर्त्या ॥ ६ ॥ अन्नंननिंद्यात्तद्व्रतं प्राणोवाअन्नं शरीरमन्नादं प्राणेशरीरंप्रतिष्ठितं शरीरे ३८
प्राणःप्रतिष्ठितः तदेतदन्नमन्नेप्रतिष्ठितं सयएतदन्नमन्नेप्रतिष्ठितंवेदप्रतितिष्ठतिअन्नवानन्नादोभ
वति महान्भवतिप्रजयापशुभिर्ब्रह्मवर्चसेन महान्कीर्त्या ॥७॥ अन्नंनपरिचक्षीत तद्व्रतं आपो

SGDF
Sri Gurgeshwari Digital Foundation

वाअन्नं ज्योतिरन्नादं अप्सुज्योतिः प्रतिष्ठितं ज्योतिष्यापः प्रतिष्ठिताः तदेतदन्नमन्नेप्रतिष्ठितं ॥
सयएतदन्नमन्नेप्रतिष्टितंवेदप्रतितिष्टति अन्नवानन्नादोभवतिमहान्भवतिप्रजयापशुभिर्ब्रह्मव
र्चसेन महान्कीर्त्या ॥ ८ ॥ अन्नंबहुकुर्वीत तद्व्रतं पृथिवीवाअन्नं आकाशोन्नादः पृथिव्यामा
काशःप्रतिष्ठितः आकाशेपृथिवीप्रतिष्ठिता तदेतदन्नमन्नेप्रतिष्ठितं सएतदन्नमन्नेप्रतिष्ठितंवेदप्रति
तिष्ठति अन्नवानन्नादोभवति महान्भवतिप्रजयापशुभिर्ब्रह्मवर्चसेन महान्कीर्त्या ॥ ९ ॥ नकं
चनवसतौप्रत्याचक्षीत तद्व्रतं तस्माद्यया कयाचविधयाबव्हन्नंप्राप्नुयात् अराध्यस्माअन्नमि
त्याचक्षते एतद्वैमुखतोन्नꣳराद्धं मुखतोस्माअन्नꣳराध्यते एतद्वैमध्यतोन्नꣳराद्धं मध्यतोस्माअ
न्नꣳराध्यते एतद्वाअंततोन्नꣳराद्धं अंततोस्माअन्नꣳराध्यते ॥ १० ॥ यएवंवेद क्षेमइतिवाचि
योगक्षेमइतिप्राणापानयोःकर्मेतिहस्तयोः गतिरितिपादयोः विमुक्तिरितिपायौ इतिमानुषीःस
माज्ञाः अथदैवीः तृप्तिरितिवृष्टौ बलमितिविद्युति यशइतिपशुषु ज्योतिरितिनक्षत्रेषु प्रजातिर
मृतमानंदइत्युपस्थे सर्वमित्याकाशे तत्प्रतिष्ठेत्युपासीत प्रतिष्ठावान्भवति तन्महइत्युपासीत
महान्भवति तन्मनइत्युपासीत मानवान्भवति तन्नमइत्युपासीत नम्यंतेस्मैकामाः तद्ब्रह्मेत्यु

SGDF
Sri Gargeshwari Digital Foundation

पासीत ब्रह्मवान्भवतितद्ब्रह्मणःपरिमरइत्युपासीत पर्येणंम्रियंतेद्विषंतःसपत्नाः परियेप्रियाभ्रा
तृव्याः सयश्चायंपुरुषे यश्चासावादित्ये सएकः सयंएवंवित् अस्माल्लोकात्प्रेत्य एतमन्नमयमा
त्मानमुपसंक्रम्य एतंप्राणमयमात्मानमुपसंक्रम्य एतंमनोमयमात्मानमुपसंक्रम्य एतंविज्ञान
मयमात्मानमुपसंक्रम्य एतमानंदमयमात्मानमुपसंक्रम्य इमाल्लोकान्कामान्नीकामरूप्यनुसंच
रन् एतत्सामगायन्नास्ते हा ३ वुहा३वुहा ३वु अहमन्नमहमन्नमहमन्नं अहमन्नादो ३ हमन्नादो
३ हमन्नादः अह ३ श्लोककृदह ३ श्लोककृदह ३ श्लोककृत् अहमस्यप्रथमजाऋतास्या । पूर्वं
देवेभ्यो अमृतस्यनाभाइ । योमाददातिसइदवमावाः अहमन्नमन्नमदंतमाद्मि अहंविश्वंभुवनम
भ्यभवां सुवर्णज्योतीः यएवंवेद इत्युपनिषत् सहनाववतु सहनौ भुनक्तु सहवीर्यं करवावहै
तेजस्विनावधीतमस्तुमाविद्विषावहै ॐ शांतिः शांतिः शांतिः ॥ संकल्पपूर्वकमान्हस्नानं
कार्यं ॥ ॥ अथ ऋग्वेदिनां माध्यान्हसंध्या ॥ ॥ प्रणवेनशिखामाबध्य ३९
दर्भद्वयात्मकपवित्रं धृत्वाआचम्य केशव २४ प्रणव० वस्वरोम् ॥ पूर्वो०श्रीविष्णुप्रीत्यर्थं
माध्यान्हसंध्यामुपासिष्ये॥ आपोहि० ज्ञनयथाचनः॥ इतिमार्जनं ॥आपःपुनंत्वित्यस्यमंत्रस्य

पूतऋषिः आपोदेवता अष्टीछंदः अपांप्राशने विनियोगः ॥ ॐ आपःपुनंतुपृथिवींपृथिवीपू
तापुनातुमां ॥ पुनंतुब्रह्मणस्पतिर्ब्रह्मपूतापुनातुमां ॥ यदुच्छिष्टमभोज्यंयद्वादुश्चरितंमम सर्वंपुनं
तुमामापोसतांचप्रतिग्रहं स्वाहा ॥ इतिप्राश्य ॥ केशव २४ आपोहि० यथाचनः ॥ शन्नो
दे० इतिपुनर्मार्जनं ॥ ऋतंच० मथोस्वः ॥ इति हस्तस्थोदकं नासाग्रसमीपंनीत्वा वामभागे
क्षितौबलात्क्षिपेत् । आचम्य ॥ केशव० २४ प्रणवस्यपरब्रह्म० वस्वरोम् ॥ पूर्वो० सवितृना
मकश्रीनारायणप्रीत्यर्थं माध्यान्हसंध्यांगार्घ्यप्रदानंकरिष्ये ॥ हंसइत्यस्यमंत्रस्य गौतमपुत्र
वामदेवऋषिः सूर्योदेवता जगतीछंदः माध्यान्हार्घ्यदानेविनियोगः ॥ ॐ हंसःशुचिषद्वसुरंत
रिक्षसद्धोतावेदिषदतिथिर्दुरोणसत् ॥ नृषद्वरसदृतसद्व्योमसदब्जागोजाऋतजाअद्रिजाऋतं॥१
आकृष्णेनांगिरसोहिरण्यस्तूपः सवितात्रिष्टुप् माध्यान्हार्घ्यदानेविनियोगः ॥ ॐ आकृष्णेनर
जसावर्तमानोनिवेशयन्नमृतंमर्त्यंच ॥ हिरण्ययेनसवितारथेनादेवोयातिभुवनानिपश्यन् ॥२॥
गायत्र्याविश्वामित्रःसवितागायत्री माध्यान्हार्घ्यदानेविनियोगः ॐ भूर्भुवस्व० ॥ ३ ॥
प्रतिच० उतायांतसंगवे प्रातरन्होमध्यंदिनउदितासूर्यस्य दिवानक्तमवसाशंतमेननेदा

SGDF
Shri Gurgaddi... Digital Foundation

आ० नींपीतिरश्विनाततान ॥ इति प्रादक्षिण्येनोपविश्य ॥ शुक्लकृष्णपक्षविवेचनेन केश प०
४० वादिदामोदरांतं संकर्षणादिकृष्णांतंवा तर्पणं कुर्यात् ॥ केशव २४ ॥ अथ सूर्यो
पस्थानं ॥ ऊर्ध्वबाहुरुपतिष्ठेत् ॥ उदुत्यामितित्रयोदशर्चस्यसूक्तस्य कण्वपुत्रःप्रस्कण्वऋषिः सूर्यो
देवता नवानांगायत्रीछंदः अंत्याश्चतस्रोनुष्टुभः ॥ चित्रंदेवानामिति षळर्चस्यसूक्तस्य अंगिरस
पुत्रकुत्सऋषिः सूर्योदेवतात्रिष्टुप्छंदः सूर्योपस्थानेविनियोगः ॥ ॐ उदुत्यंजातवेदसंदेवंवहं
तिकेतवः ॥ दृशेविश्वायसूर्यं ॥ अपत्येतायवोयथानक्षत्रायंत्यक्तुभिः ॥ सूरायविश्वचक्षसे ॥
अदृश्रमस्यकेतवोविरश्मयोजनांअनु ॥ भ्राजंतोअग्नयोयथा ॥ तरणिर्विश्वदर्शतो ज्योतिष्कृद
सिसूर्य ॥ विश्वमाभासिरोचनं ॥ प्रत्यङ्देवानांविशः प्रत्यङ्ङुदेषिमानुषान् ॥ प्रत्यङ्विश्वंस्वर्दृ
शे ॥ १ ॥ येनापावकचक्षसाभुरण्यंतंजनांअनु ॥ त्वंवरुणपश्यसि ॥ विद्यामेषिरजस्पृथ्वहामि
मानोअक्तुभिः ॥ पश्यंजन्मानिसूर्य ॥ सप्तत्वाहरितोरथेवहंतिदेवसूर्य ॥ शोचिष्केशंविचक्षण ॥ ४०
अयुक्तसप्तशुंध्युवःसूरोरथस्यनप्त्यः ॥ ताभिर्यातिस्वयुक्तिभिः ॥ उद्वयंतमसस्परिज्योतिष्पश्यंत
उत्तरं ॥ देवंदेवत्रासूर्यमगन्मज्योतिरुत्तमं ॥ उद्यंनद्यमित्रमहआरोहंनुत्तरांदिवं ॥ हृद्रोगंममसू

SGDF
Sri Gangeshwari Digital Foundation

र्येहरिमाणंचनाशय ॥ शुकेषुमेहरिमाणंरोपणाकासुदध्मसि ॥ अथोहारिद्रवेषुमेहरिमाणंनिद
ध्मसि ॥ उदगादयमादित्योविश्वेनसहसासह ॥ द्विषंतंमह्यंरंधयन्मोअहंद्विषतेरधं ॥ २ ॥ चित्रं
देवानामुदगादनीकंचक्षुर्मित्रस्यवरुणस्याग्नेः ॥ आप्राद्यावापृथिवीअंतरिक्षंसूर्यआत्माजगत
स्तस्थुषश्च ॥ सूर्यो देवीमुषसंरोचमानांमर्योनयोषामभ्येतिपश्चात् ॥ यत्रानरोदेवयंतोयुगानि
वितन्वतेप्रतिभद्रायभद्रं ॥ भद्राअश्वाहरितःसूर्यस्यचित्राएतग्वाअनुमाद्यासः ॥ नमस्यंतोदिव
आपृष्ठमस्थुःपरिद्यावापृथिवीयंतिसद्यः ॥ तत्सूर्यस्यदेवत्वंतन्महित्वंमध्याकर्त्तोर्विततंसंजभार ॥
यदेदयुक्तहरितःसधस्थादाद्रात्रीवासस्तनुतेसिमस्मै ॥ तन्मित्रस्यवरुणस्याभिचक्षेसूर्यो रूपंकृणु
तेद्योरुपस्थे ॥ अनंतमन्यद्रुशदस्यपाजःकृष्णमन्यद्धरितःसंभरंति ॥ अद्यादेवाउदितासूर्यस्यानि
रंहसःपिपृतानिरवद्यात् ॥ तन्नोमित्रोवरुणोमामहंतामादितिःसिंधुःपृथिवीउतद्यौः ॥ ३ ॥ सवि
तापश्चातात्सवितापुरस्तात्सवितोत्तरात्तात्सविताधरात्तात् ॥ सवितानःसुवतुसर्वतातिंसवितिता
नोरासतांदीर्घमायुः ॥ इत्युपस्थानं ॥ ॐ शांतिःशांतिःशांतिः ॥ सर्वारिष्टशांतिरस्त्वित्यादि
अभिवादयेइत्यंतमुक्त्वाअपसर्पंत्वित्यादिपठित्वा पूर्ववत्प्राणायामादिध्यानानंतरं श्वेतवर्णअग्नि

SGDF
Sri Gargeshwari Digital Foundation

आ० मुखेत्याद्युक्काजपजपोपसंहारौकृत्वायस्यस्मृत्येत्युक्कासमापयेत् ॥ केशव० २४ ॥ ॥ प०
४१ अथ यजुर्वेदिनांमाध्यान्हसंध्यावंदनं ॥ ॥ आचम्य । केशव० २४ प्रणवस्य० श्रीवि
ष्णुप्रेरणयाविष्णुप्रीत्यर्थंमाध्यान्हिकसंध्यामुपासिष्ये । आपोहि० चनः ० ॥ आपंःपुनंतुपृथि
वींपृथिवीपूतापुनातुमां । पुनंतुब्रह्मणस्पतिर्ब्रह्मपूतापुनातुमां ॥ यदुच्छिष्टमभोज्यंयद्वादुश्चरितंम
मं । सर्वंपुनंतुमामापोसतांचप्रतिग्रहःस्वाहा । आचमनं । केशव २४ ॥ दधिक्रावुण्णो०आ
पःशुंधंतुमैनंसः । आचम्य ॥ केशव० २४ ॥ ॐभूः । ॐभुवः० । श्रीविष्णुप्रेरणयाविष्णु
प्रीत्यर्थंमाध्यान्हिकसंध्याअर्घ्यप्रदानंकरिष्ये । हंसःशुचिषद्वसुरंतरिक्षसद्धोतावेदिषदतिथिर्दु
रोणसत् । नृषद्वरसदृतसद्व्योमसदब्जागोजाऋतजाअद्रिजाऋतंबृहत् १। ॐ भूर्भुवःसुवः२।
आचमनं । केशव० उपस्थानं । आसत्येनरजसावर्तमानोनिवेशयंनमृतंमर्त्यंच । हिरण्ययेन
सवितारथेनादेवोयातिभुवनानिपश्यंन् । उद्वयंतमसस्परिपश्यंतोज्योतिउत्तरं । देवंदेवत्रासूर्य
मगन्मज्योतिरुत्तमं । उदुत्यंजातवेदसंदेवंवहंतिकेतवः । दृशेविश्वायसूर्यं । चित्रंदेवानामुदगा ४१
दनीकंचक्षुर्मित्रस्यवरुणस्याग्नेः । आप्राद्यावापृथिवीअंतरिक्षंसूर्यआत्माजगतस्तस्थुषश्च । त

चक्षुर्देवहितंपुरस्ताच्छुक्रमुच्चरत । पश्येमशरदःशतं । जीवेमशरदःशतं । नंदामशरदःशतं । मो
दामशरदःशतं । भवामशरदःशतंशृणुवामशरदःशतं । प्रब्रवामशरदःशतं । अजितास्यामशर
दःशतं । ज्योकचसूर्यंदृशे । यउदगान्महतोर्णवाद्विभ्राजमानः । सरिरस्यमध्यात्समावृषभोलो
हिताक्षः । सूर्यो विपश्चन्मनसापुनातु । यस्मिंन्भूतंचभव्यंचसर्वेलोकाःसमाहिताः । तेनंगृण्हा
मित्वामहं । मह्यंगृण्हामित्वामहं । प्रजापतिनात्वामह्यंगृण्हाम्यसौ । संध्यायैनमः । सावित्र्यै
नमः। प्रातःसंध्यावत् ॐमित्येकाक्षरंब्रह्मेत्यारभ्यजपसमाप्तिपर्यंतंकृत्वा चतुःसागरपर्यंतंगोब्रा
ह्मणेभ्यइत्यादिअभिवादयेइत्यंतमुक्का यस्यस्मृत्येतिसमापयेत् ॥ आचमनं केशव २४॥ ॥
अथ पद्ममालोक्तप्रकारेण देवपूजा ॥ ॐ श्रियैनमः ॥ जयविजयादिसमस्तद्वारपालेभ्योनमः
ॐ वायवायाहिदर्शतेमेसोमाअरंकृताः ॥ तेषांपाहिश्रुधीहवं ॥ इतिकवाटमुद्घाट्य तालत्रयंकृ
त्वादेवगृहंप्रविशेत् ॥ ॐ अग्निनाग्निः समिध्यते कविर्गृहपतिर्युवा ॥ हव्यवाड्जुह्वास्यः ॥ इ
ति मंत्रेण दीपंप्रज्वाल्य ॥ ॐ वंदेविष्णुंनमामिश्रियमथचभुवंब्रह्मवायूचवंदे गायत्रींभारतींता
मपि गरुडमनंतंभजेरुद्रदेवं ॥ देवींवंदेसुपर्णीमहिपतिदयितांवारुणीमप्युमांतामिंद्रादीन्कामसु

SGDF ... Foundation

ख्यानपिसकलसुरांस्तद्गुरून्मद्गुरूंश्च ॥ इतिसर्वदेवान्नत्वा ॥ नास्तिनारायणसमंनभूतंनभवि
ष्यति ॥ एतेनसत्यवाक्येनसर्वार्थान्साधयाम्यहं ॥ अपराधसहस्राणि क्रियंतेहर्निशंमया ॥
तानिसर्वाणिमेदेवक्षमस्वपुरुषोत्तम ॥ इतिप्रार्थ्य ॥ ॐ अपैवाबीभत्संतमनुष्यगंधात्तएतेधाय्ये
अंतरदधत ॥ येभ्योमातेत्यस्यमंत्रस्यगयप्लात विश्वेदेवाजगती मनुष्यगंधनिबर्हणार्थेजपेविनि
योगः ॥ ॐ येभ्योमातामधुमत्पिन्वतेपयःपीयूषंद्यौरदितिरद्रिबर्हाः ॥ उक्थशुष्मान्वृषभरांत्स्व
प्नसस्तां आदित्याँअनुमदास्वस्तये ॥ एवापित्रइत्यस्य गृत्समदोबृहस्पतिस्त्रिष्टुप् अंतःपटनिर्ह
रणार्थेजपेविनियोगः ॥ ॐ एवापित्रेविश्वदेवायवृष्णेयज्ञैर्विधेमनमसाहविर्भिः ॥ बृहस्पतेसुप्रजा
वीरवंतोवयंस्यामपतयोरयीणां ॥ अथ ब्रह्मपारस्तोत्रं ॥ प्रचेतसचऊचुः ॥ ब्रह्मपारंमुने श्रोतु
मिछामः परमंस्तवं ॥ जपताकंडुनादेवोयेनाराध्यतकेशवः ॥ सोमउवाच ॥ पारंपरं विष्णुरनं
तपारःपरःपरेभ्यःपरमार्थरूपी ॥ सब्रह्मपारःपरपारभूतः परःपराणामपिपारपारः ॥ सकारणंकार
णतस्ततोपितस्यापिहेतुःपरहेतुहेतुः कार्येषुचैवंसहिकर्मकर्तारूपैरशेषैरवतीहसर्वं ॥ ब्रह्मप्रभुर्ब्रह्म
ससर्वभूतोब्रह्मप्रजानांपतिरच्युतोसौ ॥ ब्रह्माव्ययंनित्यमजंसविष्णुरपक्षयाद्यैरखिलैरसंगी ॥

SGDF Sri Gargeshwari Digital Foundation

85

ब्रह्माक्षरमजंनित्यंयथासौपुरुषोत्तमः ॥ तथारागादयोदोषाःप्रयांतुप्रशमंमम ॥ सोमउवाच ॥
यएतद्ब्रह्मपाराख्यंसंस्तवंपरमंजपन् ॥ अवापपरमांसिद्धिंससमाराध्यकेशवं ॥ आगमार्थंतुदेवा
नांगमनार्थंतुरक्षसां ॥ कुरुघंटारवंतत्र देवताव्हानलांछनं ॥ सर्ववाद्यमयीघंटा देवदेवस्यव
ल्लभा ॥ तस्मात्सर्वप्रयत्नेनघंटामावादयेत्ततः॥इतिघंटावादनं ॥ ॥ सालग्रामनिवासायक्षीरा
ब्धिशयनायच ॥ श्रीशैलाद्रिनिवासायाशिलावासायतेनमः ॥ अथमंटपध्यानं ॥ उत्तप्तोज्व
लकांचनेनरचितंतुंगांगरंगस्थलं शुद्धस्फाटिकभित्तिकाविलसितैःस्तंभैश्चहैमैःशुभैः ॥ मुक्ताजा
लविलंबिमंटपयुतंवज्रैश्चसोपानकैर्नानारत्नविभूषितैश्चसकलैरत्यंतशोभावहैः ॥ द्वारैश्चामररत्न
राजिखचितैःशोभावहैर्मंडितं रत्नाग्र्यैरपिशंखचक्रधवलैःप्रभ्राजितंस्वस्तिकैः ॥ माणिक्यो
ज्ज्वलदीपदीप्तिविलसल्लक्ष्मीविलासास्पदं ध्यायेन्मंटपमर्चनेषुसकलेष्वेवंविधंसाधकः ॥ संमा
र्जनैरंगवल्लीध्वजकेतनतोरणैः ॥ वितानैरिक्षुकदलीपूर्णकुंभांकुरादिभिः ॥ गीतवाद्यादिनृत्यै
श्चपुराणपठनादिभिः ॥ शोभमानंमहापुण्यंवर्धनंसुमनोहरं ॥ ततःभूतोच्चाटनासनदिग्बंधनां
तंकृत्वा ॥ अचम्यप्राणानायम्यदेशकालौसंकीर्त्य भगवतोवीर्येण भगवतोबलेन भगवतःक

SGDF
Sri Gargeshwari Digital Foundation

आ० र्मणा भगवतस्तेजसा भगवतावासुदेवेनप्रेरितोहं भगवतोवासुदेवस्य षोडशोपचारपूजांकरि प०
४३ ष्ये॥ततःकरशुद्धिंपापपुरुषशोषदाहंतत्वन्यासमातृकान्यासांश्चकृत्वा भगवत्पूजांगमूलमंत्रंजप्त्वा
देवंप्रार्थयेत् ॐ निषुसींदगणपतेगणेषुत्वामाहुर्विप्रतमंकवीनां ॥ नऋतेत्वक्रियतेकिंचनारे
महामर्कंमघवंचित्रमर्च ॥ आराध्यसेप्राणभृतांप्रणेत्राप्राणाधिनाथेनसमीरणेन ॥ नारायणज्ञान
सुखैकपूर्णस्वामिन्ममश्रीरमणप्रसीद ॥ बिंबोसिप्रतिबिंबोस्मितवयद्यपिचांतरं ॥ स्वामिन्निर्दो
षमद्दोषंविरेचयनमोस्तुते ॥ इतिप्रार्थ्य ॥ अथकलशपूजा ॥ ॥ भगवत्पूजांगत्वेनकलशार्च
नंकरिष्ये ॥ कुंभंचतुर्दिक्षुगंधाक्षतादिभिरलंकृत्य ॥ हस्तेनस्पृष्ट्वा मंत्रंजपेत् ॥ ॐ कलशस्यमु
खेविष्णुःकंठेरुद्रःसमाश्रितः ॥ मूलेतत्रस्थितोब्रह्मामध्येमातृगणाःस्मृताः ॥ कुक्षौतुसागराः
सर्वेसप्तद्वीपावसुंधरा ॥ ऋग्वेदोथयजुर्वेदःसामवेदोह्यथर्वणः ॥ अंगैश्चसहिताः सर्वेकलशंतुस
माश्रिताः ॥ अत्रगायत्रीसावित्रीशांतिःपुष्टिकरीतथा ॥ आयांतुदेवपूजार्थमभिषेकार्थमादरात् ॥ ४३
सर्वेसमुद्राःसरितस्तीर्थानिजलदानदाः ॥ आयांतुदेवपूजार्थंदुरितक्षयकारकाः ॥ गंगेचयमुने
चैवगोदावरिसरस्वति ॥ नर्मदासिंधुकावेरिजलेस्मिन्संनिधिंकुरु ॥ इमंमेगंगेयमुने सरस्वति

शुतुद्रिस्तोमंसचतापरुष्ण्या ॥ असिक्न्यामरुद्वृधेवितस्तयार्जीकीयेश्रृणुह्यासुषोमया ॥ अत्रक
लशे अजादिदेवाताभ्योनमः केशवादिदेवताभ्योनमः आत्मादिचतुर्मूर्तिभ्योनमः वासुदे
वादिचतुर्मूर्तिभ्योनमः विश्वादिचतुर्मूर्तिभ्योनमः मत्स्यादिदशमूर्तिभ्योनमः दत्तात्रेयायनमः
वेदव्यासायनमः शिंशुमाराय० ॥ निर्विषी करणार्थं तार्क्ष्यमुद्रांप्रदर्श्य अमृतीकाणार्थं धेनुमुद्रां
प्रदर्श्य पवित्रीकरणार्थं शंखमुद्रांप्रदर्श्य दिग्बंधनार्थं गदामुद्रांप्रदर्श्य संरक्षणार्थं चक्रमुद्रांप्र
दर्श्य नारायणायविद्महेवासुदेवायधीमहि तन्नोविष्णुःप्रचोदयात् ॥ कलशदेवताभ्यःषोडशो
पचारपूजांसमर्पयेत् ॥ ॥ अथकलशप्रार्थनं ॥ कलशःकीर्तिमायुष्यंप्रज्ञांमेधांश्रियंबलं ॥
योग्यतांपापहानिंचपुण्यवृद्धिंचसाधय ॥ सर्वतीर्थमयोयस्मात्सर्वदेवमयोयतः अतोहरिप्रियो
सित्वंपूर्णकुंभनमोस्तुते ॥ अनेनकलशार्चनेन भगवान्श्रीलक्ष्मीनारयणःप्रीयतां ॥ ॥
॥ अथशंखपूजा ॥ ॥ पूर्णकुंभोदकेनशंखमापूर्य ॥ तुलसीपुष्पंनिधाय ॥ धेनुमुद्रांप्रदर्श्य
हस्तेनस्पृष्ट्वा मंत्रंपठेत् ॥ त्वंपुरासागरोत्पन्नोविष्णुनाविधृतःकरे ॥ नमितःसर्वदेवैश्चपांचजन्य
नमोस्तुते ॥ गर्भादेवारिनारीणांविशीर्यंतेसहस्रधा ॥ तवनादेनपातालेपांचजन्यनमोस्तुते ॥

SGDF Sri Gurgaon Digital Foundation

तवनादेनजीमूताविद्रवंतिदिशोदश ॥ शशांकायुतदीप्ताभपांचजन्यनमोस्तुते दर्शनेनहिशं
खस्यकिंपुनस्पर्शनेनच ॥ विलयंयांतिपापानिहिमवद्भास्करोदये ॥ नत्वाशंखंकरेधृत्वामंत्रेणा
नेनवैष्णवः ॥ यःस्नापयतिगोविंदंतस्यपुण्यमनंतकं ॥ शंखंचंदार्कदैवत्यंमध्येवरुणदैवतं ॥
पृष्ठेप्रजापतिंविंद्यादग्रेगंगासरस्वती ॥ त्रैलोक्येयानितीर्थानिवासुदेवस्यचाज्ञया ॥ शंखेतिष्ठं
तिविप्रेंद्रतस्माच्छंखंप्रपूजयेत् ॥ ॐ ॐ नमोनारायणाय पांचजन्यायविद्महेपवमानायधी
महि तन्नःशंखःप्रचोदयात् षोडशोपचारपूजांसमर्प्यसमापयेत् ॥ पंचपात्राण्यासादयेत् तुल
सीदलंनिक्षिप्य धेनुमुद्रांप्रदर्श्य ॥ ॥ अथपंचामृतं ॥ दुग्धेतुदेवोगोविंदो दधिवामनदै
वतं ॥ आज्यंचविष्णुदैवत्यं मधौचमधुसूदनं ॥ शर्कराचाच्युतंविंद्यात्ताःपंचामृतदेवताः ॥
पंचामृतदेवताभ्योनमःतुलसीदलंनिक्षिप्य धेनुमुद्रांप्रदर्श्य ॥ ॥ ॥
॥ अथ पीठपूजा ॥ ॥ मध्ये ॐ परदेवतायै श्रीलक्ष्मीनृसिंहायनमः ॥ वामे ॐ गुरवे वा
यवे० दक्षिणे ॐ सर्वदेवताभ्यो ब्रह्मरुद्रादिभ्योनमः पुनर्वामे ॐ सर्वगुरु सनकसनंदनादि
भ्योनमः॥ पीठपादाधोभागाग्नेयादिकोणेषु आग्नेये ॐ गरुडाय० निर्ऋतौ ॐ वेदव्यासाय०

SGDF Sri Gangeshwar Digital Foundation

वायव्यां ॐ दुर्गायैनमः ईशान्ये ॐ सरस्वत्यैनमः पीठपादोर्ध्वभागे ॐ धर्माधिपतये यमाय
नमः ॐ ज्ञानाधिपतये वायवेनमः ॐ वैराग्याधिपतये रुद्रायनमः ॐ ऐश्वर्याधिपतये इंद्रायन
मः पीठफलकेषुपूर्वे ॐ अधर्माधिपतये निर्ऋतयेनमः द० ॐ अज्ञानाधिपतयेदुर्गायैनः प०
ॐ अवैराग्याधिपतये कामायनमः उ० ॐ अनैश्वर्याधिपतये रुद्रायनमः॥ पीठस्याधस्तात् ॐ
परमपुरुषायनमः ॐ आधाररूपिण्यैशक्त्यै० ॐ विष्णुकूर्माय० ॐ वायुकूर्मायनमः ॐ अनं
तनामकशेषायनमः ॐ तत्फणाश्रितपृथिव्यैनमः ॐ क्षीरसागरायनमः ॐ रमारूपश्वेतद्वीपा
यनमः ॐ रमारूपायमहादिव्यरत्नमंटपायनमः ॐ रमारूपकंदनालसहितपद्मायनमः॥ पद्मभू
मिषट्कोणेषु दक्षिणकोणे ॐसूर्यायनमः वामकोणे ॐसोमायनमः संमुखे ॐहुताशनाययमः
देववामकोणे ॐ सत्वात्मिकायै श्रियैनमः दक्षिण० ॐ रजोभिमानिन्यै भूम्यैनमः देवपृष्ठ
कोणे ॐ उपबर्हणरूपायै दुर्गायैनमः सोपानस्थले पू० ॐ आत्मने० द० ॐ अंतरात्मने०
प० ॐ परमात्मने० उ० ॐ ज्ञानात्मनेनमः॥पूर्वादिकमलाष्टपत्रेषु ॐ विमलायैनमः ॐ उत्क
र्षिण्यैनमः ॐ ज्ञानायैनमः ॐ क्रियायै० ॐ योगायै० ॐ प्रव्ह्यै० ॐ सत्यायै० ॐ ईशाना

SGDF
Sri Gargeshwari Digital Foundation

90

आ० यै० मध्ये ॐ अनुग्रहायै० तदुपरिहिरेर्योगपीठस्वरूपाय श्रीमदनंतायनमः॥ विष्णोरासनभूताय प०
४५ दिव्यरत्नमयायच ॥ प्रधानपुरुषेशायमहापीठायतेनमः ॥ ॥ इतिपीठपूजा ॥ ॥
अथ बिंबावाहनं ॥ ॥ हृत्पद्माधिष्ठितंश्रीमन्नारायणंतुलसीपुष्पंगृहीत्वाध्यायेत् ॥ ॐ उद्यद्भा
स्वत्समाभासश्चिदानंदैकदेहवान् ॥ चक्रशंखगदापद्मधरोध्येयोहमीश्वरः ॥ लक्ष्मीधराभ्यामा
श्लिष्टःस्वमूर्तिगणमध्यगः ॥ ब्रह्मवायुशिवाहीशविपैःशुक्रादिकैरपि ॥ सेव्यमानोधिकंभक्त्या
नित्यनिः शेषशक्तिमान् ॥ ॐ आत्मादेवानांभुवनस्यगर्भोयथावशंचरतिदेवएषः ॥ घोषाइदं
स्यशृण्विरेनरूपंतस्मैवातायहविषाविधेम ॥ ॐ नमोनारायणाय ॥ ॐ एह्येहिममहृत्पद्मस्थि
तश्रीपुरुषोत्तम ॥ आवाहयामिपीठेत्वांप्रतिमायांरमापते ॥ भोस्वामिन् जगतांनाथयावत्पूजा
वसानकं ॥ तावत्संप्रीतिभावेन बिंबेस्मिन्सन्निधोभव ॥ ममांतर्यामिश्रीलक्ष्मीनारायण पीठ
प्रतिमायां येह्येहि ॥ येह्येहिहृत्पद्मस्थितश्रीमुख्यप्राणांतर्गतश्रीलक्ष्मीनृसिंह आवाहितोभव ४५
संस्थापितोभव सन्निहितोभव सन्निरुद्धोभव संमुखोभव अवकुंठितोभव सुप्रसन्नोभव प्रार्थितो
भव वरदोभव ॥ सानिध्यंकुरुदेवेश सर्वसंपत्करोभव ॥ त्वांभक्त्यापूजयाम्यद्य भोगैरर्घ्यादि

91

भिःक्रमात् ॥ विभोसकललोकेशकृष्णविष्णोहरेप्रभो ॥ यागावसानपर्यंतमत्रस्थित्वाजनार्दन॥
भक्तस्यममपूजांचगृहीत्वापाहिमांविभो ॥ इतिप्रार्थनं ॥ परार्थसूर्यांतर्गतश्रीनारायणंध्येयःसदे
तिध्यात्वाऽऽवाहयेत् ॥ ततःप्रतिमायां मातृकान्यासं तत्वन्यासंकृत्वा मूलत्रंजपेत् १०८ हरे
स्नानार्थमागच्छेतिविज्ञापयेत् ॥ इदंविष्णुर्विचक्रमेत्रेधानिदधेपदं ॥ समूळ्हमस्यपांसुरे ॥ इ
तिमंत्रेणपादुकेदत्वा ॥ ॐ भद्रंकर्णेभिःशृणुयामदेवाभद्रंपश्येमाक्षभिर्यजत्राः ॥ स्थिरैरंगैस्तुष्टु
वांसस्तनूभिर्व्यशेमदेवहितंयदायुः॥इतिमंत्रेण देवंस्नानपीठेस्थाप्य॥लक्ष्मीहस्तेनार्घ्यंस० सरस्व
तीहस्तेनपाद्यंस० रतिहस्तेनआचमनीयंस० पितामहहस्तेनमधुपर्कंस० शांतिहस्तेनपुनराचम
नीयंसमर्पयामि ॥ ॥ अथ पंचामृतस्नानं ॥ ॥ॐ आप्यायस्वसमेतुतेविश्वतःसोमवृष्ण्यं॥
भवावाजस्यसंगथे ॥ पयःस्नानंसमर्पयामि ॥ ॐ दधिक्राव्णोअकारिषंजिष्णोरश्वस्यवाजिनः॥
सुरभिनोमुखाकरत्प्रणआयुंषितारिषत् ॥ दधिस्नानंसमर्पयामि ॥ ॐ घृतंमिमिक्षेघृतमस्ययो
निर्घृतेश्रितोघृतम्वस्यधाम ॥ अनुष्वधमावहमादयंस्वस्वाहाकृतंवृषभवक्षिहव्यं ॥घृतस्नानंसम
र्पयामि ॥ ॐ मधुवाताऋतायतेमधुक्षरंतिसिंधवः ॥ माध्वीर्नःसंत्वोषधीः ॥ मधुनक्तमुतोषसो

SGDF

मधुमत्पार्थिवंरजः ॥ मधुद्यौरस्तुनःपिता ॥ मधुमान्नोवनस्पतिर्मधुमांअस्तुसूर्यः ॥ माध्वीर्गावोभ
वंतुनः ॥ मधुस्नानंसमर्पयामि ॥ स्वादुःपवस्वदिव्यायजन्मनेस्वादुरिंद्रायसुहवीतुनाम्ने ॥
स्वादुर्मित्रायवरुणायवायवेबृहस्पतयेमधुमांअदाभ्यः ॥ शर्करास्नानंसमर्पयामि ॥ ॐ गंधद्वा
रांदुराधर्षांनित्यपुष्टांकरीषिणीं ॥ ईश्वरींसर्वभूतानांतामिहोपह्वयेश्रियं ॥ इतिस्वादूदकस्नानं
समर्पयामि ॥ ॥ अथपुरुषसूक्तेनशुद्धोदकस्नानं ॥ ॐ सहस्रशीर्षापुरुषःसहस्राक्षःसहस्र
पात् ॥ सभूमिंविश्वतोवृत्वात्यतिष्ठद्दशांगुलं ॥ पुरुषएवेदंसर्वंयद्भूतंयच्चभव्यं ॥ उतामृतत्वस्ये
शानोयदन्नेनातिरोहति ॥ एतावानस्यमहिमातोज्यायांश्चपुरुषः ॥ पादोस्यविश्वाभूतानित्रिपा
दस्यामृतंदिवि ॥ त्रिपादूर्ध्वउदैत्पुरुषःपादोस्येहाभवत्पुनः॥ ततोविष्वङ्व्यक्रामत्साशनानशने
अभि ॥ तस्माद्विराळजायत विराजोअधिपूरुषः ॥ सजातोअत्यरिच्यतपश्चाद्भूमिमथोपुरः ॥१॥
यत्पुरुषेणहविषादेवायज्ञमतन्वत ॥ वसंतोअस्यासीदाज्यंग्रीष्मइध्मःशरद्धविः ॥ तंयज्ञंब
र्हिषिप्रौक्षन्पुरुषंजातमग्रतः ॥ तेनदेवाअयजंतसाध्याऋषयश्चये ॥ तस्माद्यज्ञात्सर्वहुतःसंभृतंपृ
षदाज्यं ॥ पशूंस्तांश्चक्रेवायव्यानारण्यान्ग्राम्याश्चये ॥ तस्माद्यज्ञात्सर्वहुतऋचःसामानिजज्ञिरे॥

SGDF
Sri Gargeshwari Digital Foundation

छंदांसिजज्ञिरेतस्माद्यजुस्तस्मादजायत ॥ तस्मादश्वाअजायंतयेकेचोभयादतः ॥ गावोह
जज्ञिरेतस्मात्तस्माज्जाताअजावयः ॥ २ ॥ यत्पुरुषंव्यदधुःकतिधाव्यकल्पयन् ॥ मुखंकिमस्य
कौबाहूकाऊरूपादाउच्येते॥ ब्राह्मणोस्यमुखमासीद्बाहूराजन्यःकृतः॥ ऊरूतदस्ययद्वैश्यःपद्भ्यांशू
द्रोअजायत ॥ चंद्रमामनसोजातश्चक्षोःसूर्योअजायत ॥ मुखादिंद्रश्चाग्निश्चप्राणाद्वायुरजायत ॥
नाभ्याआसीदंतरिक्षंशीर्ष्णोद्यौः समवर्तत ॥ पद्भ्यांभूमिर्दिशःश्रोत्रात्तथालोकाँअकल्पयन् ॥ सप्ता
स्यासन्परिधयस्त्रिःसप्तसमिधःकृताः ॥ देवायद्यज्ञंतन्वानाअबध्नन्पुरुषंपशुं ॥ यज्ञेनयज्ञम
यजंतदेवास्तानिधर्माणिप्रथमान्यासन् ॥ तेहनाकंमहिमानःसचंतयत्रपूर्वे साध्याःसंतिदेवाः
॥ ३ ॥ ॐ अतोदेवाअवंतुनोयतोविष्णुर्विचक्रमे ॥ पृथिव्याःसप्तधामभिः ॥ इदंविष्णुर्विचक्रमे
त्रेधानिदधेपदं ॥ समूळ्हमस्यपांसुरे ॥ त्रीणिपदाविचक्रमेविष्णुर्गोपाअदाभ्यः ॥ अतोधर्मा
णिधारयन् ॥ विष्णोःकर्माणिपश्यतयतोव्रतानिपस्पशे ॥ इंद्रस्ययुज्यःसखा ॥ तद्विष्णोःपरमंप
दं सदापश्यंतिसूरयः ॥ दिवीवचक्षुराततं ॥ तद्विप्रासोविपन्यवोजागृवांसःसमिंधते ॥ विष्णो
र्यत्परमंपदं ॥ १ ॥ विश्वतश्चक्षुरुतविश्वतोमुखोविश्वतोबाहुरुतविश्वतस्पात् ॥ संबाहुभ्यांधम

SGDF
Sri Gargeshwari Digital Foundation

आ० तिसंपतत्रैर्द्यावाभूमीजनयंदेवएकः ॥ संसृष्टंधनमुभयंसमाकृतमस्मभ्यंदत्तांवरुणश्चमन्युः॥ भियं प०
४७ दधानाहृदयेषुशत्रवःपराजितासोअपनिलयंतां ॥ ॥ ॥
अथ यजुर्वेदिनांपुरुषसूक्तं ॥ ॥ सहस्रशीर्षापुरुषः ॥ सहस्राक्षःसहस्रपात् ॥ सभूमिं
विश्वतोवृत्वा ॥ अत्यतिष्ठद्दशांगुलं ॥ पुरुषएवेदꣳ सर्वं यद्भूतंयच्चभव्यं ॥ उतामृतत्वस्येशानः॥
यदन्नेनातिरोहति॥एतावानस्यमहिमा॥अतोज्यायाꣳश्चपूरुषः॥१॥पादोस्यविश्वाभूतानित्रिपाद
स्यामृतंदिवि॥त्रिपादूर्ध्वउदैत्पुरुषः पादोस्येहाभवत्पुनः॥ततोविष्वङ्व्यक्रामत् ॥ साशनानशने
अभि॥तस्माद्विराडजायत॥विराजोअधिपूरुषः॥सजातोअत्यरिच्यत॥पश्चाद्भूमिमथोपुरः॥२॥यत्पुरु
षेणहविषा ॥ देवायज्ञमतन्वत॥वसंतोअस्यासीदाज्यं ॥ ग्रीष्मइध्मःशरद्धविः॥ सप्तास्यासन्परि
धयः त्रिःसप्तसमिधःकृताः ॥ देवायद्यज्ञंतन्वानाः ॥ अबध्नन्पुरुषंपशुं ॥ तंयज्ञंबर्हिषिप्रौक्षन् ॥
पुरुषंजातमग्रतः ॥ ३ ॥ तेनदेवाअयजंत ॥ साध्याऋषयश्चये ॥ तस्माद्यज्ञात्सर्वहुतः॥ संभृतं
पृषदाज्यं ॥ पशूꣳस्ताꣳश्चक्रेवायव्यान् ॥ आरण्यान्ग्राम्याश्चये ॥ तस्माद्यज्ञात्सर्वहुतः ऋचः ४७
सामानिजज्ञिरे ॥ छंदाꣳसिजज्ञिरेतस्मात् ॥यजुस्तस्मादजायत ॥ ४ ॥ तस्मादश्वाअजायंत ॥

एकेचोभयादतः ॥ गावोहजज्ञिरेतस्मात् ॥ तस्माज्जाताअजावयः ॥ यत्पुरुषंव्यदधुः ॥ कति
धाव्यकल्पयन् ॥ मुखंकिमस्यकौबाहू ॥ कावूरूपादाउच्येते ॥ ब्राह्मणोस्यमुखमासीत् ॥ बाहू
राजन्यःकृतः ॥ ५ ॥ ऊरुतदस्ययद्वैश्यः ॥ पद्भ्याꣳशूद्रोअजायत ॥ चंद्रमामनसोजातः ॥
चक्षोःसूर्योअजायत ॥ मुखादिंद्रश्चाग्निश्च ॥ प्राणाद्वायुरजायत ॥ नाभ्याआसीदंतरिक्षं ॥
शीर्ष्णोद्यौःसमवर्तत ॥ पद्भ्यांभूमिर्दिशःश्रोत्रात् ॥ तथालोकाꣳअकल्पयन् ॥ ६ ॥ वेदाहमे
तंपुरुषंमहांतं ॥ आदित्यवर्णंतमसस्तुपारे ॥ सर्वाणिरूपाणिविचित्यधीरः ॥ नामानिकृत्वाभि
वदन्यदास्ते ॥ धातापुरस्ताद्यमुदाजहार ॥ शक्रःप्रविद्वान्प्रदिशश्चतस्रः ॥ तमेवंविद्वानमृत
इहभवति ॥ नान्यःपंथाअयनायविद्यते ॥ यज्ञेनयज्ञमयजंतदेवाः ॥ तानिधर्माणिप्रथमान्या
सन् ॥ तेहनाकंमहिमानःसचंते ॥ यत्रपूर्वेसाध्याःसंतिदेवाः ॥ ७ ॥ पुरुषःपुरोग्रतोजायत
कृतोकल्पयन्नासद्देच ॥ अद्भ्यःसंभूतःपृथिव्यैरसाच्च ॥ विश्वकर्मणः समवर्तताधि ॥ तस्यत्वष्टा
विदधद्रूपमेति ॥ तत्पुरुषस्यविश्वमाजानमग्रे ॥ वेदाहमेतंपुरुषंमहांतं ॥ आदित्यवर्णंतमसःपर
स्तात् ॥ तमेवंविद्वानमृतइहभवति ॥ नान्यःपंथाविद्यतेयनाय ॥ प्रजापतिश्चरतिगर्भेअंतः॥

SGPF Foundation

अजायमानोबहुधाविजायते ॥ १ ॥ तस्यधीराःपरिजानंतियोनिं ॥ मरीचीनांपदमिच्छंतिवेध
सः ॥ योदेवेभ्यआतपति ॥ योदेवानांपुरोहितः ॥ पूर्वोयोदेवेभ्योजातः ॥ नमोरुचायब्राह्मये।
रुचंब्राह्मंजनयंतः ॥ देवाअग्रेतदब्रुवन् ॥ यस्त्वैवंब्राह्मणोविद्यात् ॥ तस्यदेवोअसन्वशे ॥ ह्रीश्चतेलक्ष्मीश्चपत्न्यौ । अहोरात्रेपार्श्वे ॥ नक्षत्राणिरूपं । अश्विनौव्यात्तं ॥ इष्टंमनिषाण । अमुंमनिषाण ॥ सर्वं मनिषाण ॥ २ ॥ जायतेवशेसत्पच ॥ ॥ ॥
अथ विष्णुसूक्तप्रारंभः ॥ विष्णोर्नुकंवीर्याणिप्रवोचंयःपार्थिवानिविममेरजांसि ॥ योअस्कभायदुत्तरंसधस्थंविचक्रमाणस्त्रेधोरुगायः ॥ प्रतद्विष्णुस्तवतेवीर्येणमृगोनभीमःकुचरोगिरिष्ठाः। यस्योरुषुत्रिषुविक्रमणेष्वधिक्षियंतिभुवनानिविश्वा ॥ प्रविष्णवेशूषमेतुमन्मगिरिक्षितउरुगायायवृष्णे ॥ यइदंदीर्घंप्रयतंसधस्थमेकोविममेत्रिभिरित्पदेभिः ॥ यस्यत्रीपूर्णामधुनापदान्यक्षीयमाणास्वधयामदंति ॥ यउत्रिधातुपृथिवीमुतद्यामेकोदाधारभुवनानिविश्वा ॥ तदस्यप्रियमभिपाथोअश्यांनरोयत्रदेवयवोमदंति ॥ उरुक्रमस्यसहिबंधुरित्थाविष्णोःपदेपरमेमध्वउत्सः॥ ता वांवास्तून्युश्मसिगमध्यैयत्रगावोभूरिशृंगाअयासः ॥ अत्राहतदुरुगायस्यवृष्णःपरमंपदमव

SGDF Sri Gurudakshina Digital Foundation

भातिभूरि ॥ १ ॥ प्रवःपान्तमन्धसोधियायतेमहेशूरायविष्णवेचार्चत ॥ यासानुनिपर्वतानामदा
भ्यामहस्तस्थतुरर्वतेवसाधुना ॥ त्वेषमित्थासमरणंशिमीवतोरिन्द्राविष्णूसुतपावामुरुष्यति ॥ या
मर्त्यायप्रतिधीयमानमित्कृशानोरस्तुरसनामुरुष्यथः ॥ ताईंवर्धन्तिमह्यस्यपौंस्यंनिमातरानयति
रेतसेभुजे ॥ दधातिपुत्रोवरंपरंपितुर्नामतृतीयमधिरोचनेदिवः ॥ तत्तदिदस्यपौंस्यंगृणीमसीन
स्यत्रातुरवृकस्यमीळ्हुषः ॥ यःपार्थिवानित्रिभिरिद्विगामभिरुरुक्रमिष्टोरुगायायजीवसे ॥ द्वेइ
दस्यक्रमणेस्वर्दृशोभिख्यायमर्त्योभुरण्यति ॥ तृतीयमस्यनकिरादधर्षतिवयश्चनपतयन्तःपतत्रि
णः ॥ चतुर्भिःसाकंनवतिंचनामभिश्चक्रंनवृत्तंव्यतींरवीविपत् ॥ बृहच्छरीरोविमिमानऋक्वभि
र्युवाकुमारःप्रत्येत्याहवम् ॥ २ ॥ भवामित्रोनशेव्योघृतासुतिर्विभूतद्युम्नएवयाउसप्रथाः ॥ अधा
तेविष्णोविदुषाचिदर्ध्यःस्तोमोयज्ञश्चराध्योहविष्मता ॥ यःपूर्व्यायवेधसेनवीयसेसुमज्जानयेवि
ष्णवेददाशति ॥ योजातमस्यमहतोमहिब्रवत्सेदुश्रवोभिर्युज्यंचिदभ्यसत् ॥ तमुस्तोतारःपूर्व्यं
यथाविदऋतस्यगर्भंजनुषापिपर्तन ॥ आस्यजानन्तोनामचिद्विवक्तनमहस्तेविष्णोसुमतिंभजा
महे ॥ तमस्यराजावरुणस्तमश्विनाक्रतुंसचन्तमारुतस्यवेधसः ॥ दाधारदक्षमुत्तममहर्विदंव्रजंच

SGDF
Sri Gargeshwari Digital Foundation

आ० विष्णुःसखिवांअपोर्णुते ॥ आयोविवायसचथायदैव्यइंद्रायविष्णुःसुकृतेसुकृत्तरः ॥ वेधाअजि प०
४९ न्वत्रिषधस्थआर्यमृतस्यभागेयजमानमाभजत् ॥ ३ ॥ संवांकर्मणासमिषाहिनोमींद्राविष्णूअप
सस्पारेअस्य ॥ जुषेथांयज्ञंद्रविणंचधत्तमरिष्टैर्नः पथिभिःपारयंता ॥ याविश्वासांजनितारामती
नामिंद्राविष्णूकलशासोमधाना ॥ प्रवांगिरःशस्यमानाअवंतुप्रस्तोमासोगीयमानासोअर्कैः ॥
इंद्राविष्णूमदपतीमदानामासोमंयातंद्रविणोदधाना॥ संवामंजंत्वक्तुभिर्मतीनांसंस्तोमासः शस्य
मानासउक्थैः॥ आवामश्वासोअभिमातिषाहइंद्राविष्णूसधमादोवहंतु॥ जुषेथांविश्वाहवनामती
नामुपब्रह्माणिशृणुतंगिरोमे॥ इंद्राविष्णूतत्पनयाय्यंवांसोमस्यमदउरुचक्रमाथे॥अकृणुतमंतीरक्षं
वरीयोप्रथतंजीवसेनोरजांसि॥इंद्राविष्णूहविषावावृधानाग्राद्वानानमसारातहव्या ॥घृतासुतीद्रवि
णंधत्तमस्मेसमुद्रस्थःकलशःसोमधानः॥इंद्राविष्णूपिबतंमध्वोअस्यसोमस्यदस्राजठरंपृणेथां॥आवा
मंधांसिमदिराण्यग्मन्नुपब्रह्माणिशृणुतंहवंमे॥उभाजिग्यथुर्नपराजयेथेनपराजिग्येकतरश्चनैनोः॥ ४९
इंद्रश्चविष्णोयदपस्पृधेथांत्रेधासहस्रंवितदैरयेथां॥५॥परोमात्रयातन्वावृधाननतेमहित्वमन्वश्नुवंति
॥उभेतेविद्मरजसीपृथिव्याविष्णोदेवत्वंपरमस्यवित्से॥ नतेविष्णोजायमानोनजातोदेवमहिम्नःप

रमंतमाप ॥ उदस्तभ्नानाकमृष्वंबृहंतंदाधर्थप्राचींककुभंपृथिव्याः ॥ इरावतीधेनुमतीहिभूतंसूय
वसिनीमनुषेदशस्या ॥ व्यस्तभ्नारोदसीविष्णवेतेदाधर्थपृथिवीमभितोमयूखैः ॥ उरुंयज्ञायच
क्रथुरुलोकंजनयंतासूर्यमुषासमग्निं ॥ दासस्यचिद्वृषशिप्रस्यमायाजघ्नथुर्नरापृतनाज्येषु ॥ इंद्रा
विष्णूदृंहिताः शंबरस्यनवपुरोनवतिंचश्नथिष्टं ॥ शतंवर्चिनःसहस्रंचसाकंहथोअप्रत्यसुरस्यवीरा
न् ॥ इयंमनीषाबृहतीबृहंतोरुक्रमातवसावर्धयंती ॥ ररेवांस्तोमंविदथेषुविष्णोपिन्वतमिषोवृज
नेष्विंद्र ॥ वषट्तेविष्णवासआकृणोमितन्मेजुषस्वशिपिविष्टहव्यं ॥ वर्धंतुत्वासुष्टुतयोगिरोमेयूयं
पातस्वस्तिभिःसदानः ॥ ६ ॥ नूमर्तोदयतेसनिष्यन्योविष्णवउरुगायायदाशत् ॥ प्रयःसत्रा
चामनसायजातएतावंतंनर्यमाविवासात् ॥ त्वंविष्णोसुमतिंविश्वजन्यामप्रयुतामेवयावोमतिं
दाः ॥ पर्चोयथानःसुवितस्यभूरेरश्वावतः पुरुश्चंद्रस्यरायः ॥ त्रिर्देवःपृथिवीमेषएतांविचक्रमेश
तर्चसंमहित्वा ॥ प्रविष्णुरस्तुतवसस्तवीयान्त्वेषंह्यस्यस्थविरस्यनाम ॥ विचक्रमेपृथिवीमेषएतां
क्षेत्रायविष्णुर्मनुषेदशस्यन् ॥ ध्रुवासोअस्यकीरयोजनासउरुक्षितिंसुजनिमाचकार ॥ प्रतत्तेअ
द्यशिपिविष्टनामार्यःशंसामिवयुनानिविद्वान् ॥ तंत्वागृणामितवसमतव्यान्क्षयंतमस्यरजसःप

SGDF
Foundation

100

आ० राके ॥ किमित्तेविष्णोपरिचक्ष्यंभूत्प्रयद्ववक्षेशिंपिविष्टोअस्मि ॥ मावर्पो अस्मदपगूहएतद्यदन्य प०
५० रूपःसमिथेबभूथ ॥ वषट्तेविष्णवासआकृणोमितन्मेजुषस्वशिपिविष्टहव्यं ॥ वर्धंतुत्वासुष्टुत
योगिरोमेयूयंपातस्वस्तिभिःसदानः ॥ ७ ॥ ॥ अथघर्मसूक्तप्रारंभः ॥ घर्मासमं
तात्रिवृतंव्यापतुस्तयोर्जुष्टिं मातरिश्वाजगाम ॥ दिवस्पयोदिधिषाणाअवेषन्विदुर्देवाःसहसामा
नमर्कं ॥ तिस्रोदेष्ट्रायनिर्ऋतीरुपासतेदीर्घश्रुतोविहिजानंतिवन्हयः ॥ तासांनिचिक्युःकवयो
निदानंपरेषुयागुह्येषुव्रतेषु ॥ चतुष्कपर्दायुवतिःसुपेशाघृतप्रतीकावयुनानिवस्ते ॥ तस्यांसुपर्णा
वृषणानिषेदतुर्यत्रदेवादधिरेभागधेयं ॥ एकःसुपर्णःससमुद्रमाविवेशसइदंविश्वंभुवनंविचष्टे ॥
तंपाकेनमनसापश्यमंतितस्तंमातारेळ्हिसउरेळ्हिमातरं ॥ सुपर्णंविप्राःकवयोवचोभिरेकंसंतंबहु
धाकल्पयंति ॥ छंदांसिचदधतोअध्वरेषुग्रहान्त्सोमस्यमिमतेद्वादश ॥ १ ॥ षट्त्रिंशांश्चचतुरःक
ल्पयंतश्छंदांसिचदधतआद्वादशं ॥ यज्ञंविमायकवयोमनीषऋक्सामाभ्यांप्ररथंवर्तयंति ॥ चतु ५०
र्दशान्येमहिमानोअस्यतंधीरावाचाप्रणयंतिसप्त ॥ आप्रानंतीर्थंकइहप्रवोचद्येनपथाप्रपिबंतेसुत
स्यं ॥ सहस्रधापंचदशान्युक्थायावद्यावापृथिवीतावदित्तत् ॥ सहस्रधामहिमानःसहस्रंयावद्ब्र

SGDF
Sri Gargeshwari Digital Foundation

ह्मविष्ठितंतावतीवाक् ॥ कश्छंदसांयोगमावेदधीरःकोधिष्ण्यांप्रतिवाचंपपाद ॥ कमृत्विजामष्ट
मंशूरमाहुर्हरीइंद्रस्यनिचिकायकःस्वित् ॥ भूम्याअंतंपर्येकेचरंतिरथस्यधूर्षुयुक्तासोअस्थुः ॥ श्र
मंस्यदायंविभजंत्येभ्योयदायमोभवतिहर्म्येहितः ॥ २ ॥ ॥ ॥

अथ समुद्रसूक्तप्रारंभः ॥ ॥ समुद्रादूर्मिर्मधुमांउदारदुपांशुनासमंमृतत्वमानद् ॥ घृतस्यनाम
गुह्यंयदस्तिजिव्हादेवानांममृतस्यनाभिः॥वयंनामप्रब्रवामाघृतस्यास्मिन्यज्ञेधारयामानमोभिः॥
उपब्रह्माशृणवच्छस्यमानंचतुःशृंगोवमीद्गौरएतत् ॥ चत्वारिशृंगात्रयोअस्यपादाद्वेशीर्षेसप्तहस्ता
सोअस्य ॥ त्रिधाबद्धोवृषभोरोरवीतिमहोदेवोमर्त्याआविवेश ॥ त्रिधाहितंपणिभिर्गुह्यमानंगवि
देवासोघृतमन्वविंदन् ॥ इंद्रएकंसूर्यएकंजजानवेनादेकंस्वधयानिष्टतक्षुः ॥ एताअर्षंतिहृद्यात्स
मुद्राछतव्रजारिपुणानावचक्षे ॥ घृतस्यधाराअभिचाकशीमिहिरण्ययोवेतसोमध्यआसां ॥ १ ॥
सम्यक्स्रवंतिसरितोनधेनाअंतर्हृदामनसापूयमानाः ॥ एतअर्षंत्यूर्मयोघृतस्यमृगाइवक्षिपणो
रीषमाणाः ॥ सिंधोरिवप्राध्वनेशूघनासोवातप्रमियःपतयंतियव्हाः ॥ घृतस्यधाराअरुषोनवा
जीकाष्ठाभिंदंनूर्मिभिःपिन्वमानः ॥ अभिप्रवंतसमनेवयोषाःकल्याण्यः १ स्मयमानासोअग्निं ॥

SGDF
Sri Gangeshwari Digital Foundation

आ० घृतस्यधाराःसमिधोनसंततााजुषाणोहर्यतिजातवेदाः ॥ कन्याइववहतुमेतवाउअंज्यंजानाअभि प०
५१ चाकशीमि ॥ यत्रसोमःसूयतेयत्रयज्ञोघृतस्यधाराअभितत्पवंते ॥ अभ्यर्षतसुष्टुतिंगव्यमाजिम
स्मासुभद्राद्रविणानिधत्त ॥ इमंयज्ञंनयतदेवतानोघृतस्यधारामधुमत्पवंते ॥ धामंतेविश्वंभुवन
मधिश्रितमंतःसमुद्रेहृद्यं १ तरायुषि ॥ अपामनीकेसमिथेयआभृतस्तमश्याममधुमंतंतऊर्मिं ॥
॥ २ ॥ ॥ अथ पवमानसूक्तप्रारंभः ॥ ॥ पवस्वसोममंदयन्निंद्रायमधुमत्तमः ॥ अ
स्यग्रंदेववीतयेवाजयंतोरथाइव ॥ तेसुतासोमदिन्तमाःशुक्रावायुमसृक्षत ॥ ग्राव्णातुंनोअभिष्टु
तःपवित्रंसोमगच्छसि ॥ दधत्स्तोत्रेसुवीर्यं ॥ एषतुन्नोअभिष्टुतःपवित्रमतिगाहते ॥ रक्षोहा
वारमव्ययं ॥ १ ॥ यदंतियच्चदूरकेभयंविंदतिमामिह ॥ पवमानवितज्जहि ॥ पवमानः
सोअद्यनःपवित्रेणविचर्षणिः ॥ यःपोतासपुनातुनः ॥ यत्तेपवित्रमर्चिष्यग्नेविततमंतरा ॥
ब्रह्मतेनपुनीहिनः ॥ यत्तेपवित्रमर्चिवदग्नेतेनपुनीहिनः ॥ ब्रह्मसवैःपुनीहिनः ॥ उ ५१
भाभ्यांदेवसवितःपवित्रेणसवेनच ॥ मांपुनीहिविश्वतः ॥ २ ॥ त्रिभिष्ट्वंदेवसवितर्वर्षिष्ठैः
सोमधामभिः ॥ अग्नेदक्षैःपुनीहिनः ॥ पुनंतुमांदेवजनाः पुनंतुवसवोधिया ॥ विश्वे

देवाःपुनीतमाजातवेदःपुनीहिमा ॥ प्रप्यायस्वप्रस्यंदस्वसोमविश्वेभिरंशुभिः ॥ देवेभ्यउत्तमंह
विः ॥ उपप्रियंपनिप्नतंयुवानमाहुतीवृधं ॥ अगन्मबिभ्रतोनमः ॥ अलाय्यस्यपरशुर्ननाशतमा
पवस्वदेवसोम ॥ आखुंचिदेवदेवसोम ॥ यःपावमानीरध्येत्यृषिभिःसंभृतंरसं ॥ सर्वंसपूतमश्ना
तिस्वदितंमातरिश्वना ॥ पावमानीर्योअध्येत्यृषिभिःसंभृतंरसं ॥ तस्मैसरस्वतीदुहे क्षीरंसर्पिर्म
धूदकम् ॥ ३ ॥ ॥ अथ यइंदोरेकवर्गः ॥ यइंदोःपवमानस्यानुधामान्यक्रमीत् ॥ तमा
हुःसुप्रजाइतियस्तेसोमाविधन्मनइंद्रायेंदोपरिस्रव ॥ ऋषेमंत्रकृतांस्तोमैःकश्यपोद्वर्धयन्गिरः ॥
सोमंनमस्यराजानंयोजज्ञेवीरुधांपतिरिंद्रायेंदोपरिस्रव ॥ सप्तदिशोनानासूर्याःसप्तहोतारऋत्वि
जः ॥ देवाआदित्यायेसप्ततेभिः सोमाभिरक्षनइंद्रायेंदोपरिस्रव ॥ यत्तेराजंछृतंहविस्तेनसोमा
भिरक्षनः॥ अरातीवामानस्तारीन्मोचनःकिंचनाममदिंद्रायेंदोपरिस्रव ॥ १ ॥ ॥
॥ अथ जितंतेस्तोत्रप्रारंभः ॥ ॥ श्रीगुरुभ्योनमः ॥ ॐ जितंतेपुंडरीकाक्ष नमस्तेविश्वभाव
न ॥ नमस्तेस्तुहृषीकेश महापुरुषपूर्वज ॥१॥ जितंतेपुंडरीकाक्षपूर्णषाड्गुण्यविग्रह ॥ परानंद
परब्रह्मन्नमस्तेचतुरात्मने ॥ २ ॥ नमस्तेपीतवसननमःकटकहारिणे ॥ नमोनीलालकाबद्धवे

SGDF Sri Gargeshwari Digital Foundation

णीसुंदरपुंगव ॥ ३ ॥ स्फुरद्वलयकेयूरनूपुरांगदभूषणैः ॥ शोभनैर्भूषिताकारकल्याणगुणराश
ये ॥ ४ ॥ करुणापूर्णहृदयशंखचक्रगदाधर ॥ अमृतानंदपूर्णाभ्यांलोचनाभ्यांविलोकय ॥५॥
कृशंकृतघ्नंदुष्कर्मकारिणंपापभाजनं ॥ अपराधसहस्राणामाकरंकरुणाकर ॥ ६ ॥ कृपयामांकेव
लयाग्रहाणमधुराधिप ॥ विषयार्णवमग्नंमामुत्धर्तुंत्वमिहार्हसि ॥ ७ ॥ पितामातासुरद्बंधुर्भ्राता
पुत्रस्त्वमेवमे ॥ विद्याधनंचकामश्चनान्यत्किंचित्त्वयाविना ॥ ८ ॥ यत्रकुत्रस्थलेवासोयेषुकेषु
भवोस्तुमे ॥ तवदास्यैकभावेस्यात्सदासर्वत्रमेरतिः ॥ ९ ॥ मनसाकर्मणावाचाशिरसावाकथं
चन ॥ त्वांविनानान्यमुद्दिश्यकरिष्येकिंचिदप्यहं ॥ १० ॥ पाहिपाहिजगन्नाथकृपयाभक्तवत्स
ल ॥ अनाथोहमधन्योहमकृतार्थःकथंचन ॥ ११ ॥ नृशंसःपापकृत्क्रूरोवंचकोनिष्ठुरःसदा ॥ भ
वार्णवेनिमग्नंमामनन्यकरुणोदधे ॥ १२ ॥ करुणापूर्णदृष्टिभ्यांदीनंमामवलोकय ॥ त्वदग्रेप
तितंत्यक्तुंतावकंनार्हसिप्रभो ॥ १३ ॥ मयाकृतानिपापानिविविधानिपुनःपुनः ॥ त्वत्पादपं
कजंप्राप्तुंनान्यत्त्वत्करुणांविना ॥ १४ ॥ साधनानिप्रसित्धानियागादीन्यब्जलोचन ॥ त्व
दाज्ञयाप्रवृत्तानित्वामुद्दिश्यकृतानिवै ॥ १५ ॥ भक्त्यैकलभ्यःपुरुषोत्तमोसिजगत्प्रसूतिस्थिति

SGDF Sri Gargeshwari Digital Foundation

105

नाशहेतुः ॥ अकिंचनानन्यगतिंशरण्यंगृहाणमांक्लेशिनमंबुजाक्ष ॥ १६ ॥ धर्मार्थकाममोक्षेषुने
छाममकदाचन ॥ त्वत्पादपंकजस्याधोजीवितंदीयतांमम ॥ १७ ॥ कामयेतावकत्वेनपरिच
र्यासुवर्तनं॥ नित्यंकिंकरभावेनपरिगृण्हीष्वमांविभो ॥१८॥ लोकंवैकुंठनामानंदिव्यंषाड्गुण्यसंयु
तं ॥ अवैष्णवानामप्राप्यंगुणत्रयविवार्जितं॥१९॥ नित्यंसिद्धैःसमाकीर्णंत्वन्मयैःपांचकालिकैः॥
सभाप्रासादसंयुक्तंवनैश्चोपवनैःशुभैः॥२०॥ वापीकूपतडागैश्चवृक्षषंडैःसुमंडितं॥ अप्राकृतंसुरैर्वंद्य
मयुतार्कसमप्रभं॥२१॥ प्रकृष्टसत्वराशित्वात्कदाद्रक्ष्यामिचक्षुषा॥ क्रीडंतंरमयासार्धंलीलाभूमिषु
केशवं॥२२॥ मेघश्यामंविशालाक्षंकदाद्रक्ष्यामिचक्षुषा॥ उन्नसंचारुदशनंबिंबोष्ठंशोभनाननं॥२३॥
विशालवक्षसंश्रीशंकंबुग्रीवंजगद्गुरुं ॥ आजानुबाहुपरिघमुन्नतांसंमधुद्विषं॥२४॥तनूदरंनिम्ननना
भिमापीनजघनंहरिं ॥ करभोरुंश्रियःकांतंकदाद्रक्ष्यामिचक्षुषा ॥ २५ ॥ शंखचक्रगदापद्मैरंकि
तंपादपंकजं ॥ शरच्चंद्रशताक्रांतनखराजिविराजितं ॥ २६ ॥ सुरासुरैर्वंद्यमानमृषिभिर्वंदितंस
दा ॥ मूर्धानंमामकंदेवतावकंमंडयिष्यति ॥ २७॥ कदागंभीरयावाचाश्रियायुक्तोजगत्पतिः॥
चामरव्यग्रहस्तंमामेवंकुर्वीतिवक्ष्यति ॥ २८ ॥ कदाहंगणनाथेनराजराजेनचोदितः ॥ चरेयंभ

SGDF
Sri Gargeshwari Digital Foundation

गवत्पादपरिचर्यासुवृत्तिषु ॥ २९ ॥ शांतायसुविशुद्धायतेजसेपरमात्मने ॥ नमःसर्वगुणातीत
षड्गुणायादिवेधसे ॥ ३० ॥ सत्यज्ञानानंतगुणब्रह्मणेपरमात्मने ॥ नमोभगवतेतुभ्यंवासुदेवा
मितद्युते ॥ ३१ ॥ चतुःपंचनवव्यूहदशद्वादशमूर्तये ॥ नमोनंतायविश्वायविश्वातीतायचक्रि
णे ॥ ३२ ॥ नमस्तेपंचकालज्ञपंचकालपरायण ॥ पंचकालैकमनसांत्वमेवगतिरव्ययः ॥३३॥
स्वमहिम्निस्थितंदेवंनिरनिष्टंनिरंजनं ॥ अप्रमेयमजंविष्णुंशरणंत्वांगतोस्म्यहं ॥ ३४ ॥ वाग
तीतंपरंशांतमब्जनाभंसुरेश्वरं ॥ तुरीयाद्यतिरिक्तंत्वांकौस्तुभोद्भासिवक्षसं ॥ ३५ ॥ विश्वरूपंवि
शालाक्षंकदाद्रक्ष्यामिचक्षुषा ॥ मोक्षंसालोक्यसारूप्यंप्रार्थयेनधराधर ॥ ३६ ॥ इच्छाम्यहंमहा
भागकारुण्यंतवसुव्रत ॥ सकलावरणातीतकिंकरोस्मितवानघ ॥ ३७ ॥ पुनःपुनःकिंकरोस्मि
तवाहंपुरुषोत्तम ॥ आसनाद्यनुयागांतमर्चनंयन्मयाकृतं ॥ ३८ ॥ योगहीनंक्रियाहीनंभक्तिही
नममंत्रकं ॥ तत्सर्वंक्षम्यतांदेवदीनंमामात्मसात्कुरु ॥ ३९ ॥ इतिस्तोत्रेणदेवेशंस्तुत्वामधुनिघा
तिनं ॥ यागावसानसमयेदेवदेवस्यचक्रिणः ॥ नित्यंकिंकरभावेनस्वात्मानंविनिवेदयेत् ॥४०॥
इतिश्रीजितंतेस्तोत्रे प्रथमोध्यायः ॥ १ ॥ श्रीब्रह्मोवाच ॥ जितंतेपुंडरीकाक्षनमस्तेविश्वभा

वन ॥ नमस्तेस्तुहृषीकेशमहापुरुषपूर्वज ॥ १ ॥ विज्ञापनमिदंदेवश्रृणुष्वपुरुषोत्तम ॥ नरना
रायणाभ्यांचश्वेतद्वीपनिवासिभिः ॥ २ ॥ नारदाद्यैर्मुनिगणैःसनकाद्यैश्चयोगिभिः ॥ ब्रह्मेशा
द्यैःसुरगणैःपंचकालपरायणैः ॥ ३ ॥ पूज्यसेपुंडरीकाक्षदिव्यैर्मंत्रैर्महात्मभिः ॥ पाषंडधर्मसंकी
र्णेभगवद्भक्तिवर्जिते ॥ ४ ॥ कलौजातोस्मिदेवेशसर्वधर्मबहिष्कृते ॥ कथंत्वामसदाचारःपापप्र
सवभूरुहः ॥ ५ ॥ अर्चयामिदयासिंधोपाहिमांशरणागतं ॥ तापत्रयदवाग्नौमांदह्यमानंसदावि
भो ॥ ६ ॥ पाहिमांपुंडरीकाक्षकेवलंकृपयातव ॥ जन्ममृत्युजराव्याधिदुःखसंतप्तदेहिनं ॥ ७ ॥
पालयस्वद्दृशादेवतवकारुण्यगर्भया ॥ इंद्रियाणिमयाजेतुमशक्यंपुरुषोत्तम ॥ ८ ॥ शरीरंममदे
वेशव्याधिभिःपरिपीडितं ॥ मनोमेपुंडरीकाक्षविषयानेवधावति ॥ ९ ॥ वाणीममहृषीकेशमि
थ्यापारुष्यदूषिता ॥ एवंसाधनहीनोहंकिंकरिष्यामिकेशव ॥ १० ॥ रक्षमांकृपयाकृष्णभवाग्नौप
तितंसदा ॥ अपराधसहस्राणांसहस्रमयुतंतथा ॥ ११ ॥ अर्बुदंचाप्यसंख्येयंकरुणाब्धेक्षमस्वमे ॥
यच्चापराधंकृतवानज्ञानात्पुरुषोत्तम ॥ १२ ॥ भक्तस्यममदेवेशतत्सर्वंक्षंतुमर्हसि ॥ अज्ञत्वादल्प
शक्तित्वादालस्याद्दुष्टभावनात् ॥ १३ ॥ कृतापराधंकृपणंक्षंतुमर्हसिमांविभो ॥ अपराधसहस्रा

SGDF
Sri Gurgeshwari Digital Foundation

णिक्रियंतेहर्निशंमया ॥ १४ ॥ तानिसर्वाणिमेदेवक्षमस्वमधुसूदन ॥ यज्जन्मनःप्रभृतिमोह
वशंगतेननानापराधशतमाचरितंमयाते ॥ १५ ॥ अंतर्बहिश्चसकलंतवपश्यतोपिक्षंतुंत्वमर्हसि
हरेकरुणावशेन ॥ कर्मणामनसावाचायाचेष्टाममनित्यशः ॥ केशवाराधनेसास्याज्जन्मजन्मां
तरेष्वपि ॥ १६ ॥ इति द्वितीयोध्यायः ॥२ ॥ श्री ब्रह्मोवाच ॥ जितंतेपुंडरीकाक्षनमस्तेविश्व
भावन ॥ नमस्तेस्तुहृषीकेशमहापुरुषपूर्वज ॥ १ ॥ नमस्तेवासुदेवायशांतानंदचिदात्मने ॥
अध्यक्षायस्वतंत्रायनिरपेक्षायशाश्वते ॥ २ ॥ अच्युतायाविकारायतेजसांनिधयेनमः ॥ क्लेश
कर्माद्यसंस्पृष्टपूर्णषाड्गुण्यमूर्तये ॥ ३ ॥ नित्यज्ञानबलैश्वर्यवीर्यशक्त्योजसांयुगैः ॥ त्रियुगाय
नमस्तेस्तुनमस्तेचतुरात्मने ॥ ४ ॥ प्रधानपुरुषेशायनमस्तेपुरुषोत्तम ॥ चतुःपंचनवव्यूहदश
द्वादशमूर्तये ॥ ५ ॥ अनेकमूर्तयेतुभ्यममूर्तायैकमूर्तये ॥ नारायणनमस्तेतुपुंडरीकायतेक्षण ॥
॥ ६ ॥ सुभ्रूललाटसुनससुस्मिताधरविद्रुम ॥ पीनवृत्तायतभुजश्रीवत्सकृतभूषण ॥ ७ ॥ तनु
मध्यमहावक्षःपद्मनाभनमोस्तुते ॥ विलासविक्रमाक्रांतत्रैलोक्यचरणांबुज ॥ ८ ॥ नमस्तेपीत
वसनस्फुरन्मकरकुंडल ॥ स्फुरत्किरीटकेयूरहारकौस्तुभभूषण ॥ ९ ॥ पंचायुधनमस्तेस्तुनमस्ते

SGDF Sri Gurugobindam Digital Foundation

पांचकालिक ॥ पंचकालरतैकांतयोगक्षेमंवहप्रभो ॥ १० ॥ नित्यज्ञानबलैश्वर्यभोगोपकरणा
च्युत ॥ नमस्तेब्रह्मरुद्रादिलोकयात्राप्रवर्तक ॥ ११ ॥ जन्मप्रभृतिदासोस्मिशिष्योस्मितनयो
स्मिते ॥ त्वंचस्वामीगुरुर्मातापिताचममंमाधव ॥ १२ ॥ अपित्वांभगवान्ब्रह्माशर्वशक्रमहर्षयः ॥
द्रष्टुंयष्टुमभिष्टोतुमद्यापीशन्नहीशते ॥ १३ ॥ तापत्रयमहाग्राहभीषणेभवसागरे ॥ मज्जतांनाथ
नौरेषाप्रणतिस्तुत्वदर्पिता ॥ १४ ॥ अनाथायजगन्नाथशरण्यशरणार्थिने ॥ प्रसीदसीदतेमह्यं
मुह्यतेभक्तवत्सल ॥ १५ ॥ मंत्रहीनंक्रियाहीनंभक्तिहीनंयदर्चनं ॥ तत्क्षंतव्यंप्रपन्नानामपराधं
सहिष्यसि ॥ १६ ॥ सर्वेषुदेशकालेषुसर्वावस्थासुचाच्युत ॥ किंकरोस्मिहृषीकेशभूयोभूयोऽस्मि
किंकरः ॥ १७ ॥ एकत्रिचतुरत्यंतचेष्टायेष्टाकृतेसदा ॥ व्यक्तषाड्गुण्यतत्वायचतुरात्मात्मनेन
मः ॥ १८ ॥ इति तृतीयोध्यायः ॥ ३ ॥ ॥ श्री ॥ ब्रह्मोवाच ॥ जितंतेपुंडरीकाक्षनमस्ते
विश्वभावन ॥ नमस्तेस्तुहृषीकेशमहापुरुषपूर्वज ॥ १ ॥ देवानांदानवानांचसामान्यमधिदैवतं ॥
सर्वदाचरणद्वंद्वंव्रजामिशरणंतव ॥ २ ॥ एकस्त्वमसिलोकस्यस्त्रष्टासंहारकस्तथा ॥ अध्यक्षस्त्व
न्नुमंताचगुणमायासमावृतः ॥ ३ ॥ संसारसागरंघोरमनंतंक्लेशभाजनं ॥ त्वामेवशरणंप्राप्यनि

SGDF
Sri Gargeshwari Digital Foundation

स्तरंतिमनस्विनः॥ ४॥ नतेरूपंनचाकारोनायुधानिनचास्पदं॥ तथापिपुरुषाकारोभक्तानांत्वंप्रका
शसे॥ ५॥ नैवकिंचित्परोक्षंतेप्रत्यक्षोसिनकस्यचित्॥ नैवकिंचिदासित्धंतेनचासित्धोसिकस्यचित्॥
॥ ६॥ कार्याणांकारणंपूर्वंवचसां वाच्यमुत्तमं॥ योगिनांपरमांसिद्धिंपरमंतेपदंविदुः॥ ७ ॥ अहं
भीतोस्मिदेवेशसंसारेस्मिन्महावने ॥ पाहिमांपुंडरीकाक्षनजानेशरणंपरं॥ ८॥ कालेष्वपिचसर्वेषु
दिक्षुसर्वासुचाच्युत॥ शरीरेजगतश्चास्मिन्वर्ततेमेमहद्भयं॥ ९॥ त्वत्पादकमलादन्यन्नमेजन्मांतरे
ष्वपि॥ निमित्तंकुशलस्यास्तियेनगच्छामिसद्गतिं॥ १०॥ विज्ञानंयदिदंप्राप्तंयदिदंज्ञानमुत्तमं॥ ज
न्मांतरेपिमेदेवमाभूदस्यपरिक्षयः ११॥ दुर्गतावपिजातायांत्वद्गतोमेमनोरथः॥ यदिनाशंनविंदेत
तावतास्मिकृतीसदा॥ १२॥ नकामकलुषंचित्तंममतेपादयोःस्थितं॥ कामयेवैष्णवत्वंचसर्वजन्म
सुकेवलं ॥ १३ ॥ अज्ञानाद्यदिवाज्ञानादशुभंयन्मयाकृतं ॥ क्षंतुमर्हस्यशेषेणदास्येन
चगृहाणमां ॥ १४ ॥ सर्वेषुदेशकालेषुसर्वावस्थासुचाच्युत ॥ किंकरोस्मिहृषीकेश ५५
भूयोभूयोस्मिकिंकरः ॥ १५ ॥ इत्येवमनयास्तुत्यास्तुत्वादेवंदिनेदिने ॥ किंकरोस्मीति
चात्मानंदेवायैवंनिवेदयेत्॥ १६ ॥ नजानेकर्मयत्किंचिन्नापिलौकिकवैदिके॥ ननिषेधविधी

विष्णोतवदासोस्मिकेवलं॥ १७॥ दासोहंतवदेवेशनार्चनादौस्तुतौनच ॥ सामर्थ्यंनचमेतत्र
मनोमेतिप्रसादने ॥ १८ ॥ यच्चापराधंकृतवानज्ञानात्पुरुषोत्तम ॥ भक्तस्यममदेवेशतत्सर्वंक्षंतुम
र्हसि ॥ १९ ॥ अहंकारार्थकामेषुप्रीतिरद्यैवनश्यतु॥ त्वांप्रपन्नस्यमेचैववर्धतांश्रीपतेत्वयि॥ २०॥
उपचारापदेशेनकृतानहरहर्मया॥ अपचारान्हिसर्वज्ञक्षमस्वमधुसूदन ॥ २१ ॥ क्वचाहंत्वतिदु
र्बुद्धिःक्वचात्महितवीक्षणं ॥ यद्धितंममदेवेशतातज्ज्ञापयमाधव ॥ २२॥ सत्वंप्रसीदभगवन्कुरुम
य्यनाथेविष्णोकृपांपरमकारुणिकःकिलत्वं ॥ संसारसागरनिमग्नमनंतदीनमुद्धर्तुमर्हसिहरेकरु
णावशेन ॥ २३ ॥ इति चतुर्थोध्यायः ॥ ४ ॥ ॥ श्री ब्रह्मोवाच ॥ जितंतेपुंडरीकाक्ष
नमस्तेविश्वभावन ॥ नमस्तेस्तुहृषीकेशमहापुरुषपूर्वज ॥ १ ॥ अजितायनमस्तुभ्यंषाड्गुण्य
निधयेनमः ॥ महाविभूतिसंस्थायनमस्तेपुरुषोत्तम ॥ २ ॥ सहस्रशिरसेतुभ्यंसहस्रनयनायते॥
सहस्रबाहवेतुभ्यंसहस्रचरणायते ॥ ३ ॥ अमूर्तायनमस्तुभ्यंएकमूर्तायतेनमः॥ ४ ॥ अनेकमूर्त
येतुभ्यमक्षयायचतेनमः ॥ ४ ॥ व्यापिनेवेदवेद्यायनमस्तेपरमात्मने ॥ चिन्मात्ररूपिणेतुभ्यंन
मस्तुर्यादिमूर्तये ॥ ५ ॥ अणिष्ठायस्थविष्ठायमहिष्ठायचतेनमः ॥ यविष्ठायवरिष्ठायकनिष्ठायच

SGDF
Sri Gargeshwari Digital Foundation

आ० तेनमः ॥ ६ ॥ पंचात्मनेनमस्तुभ्यंसर्वांतर्यामिणेनमः ॥ नमस्तेगुणरूपायगुणरूपानुवर्तिने।७। प०
५६ व्यस्तायचसमस्तायसमस्तव्यस्तरूपिणे ॥ कलाषोडशरूपायसृष्टिस्थित्यंतहेतवे ॥ ८ ॥ आ
दिमध्यांतशून्यायतद्भृतेचनमोनमः ॥ यज्ञाययजमानाययष्टव्यायनमोनमः ॥ ९ ॥ ईज्याफ
लात्मनेतुभ्यंनमःस्वाध्यायशालिने ॥ नमःपरमहंसायनमःसत्वगुणायच ॥ १० ॥ स्थितायपर
मेव्योम्निभूयोभूयोनमोनमः ॥ संसारसागरेघोरेविषयावर्तसंकुले ॥ ११ ॥ अपारेदुस्तरेगाधे
वर्ततंकर्मभिःस्वकैः ॥ अनाथमगतिंभीरुंदययापरयाहरे ॥ १२ ॥ मामुत्धरदयासिंधोसंसारा
ब्धेःसुदुस्तरात् ॥ मंत्रहीनंक्रियाहीनंभक्तिहीनंयदर्चनं ॥ १३ ॥ तत्क्षंतव्यंप्रपन्नानामपराधस
होह्यसि ॥ सर्वेषुदेशकालेषुसर्वावस्थासुचाच्युत ॥ १४ ॥ किंकरोस्मिहृषीकेश भूयोभूयोस्मि
किंकरः ॥ अपराधसहस्रभाजनंपतितंभीमभवार्णवोदके ॥ १५ ॥ अगतिंशरणागतंहरेकृपयाके
वलयात्मसात्कुरु ॥ जन्मप्रभृतिदासोस्मिशिष्योस्मितनयोस्मिते ॥ १६ ॥ त्वंचस्वामीगुरुर्मा ५६
तापिताचममबांधवः ॥ नाहंहितंप्रजानामित्वांभजाम्येवकेवलं ॥ १७ ॥ बुध्यैवंममगोविंदमु
क्त्युपायेनमांहरे ॥ त्वमेवमेर्थःश्रेयोमेनेदंनेदमितीतिच ॥ १८ ॥ ज्ञानयोगंचमेदेहियेनत्वामुप

SGDF
Sri Gangeshwari Digital Foundation

113

याम्यहं ॥ इतिविज्ञाप्यदेवेशंवैश्वदेवंस्वधामनि ॥१९॥ कुर्यात्पंचमहायज्ञानपिग्रह्योक्तवर्त्मना ॥
इत्यादिसमयस्तस्यकथितःकमलासन ॥ २० ॥ इति श्रीमत्पंचरात्रागमे श्रीमदष्टाक्षरकल्पे
हंसब्रह्मसंवादे जितंतेस्तोत्रे पंचमोध्यायः ॥ ५ ॥ ॥ ॐ नमोनारायणाय ॥
स्नानंसमर्पयामि ॥ आचमनीयंस० ॥ ॥ अथ भगवतोवस्त्रादिसमर्पणं ॥ अ
भिवस्त्रासुवसनान्यर्षाभिधेनूःसुदुघाःपूयमानः ॥ अभिचंद्राभर्तवेनोहिरण्याभ्यश्वान्रथिनोदेव
सोम ॥ वस्त्रोपवस्त्रार्थेतुलसीपत्रंस० ॥ आभरणार्थेतुलसीपत्रंस० ॥ ॐ यज्ञोपवीतंपरमंपवित्रं
प्रजापतेर्यत्सहजंपुरस्तात् ॥ आयुष्यमग्र्यंप्रतिमुंचशुभ्रंयज्ञोपवीतंबलमस्तुतेजः ॥ यज्ञोपवीता
र्थेतुलसीपत्रंसमर्पयामि ॥ ततोमूर्तौतत्वन्यासमातृकान्यासौकुर्यात् ॥ श्रीखंडंचंदनंदिव्यंगंधा
ढ्यंसुमनोहरं ॥ विलेपनंसुरश्रेष्ठगंधोयंप्रतिगृह्यतां ॥ श्रीलक्ष्मीनृसिंहाय गंधंसमर्पयामि ॥
कस्तुरीकल्कजंभालेतिलकंतेमयाकृतं ॥ संग्रहाणसुरश्रेष्ठश्रीशभक्तार्तिनाशन ॥ अक्षतांसमर्पया
मि ॥ माल्यादीनिसुगंधीनिमालत्यादीनिवैप्रभो ॥ मयाहृतानिपूजार्थंपुष्पाणिप्रतिगृह्यतां ॥
पुष्पाणिसमर्पयामि ॥ अथ तुलसीदलार्पणं ॥ ॐ ॐ अथातोब्रह्मजिज्ञासा ॐ ॐ जन्माद्यस्य

SGDF
Sri Gargeshwari Digital Foundation

आ० यतः ॐॐ शास्त्रयोनित्वात् ॥ ॐ ॐ तत्तुसमन्वयात् ॐ ॐ ईक्षतेर्नाशब्दं ॐ ॐ गौणश्चेन्ना प०
५७ त्मशब्दात् ॐ ॐ तन्निष्ठस्यमोक्षोपदेशात् ॐ ॐ हेयत्वावचनाच्च ॐ ॐ गतिसामान्यात्
ॐ ॐ श्रुतत्वाच्च ॐ ५६४ ॐ केशवायनमः ॐ नारायणायनमः ॐ माधवायनमः ॐ गो
विंदायनमः ॐ विष्णवेनमः ॐ मधुसूदनायनमः ॐ त्रिविक्रमायनमः ॐ वामनायनमः
ॐ श्रीधरायनमः ॐ हृषीकेशायनमः ॐ पद्मनाभायनमः ॐ दामोदरायनमः ॐ संकर्षणा
यनमः ॐ वासुदेवायनमः ॐ प्रद्युम्नायनमः ॐ अनिरुत्धायनमः ॐ पुरुषोत्तमायनमः
ॐ अधोक्षजायनमः ॐ नारसिंहायनमः ॐ अच्युतायनमः ॐ जनार्दनायनमः ॐ उपेंद्रा
यनमः ॐ हरयेनमः ॐ श्रीकृष्णायनमः ॐ मत्स्यायनमः ॐ कूर्मायनमः ॐ वराहायनमः
ॐ नारसिंहायनमः ॐ वामनायनमः ॐ परशुरामायनमः ॐ रामायनमः ॐ कृष्णायन
मः ॐ बुत्धायनमः ॐ कल्किनेनमः ॐ श्रीवेदव्यासायनमः ॐ हयग्रीवायनमः ॐ श्रील ५७
क्ष्मीनृसिंहायनमः तुलसीपत्रंसमर्पयामि ॥ ॥ अथावरणपूजा ॥ मध्ये ॐ परमपुरुषायन
मः वामे ॐ लक्ष्म्यैनमः दक्षिणे ॐ धरायैनमः ॥ पूर्वाद्यष्टदिक्षु ॐ कृत्धोल्कायनमः ॐ सहस्रो

ल्कायनमः ॐ महोल्कायनमः ॐ सहस्रोल्कायनमः ॐ वीरोल्कायनमः ॐ सहस्रोल्कायन
मः ॐ द्युल्कायनमः ॐ सहस्रोल्कायनमः ॥ इतिप्रथमावरणं ॥ तद्बहिरष्टदिक्षु ॥ ॐ वासुदे
वायनमः ॐ मायायैनमः ॐ संकर्षणायनमः ॐ जयायैनमः ॐ प्रद्युम्नायनमः ॥ ॐ कृ
त्यै० ॐ अनिरुत्धाय० ॐ शांत्यै० ॥ इति द्वितीयावरणं ॥ तद्बहिः पू० ॐ केशवायनमः
ॐ नारायणायनमः ॥ आ० ॐ माधवायनमः द० ॐ गोविंदायनयः ॐ विष्णवेनमः
नि० ॐ मधुसूदनायनमः प० ॐ त्रिविक्रमायनमः ॐ वामनायनमः वा० ॐ श्रीधरायनमः
उ० ॐ हृषीकेशायनमः ॐ पद्मनाभायनमः ई० ॐ दामोदरायनमः ॥ इति तृतीयावरणं॥
तद्बहिः पू० ॐ संकर्षणायनमः ॐ वासुदेवायनमः आ० ॐ प्रद्युम्नायनमः दक्षिणे ॐअनि
रुत्धायनमः ॐ पुरुषोत्तमायनमः नि० ॐ अधोक्षजायनमः प० ॐ नारसिंहायनमः ॐ अ
च्युतायनमः वा० ॐ जनार्दनायनमः उ० ॐ उपेंद्रायनमः ॐ हरयेनमः ई० ॐ श्रीकृ
ष्णायनमः ॥ इति चतुर्थावरणं॥ तद्बहिः पू० ॐ मत्स्यायनमः ॐ कूर्मायनमः आ० ॐ वराहायन
मः द० ॐ नरसिंहायनमः ॐ वामनायनमः नि० ॐ परशुरामायनमः प० ॐ रामायनमः

SGDF
Sri Gangadharan Digital Foundation

आ० ५८

ॐ कृष्णायनमः वा० ॐ बुद्धायनमः उ० ॐ कल्किनेनमः ॐ अनंतायनमः ई० ॐ वि
श्वरूपायनमः ॥ इति पंचमावरणं ॥ तद्बहिरष्टदिक्षु ॥ ॐ अनंतायनमः ॐ वारुण्यैनमः
ॐ ब्रह्मणेनमः ॐ सरस्वत्यैनमः ॐ वायवेनमः ॐ भारत्यैनमः ॐ ईशानायनमः ॐ गि
रिजायैनमः देवस्याग्रे ॥ ॐ वीशायनमः वामे ॐ सौपर्ण्यैनमः ॥ इतिषष्ठावरणं ॥ तद्बहि
रष्टदिक्षु ॥ ॐ सुराधिपतयेसभार्याय इंद्राय सायुधाय सवाहनाय सपरिग्रहाय श्रीविष्णुपा
र्षदायनमः ॥ ॐ तेजोधिपतयेसभार्याय अग्नये सायुधाय सवाहनाय सपरिग्रहाय श्रीविष्णुपा
र्षदायनमः ॐ धर्माधिपतये सभार्याय यमाय सायुधाय सवाहनाय सपरिग्रहाय श्रीविष्णु
पार्षदायनमः ॥ ॐ रक्षोधिपतये सभार्याय निर्ऋतये सायुधाय सवाहनाय सपरिग्रहाय श्री
विष्णुपार्षदायनमः ॥ ॐ जलाधिपतये सभार्याय वरुणाय सायुधाय सवाहनाय सपरिग्रहा
य श्रीविष्णुपार्षदायनमः ॥ ॐ ज्ञानाधिपतये सभार्याय वायवे सायुधाय सवाहनाय सपरि
ग्रहाय श्रीविष्णुपार्षदाय० ॐ धनाधिपतये सभार्याय कुबेराय सायुधाय सवाहनाय सप
रिग्रहाय श्रीविष्णुपार्षदायन० ॐ भूताधिपतये सभार्याय रुद्राय सायुधाय सवाहनाय

प० ५८

SGDF
Sri Gargeshwari Digital Foundation

117

सपरिग्रहाय श्रीविष्णुपार्षदायन० निर्ऋतिवरुणयोर्मध्ये ॐ शं शेषाय सभार्याय सवाहनाय
सायुधाय सपरिग्रहाय श्रीविष्णुपार्षदायन० इंद्रेशानयोर्मध्ये ॐ सत्यलोकाधिपतये ब्रह्मणे स
भार्याय सवाहनाय सायुधाय सपरिग्रहाय श्रीविष्णुपार्षदायन० ॥ इत्यावरणपूजा ॥ ॥
ततः सहस्रनामपठनंकार्यं॥ ॥ अथ धूपदीपसमर्पणं ॥ वनस्पत्युद्भवोधूपोगंधाढ्योगंधवत्तमः॥
आघ्रेयःसर्वदेवानांधूपोयंप्रतिगृह्यतां॥धूपंसमर्पयामि॥ साज्यंत्रिवर्तिसंयुक्तंवन्हिनायोजितंमया॥
दीपंग्रहाणदेवेशत्रैलोक्यतिमिरापह॥भक्त्यादीपंप्रयच्छामिदेवायपरमात्मने॥त्राहिमांनिरयाद्घो
राद्दीपज्योतिर्नमोस्तुते ॥ एकार्तिक्यदीपंसमर्पयामि ॥ ॥ अथनैवेद्यसमर्पणेद्वादशस्तोत्र
पठणं॥ ॥ ॐ वंदेवंद्यंसदानंदंवासुदेवंनिरंजनं ॥ इंदिरापतिमाद्यादिवरदेशवरप्रदं ॥ १ ॥ नमा
मिनिखिलाधीशाकिरीटा घृष्टपीठवत्॥ हृत्तमःशमनेर्काभंश्रीपतेःपादपंकजं॥२॥जांबूनदांबराधारं
नितंबंचिंत्यमीशितुः ॥स्वर्णमंजीरसंवीतमारूढंजगदंबया॥ ३॥ उदरंचिंत्यमीशस्यतनुत्वेप्यखिलं
भरं॥ वलित्रयांकितंनित्यमुपगूढंश्रियैकया ॥४॥ स्मरणीयमुरोविष्णोरिंदिरावासमीशितुः॥ अनं
तमंतवदिवभुजयोरंतरंगतं ॥ ५ ॥ शंखचक्रगदापद्मधराश्चिंत्याहरेर्भुजाः ॥ पीनवृत्ताजगद्रक्षाके

SGDF
Sri Gangeshwar Digital Foundation

118

आ० वलोद्योगिनोनिशं ॥ ६ ॥ संततंचिंतयेत्कंठंभास्वत्कौस्तुभभासकं ॥ वैकुंठस्याखिलावेदाउद्गीर्यं प०
५९ तेनिशंयतः ॥ ७ ॥ स्मरेतयामिनीनाथसहस्रामितकांतिमत् ॥ भवतापापनोदीड्यंश्रीपतेर्मुख
पंकजं ॥ ८ ॥ पूर्णानन्यसुखोद्भासिमंदस्मितमधीशितुः ॥ गोविंदस्यसदाचिंत्यंनित्यानंदपद
प्रदं ॥ ९ ॥ स्मरामिभवसंतापहानिदामृतसागरं ॥ पूर्णानंदस्यरामस्यसानुरागावलोकनं ॥ १० ॥
ध्यायेदजस्रमीशस्यपद्मजादिप्रतीक्षितं ॥ भ्रूभंगंपारमेष्ठ्यादिपददायिविमुक्तिदं ॥ ११ ॥ संततं
चिंतयेनंतमंतकालेविशेषतः ॥ नैवोदापुर्गृणंतोंतंयद्गुणानामजादयः ॥ ११ ॥ इतिश्रीमदानंद
तीर्थभगवत्पादाचार्यविरचिते द्वादशस्तोत्रे प्रथमोध्यायः ॥ १ ॥ ॐ सुजनोदधिसंवृद्धिपू
र्णचंद्रोगुणार्णवः ॥ अमंदानंदसांद्रोनःप्रीयतामिंदिरापतिः ॥ १ ॥ रमाचकोरीविधवेदुष्टदर्पोद
वन्हये ॥ सत्पांथजनगेहायनमोनारायणायते ॥ २ ॥ चिदचिद्भेदमखिलं विधायाधायभुंजते ॥
अव्याकृतगृहस्थायरमाप्रणयिनेनमः ॥ ३ ॥ अमंदगुणसारोपिमंदहासेनवीक्षितः ॥ नित्यमिं ५९
रयानंदसांद्रोयोनौमितंहरिं ॥ ४ ॥ ॥ वशीवशेनंकस्यापियोजितोविजिताखिलः ॥ सर्वकर्तान
क्रियतेतंनमामिरमापतिं ॥ २ ॥ अगुणायगुणोद्रेकस्वरूपायादिकारिणे ॥ विदारितारिसंघाय

119

वासुदेवायतेनमः ॥ ६ ॥ आदिदेवायदेवानांपतयेसादितारये ॥ अनाद्यज्ञानपारायनमोवर
वरायते ॥ ७ ॥ अजायजनयित्रेस्यविजिताखिलदानव ॥ अजादिपूज्यपादायनमस्तेगरुड
ध्वज ॥ ८ ॥ इंदिरामंदसांद्राग्र्यकटाक्षप्रेक्षितात्मने ॥ अस्मदिष्टैककार्यायपूर्णायहरयेनमः
॥ ९ ॥ इति श्रीद्वादशस्तोत्रे द्वितीयोध्यायः ॥ २ ॥ ॐ कुरुभुंक्ष्वचकर्मनिजंनियतंहरिपाद
विनम्रधियासततं ॥ हरिरेवपरोहरिरेवगुरुर्हरिरेवजगत्पितृमातृगतिः ॥ १ ॥ नततोस्त्यपरं
जगतीड्यतमंपरमात्परतःपुरुषोत्तमतः ॥ तदलंबहुलोकविचिंतनयाप्रवणंकुरुमानसमीशपदे ॥ २ ॥
यततोपिहरेःपदसंस्मरणेसकलंह्यघमाशुलयंव्रजति ॥ स्मरतस्तुविमुक्तिपदंपरमंस्फुटमेष्यतित
त्किमपाक्रियते ॥ ३ ॥ शृणुतामलसत्यवचःपरमंशपथेरितमुच्छ्रितबाहुयुगं ॥ नहरेःपरमोनहरेः
सदृशःपरमःसतुसर्वचिदात्मगणात् ॥ ४ ॥ यदिनामपरोनभवेत्सहरिःकथमस्यवशेजगदेतद
भूत् ॥ यदिनामनतस्यवशेसकलंकथमेवतुनित्यसुखंनभवेत् ॥ ५ ॥ नचकर्मविमामलकालगुण
प्रभृतीशमचित्तनुतद्धियतः ॥ चिदचित्तनुसर्वमसौतुहरिर्यमयेदितिवैदिकमस्तिवचः ॥ ३ ॥
व्यवहारभिदापिगुरोर्जगतांनतुचित्तगतासहिचोद्यपरं ॥ बहवःपुरुषाः पुरुषप्रवरोहरिरित्यवद

SGDF
Sri Gurgasthan Digital Foundation

120

आ० त्स्वयमेवहरिः ॥ ७ ॥ चतुराननपूर्वविमुक्तगणाहरिमेत्यतुपूर्ववदेवसदा ॥ नियतोच्चविनीचतयै प०
६० वनिजांस्थितिमापुरितिस्मपरंवचनं ॥ ८ ॥ आनंदतीर्थसन्नाम्नापूर्णप्रज्ञाभिधायुजा ॥ कृतंहर्य
ष्टकंभक्त्यापठतःप्रीयतेहरिः ॥ ९ ॥ इतिश्रीमदानंदतीर्थभगवत्पादाचार्यविरचितेश्रीद्वादशस्तोत्रे
तृतीयोध्यायः ॥ ३ ॥ ॐ निजपूर्णसुखामितबोधतनुःपरशक्तिरनंतगुणःपरमः ॥ अजरामरणः
सकलार्तिहरःकमलापति रीड्यतमोवतुनः ॥ १ ॥ यदसुप्तिगतोपिहरिःसुखवान्सुखरूपिणमा
हुरतोनिगमाः ॥ स्वमतिप्रभवंजगदस्ययतःपरबोधतनुंचततःखपतिं ॥ २ ॥ बहुचित्रजगद्बहु
धाकरणात्परशक्तिरनंतगुणःपरमः ॥ सुखरूपममुष्यपदंपरमंस्मरतस्तुभविष्यतितत्सततं ॥ ३ ॥
स्मरणेहिपरेशितुरस्यविभोर्मलिनानिमनांसिकुतःकरणं ॥ विमलंहिपदंपरमंस्वरतंतरुणार्कसव
र्णमजस्यहरेः ॥ ४ ॥ विमलैःश्रुतिशाणनिशाततमैः सुमनोसिभिराशुनिहत्यदृढं ॥ बलिनंनि
जवैरिणमात्मतमोभिदमीशमनंतमुपास्वहरिं ॥ ५ ॥ सहिविश्वसृजोविभुशंभुपुरंदरसूर्यमुखान
परानपरान् ॥ सृजतीड्यतमोवतिहंतिनिजंपदमापयतिप्रणतान्सुधिया ॥ ६ ॥ परमोपिरमे ६०
शितुरस्यसमोनहिकश्चिदभून्नभविष्यतिच ॥ क्वचिदद्यतनोपिनपूर्णसदागणितेड्यगुणानुभवैक

SGDF
Sri Gangeshwar Digital Foundation

तनोः ॥ ७ ॥ इतिदेववरस्यहरेःस्तवनंकृतवान्मुनिरुत्तममादरतः ॥ सुखतीर्थपदाभिहितःपठत
स्तदिदंभवतिध्रुवमुच्चसुखं ॥ ८ ॥ इति श्रीद्वादशस्तोत्रे चतुर्थोऽध्यायः ॥ ४ ॥ ॐ वासुदेवा
परिमेयसुधामन्शुद्धसदोदितसुंदरीकांत ॥ धराधरधारणवेधुरधर्तः सौधृतिदीधितिवेधृविधातः
॥ १ ॥ आधिकबंधंरंधयबोधाच्छिंधिपिधानंबंधुरमद्धा ॥ केशवकेशवशासकवंदेपाशधरार्चितशू
रवरेश ॥ २ ॥ नारायणामलकारणवंदेकारणकारणपूर्णवरेण्य ॥ माधवमाधवसाधकवंदेबाधक
बोधकशुद्धसमाधे ॥ ३ ॥ गोविंदगोविंदपुरंदरवंदेस्कंदसुनंदनवंदितपाद ॥ विष्णोसृजिष्णो
ग्रसिष्णोविवंदेकृष्णसदुष्णवधिष्णोसुधृष्णो ॥ ४ ॥ मधुसूदनदानवसादनवंदेदैवतमोदितवेदि
तपाद ॥ त्रिविक्रमनिष्क्रमविक्रमवंदेसुक्रमसंक्रमहुंकृतवक्र ॥ ५ ॥ वामनवामनभामनवंदे
सामनसीमनशामनसानो ॥ श्रीधरश्रीधरशंधरवंदेभूधरवार्धरकंधरधारिन् ॥ ६ ॥ हृषीकेशसु
केशपरेशविवंदेशरणेशकलेशबलेशसुखेश ॥ पद्मनाभशुभोद्भववंदेसंभृतलोकभराभरभूरे ॥ ७ ॥
दामोदरदूरतरांतरवंदेदारितपारगपारपरस्मात्॥आनंदतीर्थमुनींद्रकृताहरिगीतिरियंपरमादरतः॥
परलोकविलोकनसूर्यनिभाहरिभक्तिविवर्धनशौंडतमा ॥ ८ ॥ इति श्रीद्वादशस्तोत्रे पंचमो

SGDF
Sri Gurgeshwari Digital Foundation

ध्यायः ॥ ५ ॥ ॐ मत्स्यकरूपलयोदविहारिन्वेदविनेतृचतुर्मुखवंद्य ॥ कूर्मस्वरूपकमंदरधा
रिन्लोकविधारकदेववरेण्य ॥ १ ॥ सूकररूपकदानवशत्रोभूमिविधारकयज्ञवरांग ॥ देवनृसिं
हहिरण्यकशत्रोसर्वभयांतकदैवतबंधो ॥ २ ॥ वामनवामनमाणववेषदैत्यवरांतककारणरूप ॥
रामभृगूद्वहसूर्जितदीप्तिक्षत्रकुलांतकशंभुवरेण्य ॥ ३ ॥ राघवराघवराक्षसशत्रोमारुतिवल्लभजा
नकीकांत ॥ देवकिनंदनसुंदररूपरुक्मिणिवल्लभपांडवबंधो ॥ ४ ॥ देवकिनंदननंदकुमारवृंदा
वनांचनगोकुलचंद्र ॥ कंदफलाशनसुंदररूपनंदितगोकुलवंदितपाद ॥ ५ ॥ इंद्रसुतावकनंद
कहस्तचंदनचर्चितसुंदरीनाथ ॥ इंदीवरोदरदलनयनमंदरधारिन्गोविंदवंदे ॥ ६ ॥ चंद्रशताननकुं
दसुहासनंदितदैवतानंदसुपूर्ण ॥ दैत्यविमोहकनित्यसुखादेदेवसुबोधकबुद्धस्वरूप ॥ ७ ॥ दुष्टकुलां
तककल्किस्वरूपधर्मविवर्धनमूलयुगादे ॥ नारायणामलकारणमूर्तेपूर्णगुणार्णवनित्यविबोध ॥ ८ ॥
सुखतीर्थमुनींद्रकृताहरिगाथापापहराशुभानित्यसुखार्था ॥ ९ ॥ इतिश्रीद्वादशस्तोत्रे षष्ठोऽध्यायः ॥ ६ ॥ ६१
ॐ विश्वस्थितिप्रलयसर्गमहाविभूतिवृत्तिप्रकाशनियमावृतिबंधमोक्षाः ॥ यस्याअपांगलवमात्रत
ऊर्जितासाश्रीर्यत्कटाक्षबलवत्यजितंनमामि ॥ १ ॥ ब्रह्मेशशक्ररविधर्मशशांकपूर्वगीर्वाणसंततिरियं

यदपांगलेशं ॥ आश्रित्यविश्वविजयंविसृजत्यचिंत्याश्रीर्यत्कटाक्षबलवत्यजितंनमामि ॥ २ ॥ धर्मार्थ
कामसुमतिप्रचयाद्यशेषसन्मंगलंविदधतेयदपांगलेशं ॥ आश्रित्यतत्प्रणतसत्प्रणताअपीड्याश्री
र्यत्कटाक्षबलवत्यजितंनमामि ॥ ३ ॥ षड्वर्गनिग्रहनिरस्तसमस्तदोषाध्यायंतिविष्णुमृषयोयदपांग
लेशं ॥ आश्रित्ययानपिसमेत्यनयातिदुःखंश्रीर्यत्कटाक्षबलवत्यजितंनमामि ॥ ४ ॥ शेषाहिवैरिशिवश
क्रमनुप्रधानचित्रोरुकर्मरचनंयदपांगलेशं ॥ आश्रित्यविश्वमखिलंविदधातिधाताश्रीर्यत्कटाक्षब
लवत्यजितंनमामि ॥ ५ ॥ शक्रोग्रदीधितिहिमाकरसूर्यसूनुपूर्वंनिहत्यनिखिलंयदपांगलेशं ॥
आश्रित्यनृत्यतिशिवःप्रकटोरुशक्तिः श्रीर्यत्कटाक्षबलवत्यजितंनमामि ॥ ६ ॥ तत्पादपंकजम
हासनतामवापशर्वादिवंद्यचरणोयदपांगलेशं ॥ आश्रित्यनागपतिरन्यसुरैर्दुरापांश्रीर्यत्कटाक्षब
लवत्यजितंनमामि ॥ ७ ॥ नागारिरुग्रबलपौरुषआपविष्णोवाहत्वमुत्तमजवोयदपांगलेशं ॥
आश्रित्यशक्रमुखदेवगणैरचिंत्यंश्रीर्यत्कटाक्षबलवत्यजितंनमामि ॥ ८ ॥ आनंदतीर्थमुनिस
न्मुखपंकजोत्थंसाक्षाद्रमाहरिमनःप्रियमुत्तमार्थं ॥ भक्त्यापठत्यजितमात्मनिसन्निधाय यःस्तोत्र
मेतदभियातितयोरभीष्टं ॥ ९ ॥ इति श्रीद्वादशस्तोत्रे सप्तमोऽध्यायः ॥ ७ ॥ ॐ वंदिताशे

SGDF

आ० षत्वंद्योरुवृंदारकंचंदनाचर्चितोदारपीनांसकं ॥ इंदिराचंचलापांगनीराजितंमंदरोद्धारिवृत्तोद्भु प०
६२ जाभोगिनं ॥ प्रीणयामोवासुदेवंदेवतामंडलाखंडमंडनं ॥ १ ॥ सृष्टिसंहारलीलाविलासाततंपु
ष्टषाड्गुण्यसद्विग्रहोल्लासिनं ॥ दुष्टनिःशेषसंहारकर्मोद्यतंहृष्टपुष्टानुशिष्टप्रजासंश्रयं ॥ प्रीणयामो
वासुदेवंदेवतामंडलाखंडमंडनं ॥ २ ॥ उन्नतप्रार्थिताशेषसंसाधकंसन्नतालौकिकानंददश्रीपदं ॥
भिन्नकर्माशयप्राणिसंप्रेरकंतन्नकिंन्नेतिविद्वत्सुमीमांसितं ॥ प्रीणयामोवासुदेवं० ॥ विप्रमुख्यैः
सदावेदवादोन्मुखैःसुप्रतापैःक्षितीशेश्वरैश्चार्चितं ॥ अप्रतर्क्योरुसंविद्गुणंनिर्मलंसुप्रकाशाजरानं
दरूपंपरं ॥ प्री० ॥ ४ ॥ अत्ययोयस्यकेनापिनक्वापिहिप्रत्ययोयद्गुणेषूत्तमानांपरः ॥ सत्य
संकल्पएकोवरेण्योवशीमत्यनूनैःसदावेदवादोदितः ॥ प्रीण० ५ ॥ पश्यतांदुःखसंताननिर्मूल
नंदृश्यतांदृश्यतामित्यजेशार्चितं ॥ नश्यतांदूरगंसर्वदाप्यात्मगंवश्यतांस्वेच्छयासज्जनेष्वागतं॥
प्री० ॥ ६ ॥ अग्रजंयःससर्जाजमग्र्याकृतिंविग्रहोयस्यसर्वेगुणाएवहि ॥ उग्रआद्योपियस्या ६२
त्मजाग्र्यात्मजःसद्गृहीतःसदायःपरंदैवतं ॥ प्री० ॥ ७ ॥ अच्युतोयोगुणैर्नित्यमेवाखिलैःप्रच्यु
तोशेषदोषैःसदापूर्तितः ॥ उच्यतेसर्ववेदोरुवादैरजःस्वर्चितोब्रह्मरुद्रेंद्रपूर्वैःसदा ॥ प्री० ॥ ८ ॥

SGDF
Sri Gangeshwari Digital Foundation

धार्यतेयेनविश्वंसदाजादिकंवार्यतेशेषदुःखंनिज़ध्यायिनां ॥ पार्यतेसर्वमन्यैर्नयत्पार्यतेकार्यतेचा
खिलंसर्वभूतैःसदा ॥ प्री० ॥ ९ ॥ सर्वपापानियत्संस्मृतेः संक्षयंसर्वदायांतिभक्त्याविशुद्धात्म
नां ॥ शर्वगुर्वादिगीर्वाणसंस्थानदःकुर्वतेकर्मयत्प्रीतयेसज्जनाः ॥ प्रीणयामो० ॥१० ॥ अक्षयं
कर्मयस्मिन्परेस्वर्पितंप्रक्षयंयांतिदुःखानियन्नामतः ॥ अक्षरोयोजरःसर्वदैवामृतःकुक्षिगंयस्यवि
श्वंसदाजादिकं ॥ प्री० ॥ ११ ॥ नंदितीर्थोरुसन्नामिनोनंदिनःसंदधानाःसदानंददेवेमतिं ॥
मंदहासारुणापांगदत्तोन्नतिंनंदिताशेषदेवादिवृंदंसदा ॥ प्रीणयामोवासुदेवंदेवतामंडलाखंडमं
डनं ॥ १२ ॥ इत्यष्टमोध्यायः ॥ ८ ॥ ॥ ॐ अतिमततमोगिरिसमितिविभेदनपिता
महभूतिदगुणगणनिलय ॥ शुभतमकथाशयपरमसदोदितजगदेककारणरामरमारमण ॥ १ ॥
विधिमुखसुरततिसततसुवंदितरमामनोवल्लभभवममशरणं ॥ शुभतमकथाशयपरम० ॥ २ ॥
अगणितगुणगणमयशरीरहेविगतगुणेतरभ० ॥ शु० ॥ ३ ॥ अपरिमितसुखनिधिविमलसुदे
हहेविगतसुखेतरभ० ॥ शु० ॥ ४ ॥ प्रचलितलयजलविहरणशाश्वतसुखमयमीनहेभ० ॥ ५ ॥
सुरदितिजसुबलविलुलितमंदरधरपरकूर्महेभ० ॥ शुभ० ॥ ६ ॥ सगिरिवरधरातलवहसुसूकर

SGDF
Sri Gangadharan Digital Foundation

126

आ० परमविबोधहेभ० ॥ शु० ॥ ७ ॥ अतिबलदितिसुतहृदयविभेदनजयनृहरेभ० ॥ शु० ॥ ८ ॥ प०
६३ बलिमुखदितिसुतविजयविनाशनजगदवनाजितभ० ॥ शुभ० ॥ ९ ॥ अविजितकुनृपतिस
मितिविखंडनरमावरवीरपभ० ॥ शु० ॥ १० ॥ खरतरनिशिचरदहनपरामृतरधुवरमानदभ० ॥
॥ शु० ॥ ११ ॥ सुललिततनुवरवरदमहाबलयदुवरपार्थपभ० ॥ शु० ॥ १२ ॥ दितिसुतमो
हनविमलविबोधनपरगुणबुद्धहेभ० ॥ शु० ॥ १३ ॥ कलिमलहुतवहसुभगमहोत्सवशरणदक
ल्कीशभ० ॥ शु० ॥ १४ ॥ अखिलजनिविलयपरसुखकारणपरपुरुषोत्तमभ० ॥ शु० ॥ १५ ॥
इतितवनुतिवरसततरतेर्भवसुशरणमुरुसुखतीर्थमुनेर्भगवन् ॥ शुभतमक० ॥ १६ ॥ इति श्री
द्वादशस्तोत्रे नवमोऽध्यायः ॥ ९ ॥ ॐ अवनःश्रीपतिरप्रतिरधिकेशादिभवादे ॥ करुणापूर्ण
वरप्रदचरितंज्ञापयमेते ॥१॥ सुरवंद्याधिपसद्वरभरिताशेषगुणालं ॥ करुणापूर्ण०॥२॥ सकलध्वां
तविनाशकपरमानंदसुधाहो ॥ क० ॥ ३ ॥ त्रिजगत्पोतसदार्चितचरणाशापतिधातो ॥ ६३
क० ॥ ४ ॥ त्रिगुणातीतविधारकपरितोदेहिसुभक्तिं ॥ क० ॥ ५ ॥ शरणंकारणभावनभवमे
तातसदालं ॥ क० ॥ ६ ॥ मरणप्राणदपालकजगदीशावसुभक्तिं॥ क०॥ ७ ॥ तरुणादित्यस

127

वर्णकचरणाब्जामलकीर्ते ॥ क० ॥ ८ ॥ सलिलप्रोत्थसरागकमणिवर्णोच्चनखादे ॥ क० ॥९॥
कजतूणीनिभपावनवरजंघाभितशक्ते ॥ क० ॥ १० ॥ इभहस्तप्रभशोभनपरमोरःस्थलमाले ॥
क० ॥ ११ ॥ असनोत्फुल्लसुपुष्पकसमवर्णावरणांते ॥ क० ॥ १२ ॥ शतमोदोद्भवसुंदरवर
पद्मोत्थितनाभे ॥ क० ॥ १३ ॥ जगदंबामलसुंदरगृहवक्षोवरयोगिन् ॥ क० ॥ १४ ॥ जग
दागूहकपल्लवसमकुक्षेशरणादे ॥ क० ॥ १५ ॥ दितिजांतप्रदचक्रदरगदायुग्वरबाहो ॥ क०
॥ १६ ॥ परमज्ञानमहानिधिवंदनश्रीरमणेंदो ॥ क० ॥ १७ ॥ निखिलाघौघविनाशकपरसौ
ख्यप्रददृष्टे ॥ क० ॥ १८ ॥ परमानंदसुतीर्थसुनिराजोहरिगाथां ॥ कृतवान्नित्यसुपूर्णैकपरमा
नंदपदैषी ॥ १९ ॥ इति श्रीद्वादशस्तोत्रे दशमोऽध्यायः ॥ १० ॥ ॐ उदीर्णमजरंदिव्यममृ
तस्यंद्यधीशितुः ॥ आनंदस्यपदंवंदेब्रह्मेंद्राद्यभिवंदितं ॥ १ ॥ सर्ववेदपदोद्गीतमिंदिरावासमु
त्तमं ॥ आनं० ॥ २ ॥ सर्वदेवादिदेवस्यविदारितमहत्तमः ॥ आनं० ॥ ३ ॥ उदारमादरा
न्नित्यमनिंद्यंसुंदरीपतेः ॥ आनं० ॥ ४ ॥ इंदीवरोदरनिभंसुपूर्णंवादिमोहदं ॥ आनं० ॥ ५ ॥
दातृसर्वामरैश्वर्यविमुक्त्यादेरहोवरं ॥ आनं० ॥ ६ ॥ दूराद्दूरतरंयत्तुतदेवांतिकमंतिकात् ॥

SGDF
Sri Durgeshwari Digital Foundation

आनं० ॥ ७ ॥ पूर्णसर्वगुणैकार्णमनाद्यंतंसुरेशितुः ॥ आनं० ॥ ८ ॥ आनंदतीर्थमुनिनाहरे
रानंदरूपिणः ॥ कृतंस्तोत्रमिदंपुण्यंपठन्नानंदतामियात् ॥ ९ ॥ इति श्रीद्वादशस्तोत्रे एका
दशोध्यायः ॥ ११ ॥ ॐ आनंदमुकुंदारविंदनयन ॥ आनंदतीर्थपरानंदवरद ॥१॥ सुंदरीमं
दिरगोविंदवंदे॥आनंदतीर्थपरानंदवरद॥२॥चंद्रसुरेंद्रसुवंदितवंदे॥ आनंदतीर्थपरानंदवरद ॥३॥
चंद्रकमंदिरनंदकवंदे॥आनंदतीर्थपरानंदवरद॥४॥वृंदारकवृंदसुवंदितवंदे ॥ आनंदतीर्थपरानंद
वरद॥५॥मंदारसूनसुचर्चितवंदे॥आनंदतीर्थपरानंदवरद॥६॥ इंदिरानंदकसुंदरवंदे॥आनंदतीर्थ
परानंदवरद॥७॥मंदिरस्यंदनस्यंदकवंदे॥ आनंदतीर्थपरानंदवरद॥८॥आनंदचंद्रिकास्यंदकवंदे॥
आनंदतीर्थपरानंदवरद॥९॥इति श्रीमदा०भगवत्पादा०श्रीद्वादशस्तोत्रे द्वादशोध्यायः ॥१२॥
अथ नैवेद्यादिमंत्रपुष्पांतोपचाराः ॥ देवस्याग्रेमंडलंकृत्वोपरिरंगवल्या श्रीबीजंविलिख्य नैवे
द्यंस्थाप्य तुलसीदलंनिधाय पानीयोदकंतांबूलंचस्थाप्य पृथगुदकंनैवेद्यार्थं शंखेनिधाय
धेनुमुद्रादिकंप्रदर्श्य तदुदकंहस्तेगृहीत्वा मूलमंत्रेणाभिमंत्र्य ॐ भूर्भुवःस्वरितिमंत्रेण नैवे
द्योपरिप्रोक्ष्य सौवर्णैःस्थालिवर्यैर्मणिगणखचितैर्गोघृताक्तान्सुपक्वान् भक्षान्भोज्यांश्चलेह्या

SGDF
Sri Gangeshwari Digital Foundation

नपिसकलमहांश्चोष्यमन्नंनिधाय ॥ नानाशाकैरुपेतंदधिमधुसुघृतं क्षीरपानीययुक्तं तांबूलं चापिविष्णोः प्रतिदिवसमहंमानसेचिंतयामि ॥ श्रीनिवासनमस्तुभ्यंमहानैवेद्यमुत्तमं ॥ संग्रहाणसुरश्रेष्ठ भुक्तिमुक्तिप्रदायक ॥ सत्यंत्वर्तेनपरिषिंचामि ॥ सुधारसंसुविपुलमापोशनमिदंतव ॥ ग्रहाणकलशानीतंयथेष्टमुपभुज्यताम् ॥ अमृतोपस्तरणमसिस्वाहा ॥ ॐ प्राणात्मनेअनिरुध्धायस्वाहा ॐ अपानात्मनेप्रद्युम्नायस्वाहा ॐ व्यानात्मनेसंकर्षणायस्वाहा ॐ उदानात्मनेवासुदेवायस्वाहा ॐ समानात्मनेनारायणायस्वाहा ॐ ब्रह्मणेस्वाहा॥ ॐ मधुवाता०॥ स्वादुःपवस्व० ॥ भोजंत्वामिंद्रवयंहुवेमददिष्टमिंद्रापांसिवाजान् ॥ अविड्ढींद्रचित्रायांनउती कृधिवृषन्निंद्रवस्यसोनः ॥ मध्येपानीयंसमर्पयामि ॥ ॐ नमोनारायणाय ॐ १०८ नैवेद्यंसमर्पयामि उत्तरापोशनं० हस्तप्रक्षालनं० मुखप्रक्षालनं० करोद्वर्तनार्थेचंदनं०॥ पूगीफलंमहद्दिव्यंनागवल्लीदलैर्युतं ॥ खदिरादिसमायुक्तं तांबूलंप्रतिगृह्यतां ॥ तांबूलंसमर्पयामि ॥ हिरण्यगर्भगर्भस्थंहेमबीजंविभावसो ॥ अनंतपुण्यफलदमतःशांतिंप्रयच्छमे ॥ सुवर्णपुष्पदक्षिणांसमर्पयामि ॥ महार्तिक्यदीपं ॥ ॐ श्रियःपत्येनित्यागणितगुणमाणिक्यविशदप्रभाजालोल्लासोपहत

SGDF
Sri Gangeshwari Digital Foundation

सकलावद्यतमसे ॥ जगज्जन्मस्थेमप्रलयरचनाशीलवपुषे नमोशेषाम्नायस्मृतिहृदयदीसायहर ये ॥ अर्चंतप्रार्चतप्रियमेधासोअर्चता ॥ अर्चं तुपुत्रकाउतपुरंनधृष्णवर्चत ॥ संसृष्टं० ॥ महा र्तिक्यदीपंस० ॥ नमोमहद्भ्योनमोअर्भकेभ्योनमोयुवभ्योनमआशिनेभ्यः ॥ यजामदेवान्य दिशक्नवाममाज्यायसः शंसमावृक्षिदेवाः ॥ ॐ राजाधिराजायप्रसह्यसाहिने नमोवयंवैश्रवणाय कुर्महे समेकामान्कामकामायमह्यं कामेश्वरोवैश्रवणोददातु कुबेरायवैश्रवणाय महारा जायनमः ॐ स्वस्ति साम्राज्यंभौज्यं स्वाराज्यं वैराज्यं पारमेष्ठ्यं राज्यं महाराज्यमाधिपत्यम यंसमंतपर्यायायीस्यात्सार्वभौमः सार्वायुषआंतादापरार्धात्पृथिव्यैसमुद्रपर्यंतायाएकराळिति तद प्येषश्लोकोभिगीतोमरुतःपरिवेष्टारो मरुत्तस्यावसन्गृहे आविक्षितस्यकामप्रेर्विश्वेदेवाःसभासद इति ॥ मंत्रपुष्पंसमर्पयामि ॥ ॐ नमोनारायणायछत्रचामरादिसमस्तराजोपचारान्समर्पया मि ॥ ॥ अथ शंखभ्रमणं ॥ शुद्धोदकेनशंखमापूर्य पादादिमुकुटपर्यंतं नाभ्यादिमुकु टपर्यंतं हृदयादिमुकुटपर्यंतं प्रादक्षिण्येनत्रिरावृत्याभ्रामयेत् तदुदकं पात्रेनिदध्यात् शंखंस्था प्य ॥ ॐ बलि० ॥ ॥ अथ तारतम्यस्तोत्रं ॥ ॐ विष्णुःसर्वोत्तमोथप्रकृतिरथविधिप्राण

नाथावथोक्तेब्रह्माणीभारतीचद्विजफणिपमृडाश्चस्त्रियःषट्चविष्णोः ॥ सौपर्णीवारुणीपर्वतपति तनयाचेंद्रकामावथास्मान्प्राणोथोयोनिरुद्धो रतिमनुगुरवोदक्षशच्यौचपांतु ॥ १ ॥ त्रायंतांनः सदैतेप्रवहउतयमोमानवीचंद्रसूर्यौ चापोथोनारदोथोभृगुरनलकुलेंद्रःप्रसूतिश्चनित्यं ॥ विश्वामि त्रोमरीचिप्रमुखविधिसुताः सप्तवैवस्वताख्याश्चैवंवैमित्रतारेवरनिर्ऋतिनामाप्रावहीचप्रसन्ना ॥२॥ विष्वक्सेनोश्विनौतौगणपतिधनपावुक्तशेषाः शतस्थादेवाश्चोक्तेतरायेतदवरमनवश्चावनोचथ्य संज्ञौ ॥ वैन्योयःकार्तवीर्यःक्षितिपतिशशिबिंदुः प्रियादिव्रतोथोगंगापर्जन्यसंज्ञेशाशियमदयिते माविराट्चाशुपांतु ॥ ३ ॥ येभ्योन्येवाभिजायाचजलमयबुधश्चापिनामात्मिकोषाचैवंभूमौ ततात्माशनिरापिकथितःपुष्करःकर्मपोपि ॥ येथाथोचाप्युतानामिहकथितसुरामध्यभागेसमास्ते विष्ण्वाद्यानःपुनंतुक्रमगदितमहातारतम्येनयुक्ताः ॥ ४ ॥ ॥ ॥ अथ तारतम्योपनिषत् ॥ अथातोविष्णुर्ब्रह्मावायुःशेषगरुडरुद्राःपुरंदरकामौप्राणोनिरुद्धोमनु गुरुदक्षाः प्रवहोयमधर्मश्चंद्रसूर्यौवरुणोनारदोभृगुरनलोविश्वामित्रोमरीच्यादयोविधिपुत्रावैवस्व तोमित्रोनिर्ऋतिर्विष्वक्सेनोश्विनोश्विनौगणपतिधनपौदेवाश्चेतरामनवश्चावनोचथ्यौवैन्यः का

SGDF
Sri Gurgasthan Digital Foundation

 तंवीर्यःशशिबिंदुःपर्जन्योबुधःशनिः पुष्करएतेषांपत्नयोलक्ष्मीःसावित्रीभारतीविष्णोःषण्महिष्यो
नीलाभद्रामित्रविंदाकालिंदीलक्षणाजांबवत्योवारुणीसौपर्णीपार्वती रतिशच्यौमानवीप्रसूतिता
रैंद्रावर्हीगंगाशशियमदयिते विराडभिजायेउषाद्याःसर्वसतीःसर्वदामंगलंकुर्वंत्वितियएवंवेद॥१॥
अथ रमाब्रह्मवाय्वादिभ्यस्तीर्थादिसमर्पणं ॥ ॥ ॐ रमायैनमः ब्रह्मणेनमः तत्वज्ञायनमः
वैष्णवाचार्यायनमः व्यासशिष्यायनमः यतीश्वरायनमः पूर्णप्रज्ञायनमः ॐ ज्ञानदात्रेनमः म
ध्वायनमः ध्वस्तदुरागमायनमः आनंदतीर्थायनमः शब्नाम्नेनमः जितवादिनेनमः जितेंद्रि
यायनमः श्रीमदानंदतीर्थभगवत्पादाचार्येभ्योनमः ॥ रमाब्रह्मादयोदेवाःसनकाद्याः शुकाद
यः ॥ श्रीनृसिंहप्रसादोयंसर्वेगृह्णंतुवैष्णवाः ॥ इतिनैवेद्यं आर्तिक्यसमर्पणंच ॥ सालग्रामशि
लास्पर्शयेकुर्वंतिदिनेदिने ॥ वांछंतिकरसंस्पर्शंतेषांदेवाःसवासवाः ॥ ॥ अथ भगवत्प्रार्थना
दिकं पूजायाःभगवतिसमर्पणंच ॥ याचेहंत्वांहृषीकेशनमामिपुरुषोत्तम ॥ हृदिमेकुरुसंवासं
श्रियासहजगत्पते ॥ जितंतेपुंडरीकाक्षपूर्णषाड्गुण्यविग्रह ॥ परानंदपरब्रह्मन्नमस्तेचतुरात्मने ॥
नमस्तेपीतवसननमःकटकहारिणे ॥ नमोनीलालकाबद्धवेणीसुंदरपुंगव ॥ याचेहंकरुणासिंधो

SGDF
Sri Gargeshwari Digital Foundation

यावज्जीवमिदंतव ॥ अदैन्यंदेहदार्ढ्यंमेत्वत्पादांबुजसद्रतिं ॥ मातर्नमामिकमलेकमलासनाद्यै
र्देवैःपदांबुजयुगंतवसेंद्ररुद्रैः ॥ आराधितंविविधभूरुहदिव्यपुष्पैर्मांरक्षरक्षवितरस्वममेप्सितार्था
न् ॥ इति देवींततोनत्वाअनंतगरुडादिकान् ॥ अन्यांश्चवैष्णवान्नत्वाकृतार्थोस्मीतिर्चिंतयेत् ॥
उरसाशिरसादृष्ट्यामनसावचसातथा ॥ पद्भ्यांकराभ्यांजानुभ्यांप्रणामोष्टांगईरितः ॥ शाठ्येना
पिनमस्कारंकुर्वतःशार्ङ्गपाणये ॥ शतजन्मार्जितंपापंनश्यत्येवनसंशयः ॥ यत्करोषियदश्नासिय
ज्जुहोषिददासियत् ॥ यत्तपस्यसिकौंतेयतत्कुरुष्वमदर्पणं॥यस्यस्मृत्याचनामोक्त्यातपःपूजाक्रि
यादिषु॥न्यूनंसंपूर्णतां०॥ अनेन श्रीवासुदेवस्यषोडशोपचारपूजनेन भगवान् श्रीमदनंतात्मक
श्रीलक्ष्मीनृसिंहः प्रीयतां ॥ श्रीकृष्णार्पणमस्तु ॥ ॥ अथऋग्वेदिनांवैश्वदेवः ॥ केशव २४
प्रणवस्य०वस्वरोम्॥पूर्वोच्चारित एवंगुण विशे०श्रीहरिणीपतिपरशुरामप्रीत्यर्थं सायंप्रातर्वैश्वदेवा
ख्यंकर्मकरिष्ये॥जुष्टोदमूनाआत्रेयोवसुश्रुतोग्निस्त्रिष्टुप् । एह्यग्नेराहुगणोगौतमोग्निस्त्रिष्टुप् अग्न्या
वाहनेविनियोगः॥ ॐ जुष्टोदमूनाअतिथिर्दुरोणइमंनोयज्ञमुपयाहिविद्वान् विश्वाअग्नेअभियुजो
विहत्याशत्रूयतामाभराभोजनानि ॥ एह्यग्नइहहोतानिषीदादब्धःसुपुरएताभवानः ॥ अवतांत्वा

SGDF Sri Gargeshwari Digital Foundation

आ० रोदसीविश्वमिन्वेयजांमहेसौं मनसायंदेवान्॥ ॐ भूर्भुवःस्वरोमरुक्मकनामाग्निंप्रतिष्ठापयामीत्य प०
६७ ग्निंप्रतिष्ठाप्य ॥ चत्वारिशृंगागौतमोवामदेवोग्निस्त्रिष्टुप् अग्निमूर्तिध्यानेविनियोगः॥ ॐ च
त्वारिशृंगात्रयोअस्यपादाद्वेशीर्षेसप्तहस्तासोअस्य॥ त्रिधाबद्धोवृषभोरोरवीति महोदेवोमर्त्यांआ
विवेश ॥ स्मृतिमंत्राश्च ॥ सप्तहस्तश्चतुशृंगःसप्तजिह्वोद्विशीर्षकः॥ त्रिपात्प्रसन्नवदनःसुखासीनःशु
चिस्मितः॥स्वाहांतुदक्षिणेपार्श्वेदेवींवामेस्वधांतथा॥बिभ्रद्दक्षिणहस्तैस्तुशक्तिमन्नंस्रुचंस्रुवं ॥ तोमरं
व्यजनंवामेघृतपात्रंचधारयन्॥ मेषारूढोजटाबद्धोगौरवर्णोमहौजसः॥ धूम्रध्वजोलोहिताक्षःसप्ता
र्चिःसर्वकामदः ॥ आत्माभिमुखमासीनएवंरूपोहुताशनः ॥ एषहिदेवःप्रदिशोनुसर्वाःपूर्वोहि
जातः सउगर्भेअंतः सविजायमानः सजनिष्यमाणः प्रत्यङ्मुखस्तिष्ठतुविश्वतोमुखः अग्नेशांडि
ल्यगोत्रवैश्वानरमेषारूढवरप्रदप्राङ्मुखोदेवाग्नेममसंमुखोभव ॥ परिषेचनं ॥ विश्वानिनइत्यन
योर्वसुश्रुतोग्निस्त्रिष्टुप् अग्न्यर्चनेविनियोगः ॥ ॐ विश्वानिनोदुर्गहाजातवेदःसिंधुंननावादुरि ६७
तातिपर्षि अग्नेअत्रिवन्नमसागृणानो ३ स्माकंबोध्यविताततूनां यस्त्वाहृदाकीरिणामन्यमानो
मर्त्यंमर्त्योजोहवीमि ॥ जातवेदोयशोअस्मासुधेहि प्रजाभिरग्नेअमृतत्वमश्यां ॥ यस्मैत्वंसुकृते

जातवेदउलोकमग्नेकृणवस्योनं ॥ अश्विनंसपुत्रिणंवीरवंतंगोमंतंरयिंनशतेस्वस्ति ॥ हस्तंप्रक्षा
ल्य आत्मानंचालंकृत्य आचार्याहुतेरनुज्ञा सुहुतमस्तु ॥ ॐ नमोनारायणायस्वाहा नारायणा
येदं ८ ॐ क्लीं कृष्णायस्वाहा कृष्णायेदं ६ ॐ सूर्यायस्वाहा सूर्यायेदं ॐ प्रजापतयेस्वाहा
प्रजापतयइदं ॐ अग्नयेस्वाहा अग्नयइदं ॐ प्रजापतयेस्वाहा प्रजापतयइदं ॐ सोमायवन
स्पतयेस्वाहा सोमायवनस्पतयइदं ॐ अग्निषोमाभ्यांस्वाहा अग्निषोमाभ्यामिदं ॐ इंद्राग्निभ्यां
स्वाहा इंद्राग्निभ्यामिदं ॐ द्यावापृथिवीभ्यांस्वाहा द्यावापृथिवीभ्यामिदं ॐ धन्वंतरयेस्वाहा
धन्वंतरयइदं ॐ इंद्रायस्वाहा इंद्रायेदं ॐ विश्वेभ्योदेवेभ्यःस्वाहा विश्वेभ्योदेवेभ्यइदं ॐ ब्र
ह्मणेस्वाहा ब्रह्मणइदं ॥ वैश्वदेवसाद्गुण्यार्थं व्याहृतिभिर्होष्ये ॥ ॐ भूःस्वाहाअग्नये श्रीअनि
रुद्धायेदं ॐ भुवःस्वाहा वायवे श्रीप्रद्युम्नायेदं ॐ स्वःस्वाहा सूर्यायश्रीसंकर्षणायेदं ॐ भू
र्भुवःस्वःस्वाहा प्रजापतये श्रीवासुदेवायेदं। परिषिच्य ॥ अथोपस्थानं ॥ ॐ नमस्वरश्चमेयज्ञो
पचतेनमश्च ॥ यत्तेन्यूनंतस्मैतउपयत्तेतिरिक्तंतस्मैतेनमः ॥ अग्नयेनमः ॐ स्वस्ति श्रद्धांमे
धांयशःप्रज्ञांविद्यांबुद्धिंश्रियंबलं ॥ आयुष्यंतेजआरोग्यंदेहिमेहव्यवाहन श्रीदेहिमेहव्यवाहन

SGDF
Sri Gurgebhani Digital Foundation

तेनमः ॥ यस्य० ॥ अनेन वैश्वदेवहोमेन भगवान् अग्न्यंतर्गतहरिणीपतिपरशुरामःप्रीयतां
प्रीतोभवतु ॥ श्रीकृष्णार्पणमस्तु ॥ ॥ अथ ऋग्वेदिनांबलिहरणं ॥ वर्तुलमंडलोपरिभूत
यज्ञेनयक्ष्ये ॥ १ सूर्यायस्वाहा सूर्यायेदं० एवंतत्तन्मत्रेण सर्वत्रत्यागः २ प्रजापतयेस्वाहा ३
अग्नयेस्वाहा ४ प्रजापतयेस्वाहा ५ सोमायवनस्पतयेस्वाहा ६ अग्नीषोमाभ्यांस्वाहा ७ इंद्रा
ग्निभ्यांस्वाहा ८ द्यावापृथिवीभ्यांस्वाहा ९ धन्वंतरयेस्वाहा १० इंद्रायस्वाहा ११ विश्वेभ्यो
देवेभ्यःस्वाहा १२ ब्रह्मणेस्वाहा १३ अद्भ्यःस्वाहा १४ औषधिवनस्पतिभ्यःस्वाहा १५
गृहायस्वाहा १६ गृहदेवताभ्यःस्वाहा १७ वास्तुदेवताभ्यःस्वाहा १८ इंद्रायस्वाहा १९ इंद्र
पुरुषेभ्यःस्वाहा २० यमायस्वाहा २१ यमपुरुषेभ्यःस्वाहा २२ वरुणायस्वाहा २३ वरुणपु
रुषेभ्यःस्वाहा २४ सोमायस्वाहा २५ सोमपुरुषेभ्यःस्वाहा २६ ब्रह्मणेस्वाहा २७ ब्रह्मपुरुषे
भ्यःस्वाहा २८ विश्वेभ्योदेवेभ्यःस्वाहा २९ सर्वेभ्योभूतेभ्यःस्वाहा ३० दिवाचारिभ्यःस्वा
हा ३१ नक्तंचारिभ्यःस्वाहा ३२ रक्षोभ्यःस्वाहा ३३ प्राचीनावीति पितृभ्यःस्वधा ॥ उद
कस्पर्शः। सव्यं। ३४ श्यामायस्वाहा ३५ शबलायस्वाहा ३६ सनकादिमनुष्येभ्योहंत ॥

SGDF
Sri Gangadhar Digital Foundation



SGDF
Sri Gargeshwari Digital Foundation

येभूताःप्रचरंतिदिवानक्तंबलिमिच्छंतोवितुदस्यप्रेष्याः ॥ तेभ्योबलिंपुष्टिकामोहरामिमयिपुष्टिंपु
ष्टिपतिर्ददातुस्वाहा ॥ ऐंद्रवारुणवायव्यायाम्यनैर्ऋतिकाश्चये ॥ तेकाकाःप्रतिगृण्हंतुभूम्यांपिंडं
मयोज्झितं ॥ श्वचांडालभूतपतितवायसेभ्यः अन्नंभूमौविकिरयेत् ॥ पादौप्रक्षाल्य आचामेत्
अक्षयंकर्मयस्मि० देवतामंडलाखंडमंडनं ॥ ॥ ॥ ॥
अथयजुर्वेदिनांवैश्वदेवः । केशव० २४ ॥ श्रीविष्णुप्रीत्यर्थंअन्नसंस्कारार्थंआत्मसंस्कारार्थंपंच
सूनादोषपरिहारार्थंप्रातःसायंवैश्वदेवाख्यंकर्मएकतंत्रेणकरिष्ये । कुंडेस्थंडिलेवा । ॐ भूर्भुवः
सुवरोमित्यग्निंप्रतिष्ठाप्य । ॐ चत्वारिशृंगात्रयोअस्यपादाद्वेशीर्षेसप्तहस्तासोअस्य । त्रिधाब
द्धोवृषभोरोरवीतिमहोदेवोमर्त्यां॑आविवेश । स्मृतिमंत्राश्च । सप्तहस्तश्चतुःशृंगःसप्तजिव्हो
द्विशीर्षकः । त्रिपात्प्रसन्नवदनःसुखासीनःशुचिःस्मितः । स्वाहांतुदक्षिणेपार्श्वेदेवींवामेस्वधांत
था । बिभ्रद्दक्षिणहस्तैस्तुशक्तिमन्नंस्त्रुचंस्त्रुवं । तोमरंव्यजनंवामेघृतपात्रंचधारयन् । मेषारूढोज ६९
टाबद्धोगौरवर्णोमहौजसः । धूम्रध्वजोलोहिताक्षःसप्तार्चिःसर्वतोमुखः । आत्माभिमुखमासीन
मेवंध्यायेद्धुताशनं । ॐ एषहिदेवःप्रदिशोनुसर्वाःपूर्वोहिजातःसउगर्भे अंतः। सविजायमानः

सजनिष्यमाणःप्रत्यङ्मुखस्तिष्ठतुविश्वतोमुखः । ॐ प्राङ्मुखोदेवाग्नेममसंमुखोभव । शुद्धो
दकेनगायत्र्यादक्षिणहस्तेनाग्निमभितःप्रदक्षिणंत्रिःपरिमृज्य । ॐ तत्सवितुर्वरेण्यंभर्गोदेवस्य
धीमहि । धियोयोनःप्रचोदयात् । इतिपरिषिच्य । त्रिस्त्रिःसंमार्ष्टि । त्रियावृतिधियज्ञः । अथो
मेध्यत्वाय । ॐ अग्नयेनमः । हुतवाहनायनमः । हुताशनायनमः । कृष्णवर्त्मनेनमः ।
देवमुखायनमः । सप्तजिव्हायनमः । वैश्वानरायनमः । जातवेदसेनमः । ॐ यज्ञपुरुषांतर्या
मिश्रीपरशुरामायनमः । इतिमंत्रेणअष्टदिक्षुमंत्राक्षतादिभिःपूजयेत् । अदितेनुमन्यस्व । अनु
मतेनुमन्यस्व । सरस्वतेनुमन्यस्व । देवसवितुःप्रसुव । इतिअग्निंपरिषिच्य । ॐ अंगारवर्णम
भितोंऽबहिःप्रभाभिर्व्याप्तंपरश्वधधनुर्धरमेकवीरं । ध्यायेदजेशपुरुहूतमुखैःस्तुवद्भिरावीतमात्मप
दवींप्रतिपादयंतं । संहर्तासर्वदोषाणामग्निस्थःसर्वदाहकः । नित्यानंदोग्निवर्णश्चरामःपरशुभृ
त्सखा । इतिध्यात्वा । जातस्याग्नेर्गर्भाधानपुंसवनजातकर्मनामकर्णान्नप्राशनचौलोपनय
नप्राजापत्यसौमनस्यमहानाम्नीवैश्वदेवव्रतचतुष्टयगोदानस्नातकविवाहाख्यपंचदशसंस्कारार्थं
आज्येनव्याहृतिहोमंहोष्ये। ॐ भूःस्वाहाअग्नयेअनिरुधाय इदंनमम । ॐ भुवः स्वाहावायवेप्र

SGDF ... Foundation

आ० द्युम्नायइदंनमम। ॐस्सुवःस्वाहासूर्यायसंकर्षणायइदंनमम । ॐभूर्भुवःस्सुवःस्वाहाप्रजापतयेश्री प०
७० वासुदेवायइदंनमम । अष्टावष्टाक्षरेणैवद्वादशद्वादशाक्षरैः । प्रत्यृचंपुरुषसूक्तेनविष्णोःषडक्षरेण
षट् । ॐ नमोनारायणाय० । नारायणायेदं ॥ ८ ॥ ॐ नमोभगवतेवासुदेवायस्वा
हा । वासुदेवायेदं० । १२ । ॐ सहस्रशीर्षा० संतिदेवाः स्वाहा । पुरुषायेदं । १८ ।
ॐ विष्णवेस्वाहा । विष्णव० ६ । परिषिच्य । अथ वैश्वदेवप्रातराहुतयः । सूर्यायस्वाहा सू
र्याये० । विश्वेभ्योदेवेभ्यःस्वाहा । विश्वेभ्यो० । ध्रुवायभूमायस्वाहा । ध्रुवाय० । ध्रुवक्षितये
स्वाहा । ध्रुवक्षि० । अच्युतक्षितयेस्वाहा । अच्युत० । अग्नयेस्विष्टकृतयेस्वाहा । अग्न० । प
रिषिच्य । अथसायमाहुतयः । ॐ अग्नयेस्वाहा । अग्नयइ० । विश्वेभ्यइतिस्विष्टकृतांतंपूर्वव
त्पंचाहुतीर्जुहुयात् ॥ परिषिच्य ॥ वैश्वदेवसाद्गुण्यार्थंव्याहृतिहोमंहोष्ये । ॐ भूःस्वाहेतिपूर्वव
ज्जुहुयात् । उत्तरंपरिषिच्य । अदितेन्वमꣳस्थाः । अनुमतेन्वमꣳस्थाः । सरस्वतेन्वमꣳस्थाः ।
देवसवितुःप्रासावीः । होमांतेयज्ञपुरुषांतर्यामि श्रीपरशुरामायनमः । गंधादिषोडशोपचारपूजां ७०
समर्पयामि । वैश्वानरायविद्महेलालीलायधीमहि ॥ तन्नोअग्निःप्रचोदयात् ॥ मंत्रपुष्पंसमर्प

4140
SGDF Sri Gurudev Datta Digital Foundation

यामि ॥ स्वस्ति श्रद्धांमेधांयशःप्रज्ञांविद्यांबुद्धिंश्रियंबलं । आयुष्यंतेजआरोग्यंदेहिमेहव्यवाह
न । गोत्रमुच्चार्य । अग्नेनयसुपथारायेअस्मान्विश्वानिदेववयुनानिविद्वान् । युयोध्यस्मज्जुहु
राणमेनोभूयिष्ठांतेनमउक्तिंविधेम । अग्नेत्वंपारयानव्योअस्मांत्स्वस्तिभिरतिदुर्गाणिविश्वा । पू
श्चपृथ्वीबहुलानउर्वीभवातोकायतनयायशंयोः । इतिप्रदक्षिणं । सकृत्तेअग्नेनमः । द्विस्तेनमः ।
त्रिस्तेनमः । चतुस्तेनमः । पंचकृत्वस्तेनमः । दशकृत्वस्तेनमः । शतकृत्वस्तेनमः । आसहस्र
कृत्वस्तेनमः । अपरिमितकृत्वस्तेनमः । नमस्तेअस्तुमामाहिंसीः । इतिनमस्कारंकुर्यात् । बृ
हत्सामक्षत्रभृद्वृद्धवृष्ण्यंत्रिष्टुभोजःशुभितमुग्रवीरं । इंद्रस्तोमेनपंचदशेनमध्यमिदंवातेनसगरे
णरक्षा । इतिरक्षांधृत्वा । गच्छगच्छसुरश्रेष्ठस्वस्थानेहव्यवाहन । यत्रब्रह्मादयोदेवास्तत्रगच्छहुता
शन । नमस्तेगार्हपत्यायनमस्तेदक्षिणाग्नये । नमआहवनीयायमहावेद्यैनमोनमः । इत्यग्निं
नमस्कृत्यविसर्जयेत् । यस्यस्मृत्या० । यत्पुतंतुम० । अनेन प्रातःसायंवैश्वदेवहोमेन भगवान्
यज्ञपुरुषांतर्यामि श्रीपरशुरामःप्रीयतांप्रीतोभवतु । श्रीकृष्णार्पणमस्तु ॥ ॥ ॥
अथ यजुर्वेदिनांबलिहरणं ॥ बलिदानंकरिष्ये ॥ १ धर्मायस्वाहा धर्मायेदं० एवंतत्तन्मंत्रेणसर्व

SGDF
Sri Gargeshwari Digital Foundation

आ० ७१ त्र्त्यागः२ अधर्मायस्वाहा । परिषिच्य। ३ अद्भ्यःस्वाहा । परिषिच्य। ४ ओषधिवनस्पतिभ्यः प०
स्वाहा ।५ रक्षोदेवजनेभ्यःस्वाहा। परिषिच्य । ६ गृह्याभ्यःस्वाहा । ७ अवसानेभ्यःस्वाहा ।
८ अवसानपतिभ्यःस्वाहा। ९सर्वभूतेभ्यःस्वाहा। परिषिच्य। १०कामायस्वाहा। परिषिच्य। ११
अंतरिक्षायस्वाहा ।परिषिच्य। १२ यदेजतिजगतियच्चचेष्टतिनाम्नोभागोयन्नाम्नेस्वाहा। तन्ना
म्नइदं ।परिषिच्य।१३ ॐ पृथिव्यैस्वाहा।१४ अंतरिक्षायस्वाहा।१५ दिवेस्वाहा।१६ सूर्यायस्वा
हा । १७ चंद्रमसेस्वाहा । १८ नक्षत्रेभ्यःस्वाहा । १९ इंद्रायस्वाहा । २० बृहस्पतयेस्वाहा २१
प्रजापतयेस्वाहा । २२ ब्रह्मणेस्वाहा ।परिषिच्य ।प्राचीनावीति । २३ स्वधापितृभ्यःस्वाहा। परि
षिच्य ।यज्ञोपवीति ।अपउपस्पृश्य। २४ नमोरुद्रायपशुपतयेस्वाहा ।परिषिच्य । २५ देवेभ्यःस्वा
हा । अग्नौपरिषिच्य । अपसव्यं । २६ पितृभ्यःस्वधास्तु । परिषिच्य । सव्यं २७ । भूतेभ्यो
नमः । परिषिच्य । मनुष्ययज्ञेनयक्ष्ये । २८ मनुष्येभ्योहंत । परिषिच्य । २९ प्रजापतयेस्वा
हा । परिषिच्य । ३० परमेष्ठिनेस्वाहा । परिषिच्य ! यथाकूपःशतधारःसहस्रधारोअक्षितः । ए ७१
वामेअस्तुधान्यंसहस्रधारमक्षितं । ३१ धनधान्यैस्वाहा । परिषिच्य । ॥ ॥

कुंड.

			२५ देवेभ्यःस्वा.			
३१ यथाकू०	९ सर्वभूतेभ्य०	१२ यदेजति०	५ रक्षोदेवज०	२२ ब्रम्हणे०	२७ भूतेभ्यो०	२६ पितृभ्य०
३० परमे०	८ अवसान०	११ अंतरिक्षा०	४ औषधिवन०	२१ प्रजाप०	२४ नमोरु०	२३ स्वधापि०
२९ प्रजाप०	७ अवसाने०	१० कामाय०	३ अद्भ्यःस्वा०	२० बृहस्प०		
२८ मनुष्ये०	६ गृह्याभ्य०	२ अधर्माय०	१ धर्मा०	१९ इंद्राय०		
				१८ नक्षत्रे०		
				१७ चंद्रम०		
				१६ सूर्याय०		
				१५ दिवे०		
				१४ अंतरि०		
				१३ पृथि०		

SGDF
Sri Gargeshwari Digital Foundation

येभूताःप्रचरंतिदिवानक्तंबलिमिच्छंतोवितुदस्यप्रेष्याः ॥ तेभ्योबलिंपुष्टिकामोहरामिमयिपुष्टिंपु
ष्टिपतिर्ददातुस्वाहा॥चांडालवायसेभ्यःभूतेभ्यइदंनमम॥हस्तौपादौप्रक्षाल्य आचम्य केशव२४।
अथ अक्षतसमर्पणादिकं ॥ श्रीमन्नारायणायपरिपूर्णगुणार्णवाय विश्वोदयस्थितिलयोन्नियति
प्रदाय ॥ ज्ञानप्रदायविबुधासुरसौख्यदुःखसत्कारणायविततायनमोनमस्ते ॥ ब्राह्मणांतर्यामि
श्रीमध्वाचार्याणांहृत्कमलमध्यनिवासिनिर्दोषानंतकल्याणगुणगणपरिपूर्णक्षीराब्धिशायि श्रीम
द्भारतीरमणमुख्यप्राणांतर्गतश्रीमदनंतात्मक श्रीलक्ष्मीनृसिंहप्रीत्यर्थंब्राह्मणसुवासिनीसमारा
धनंकरिष्ये ॥ ततःगुरुपादप्रक्षालनं ॥ ॐ अस्मिन्राष्ट्रेश्रियमावेशयाम्यतोदेवीः प्रतिपश्या
म्यापः दक्षिणंपादमवनेनिजेस्मिन्राष्ट्रइंद्रियंदधामि ॥ सव्यंपादमवनेनिजेस्मिन्राष्ट्रइंद्रियंव
र्धयामि पूर्वमन्यमपरमन्यंपादाववनेनिजे ॥ देवाराष्ट्रस्यगुप्त्याअभयस्यावरुध्यै ॥ अपःपा
दावनेजनीर्द्विषंतंनिर्दहंतुमे ॥ येनागाहिसमस्तशास्त्रपृतनारत्नाकरोलीलयायेनाखंडिकुवादि
सर्वसुभटस्तोमोवचःसायकैः॥ येनास्थापिचमध्वशास्त्रविजयस्तंभोधरामंडले तंसेवेजयतीर्थवीरम
निशंमध्वाख्यराजादृतं ॥ एकोविष्णुर्महद्भूतंपृथग्भूतान्यनेकशः ॥ त्रींल्लोकान्व्याप्यभूतात्मा

SGDF
Sri Gurgeshwara Digital Foundation

भुङ्क्तेविश्वभुगव्ययः ॥ अनेनब्राह्मणसुवासिनीसमाराधनेन भगवान् श्रीलक्ष्मीनृसिंहःप्रीयतां श्रीकृष्णार्पणमस्तु॥तुलस्यैनमः॥सुरभीवैष्णवीमाता नित्यंविष्णुपदेस्थिता॥ गोग्रासंतुमयादत्तंसुरभिःप्रतिगृह्यतां ॥ गवांतर्यामिगोपालकृष्णःप्रीयतां ॥ यतिहस्तेजलंदद्याद्भैक्षंदद्यात्पुनर्जलं ॥ तदन्नंमेरुणातुल्यंतज्जलंसागरोपमं ॥ अथ तीर्थग्रहणादिपूर्वकभोजनं ॥ प्रथमंकायशुध्यर्थंद्वितीयंधर्मसाधनं ॥ तृतीयंमोक्षमाप्नोतिएवंतीर्थंत्रिधापिबेत् ॥ ततः गंधाक्षतधारणंकृत्वा पात्रपरिवेषणानंतरंभोजनंकुर्यात् ॥ ॐ भूर्भुवःस्वरितिमंत्रेणपात्रंप्रोक्ष्य सत्यंत्वर्तेनपरिषिंचामि चित्राय० चित्रगुप्ताय० ॥ भू० भूवन० भूतानांपतयेनमइतिवा आहुतिंदत्वा अहंवैश्वानरोभूत्वाप्राणिनांदेहमाश्रितः ॥ प्राणापानसमायुक्तःपचाम्यन्नंचतुर्विधं ॥ अमृतोपस्तरणमसिस्वाहा ॥ ॐ प्राणायस्वाहा ॐ अपानायस्वाहा ॐ व्यानायस्वाहा ॐ उदानायस्वाहा ॐ समानायस्वाहा ॐ ब्रह्मणेस्वाहा ॥ गोविंदगोविंदेतिसरन् भोजनंकुर्यात् ॥ अमृतापिधानमसिस्वाहा ॥ इतिभोजनं ॥ भोजनानंतरंविष्णोरर्पितं तुलसीदलं ॥ भक्षणात्पापनिर्मुक्तश्चांद्रायणशताधिकं ॥ इदमन्नंपवित्रंस्यात्पानीयंचातिपावनं ॥ भुक्तपीतविशुध्यर्थं हरेःपादोदकंपि

SGDF
Sri Gurgeshwari Digital Foundation

आ० वेत् ॥ वेदशास्त्रविनोदेनाहःशेषातिवाहनेनभगवत्प्रीतिंसंपादयेत् ॥ ॥ ॥ प०
७३ अथ श्रीनृसिंहाद्याराधनेषु मंत्राक्षतमंत्राः॥ स्तुहिश्रुतंगर्तसदंयुवानंमृगंनभीममुपहत्नुमुग्रं ॥ मृ
ळाजरित्रेरुद्रस्तवानोन्यंतेअस्मन्निवपंतुसेनाः ॥ सहस्रमाख्यात्रेदद्यात्छतंप्रतिगरित्रएतेचैवासने
श्वेतश्वाश्वतरीरथोहोतुः पुत्रकामाहाप्याख्यापयेरंल्लभंतेहपुत्रान्लभंतेहपुत्रान् ॥ सर्वस्याप्त्यै
सर्वस्यजित्यैसर्वमेवतेनाप्नोतिसर्वंजयति॥स्वस्तिमंत्रार्थाःसत्याःसंतु श्रीनृसिंहप्रसादोस्तु॥ दीर्घतं
मामामतेयोज्जुजुर्वांदशमेयुगे॥अपामर्थं यतीनांब्रह्माभवतिसारथिः॥सहस्रमा०॥ स्वस्तिमंत्रार्थाः
सत्याःसंतु गुर्वंतर्गतसीतापति श्रीरामचंद्रप्रसादोस्तु॥ ॐ अरायिकाणेविकटेगिरिंगछसदान्वे ॥
शिरिंबिठस्यसत्वभिस्तेभिष्ट्वाचातयामसि॥ चत्तोइतश्चत्तामुतःसर्वाभ्रूणान्यारुषी॥ अराय्यंब्रह्मण
स्पतेतीक्ष्णशृंगोदृषंन्निहि ॥ अदोयदारुप्लवतेसिंधोःपारेअपूरुषं ॥ तदारभस्वदुर्हणोतेनगछपर
स्तरं ॥ यत्थप्राचीरजंगंतोरोमंडूरधाणिकीः ॥ हताइंद्रस्यशत्रवःसर्वे बुद्बुदयाशवः ॥ परीमेगा ७३
मनेषतपर्यमिर्महृषत ॥ देवेष्वक्रतःश्रवःकइमाँआदधर्षति ॥ सहस्रमा०॥ स्वस्तिमंत्रार्थाःसत्याः
संतु श्रीभूवराहात्मकश्रीलक्ष्मीवेंकटेशप्रसादोस्तु ॥ मंत्राक्षतामंत्रः तदित्समानमाशातेवेनंतान ४

147

प्रयुछतः ॥ धृतव्रतायदाशुषे ॥ वेदायोवीनांपदमंतरिक्षेणपततां ॥ वदनावःसमुद्रियः ॥ वेदमा
सोधृतव्रतोद्वादशप्रजावतः ॥ वेदायउपजायते ॥ वेदवातस्यवर्तनिमुरोर्ऋष्वस्यबृहतः ॥ वेदा
येअध्यासते ॥ निषसादधृतव्रतोवरुणःपस्त्या३स्वा ॥ साम्राज्यायसुक्रतुः ॥ सहस्रमा० स्वस्ति
मंत्रार्थाःसत्याःसंतु श्रीवेदव्यासप्रसादोस्तु ॥ मंत्राक्षतमंत्रः ॥ ॐ इंद्रश्रेष्ठानिद्रविणानिधेहिचि
त्तिंदक्षस्यसुभगत्वमस्मे ॥ पोषंरयीणामरिष्टिंतनूनांस्वाद्मानंवाचःसुदिनत्वमन्हां ॥ सहस्राक्षेण
शतशारदेनशतायुषाहविषाहार्षमेनं ॥ शतंयथेमंशरदोनयातींद्रोविश्वस्यदुरितस्यपारं ॥ शतंजी
वशरदोवर्धमानःशतंहेमंतांछतमुवसंतान् ॥ शतमिंद्राग्नीसविताबृहस्पतिःशतायुषाहविषेमं
पुनर्दुः ॥ आहार्षत्वाविंदंत्वापुनरागाःपुनर्नव ॥ सर्वांगसर्वंतेचक्षुःसर्वमायुश्चतेविदं ॥ सहस्र
मा० ॥ स्वस्तिमंत्रार्थाः सत्याःसंतु श्री इष्टदेवतासुप्रसादोस्तु ॥ ॥ अथ ऋग्वेदिनांसायं
संध्या ॥ केशव २४ प्रणव०वःस्वरोम् ॥ पूर्वोच्चरि० पुण्यतिथौ श्रीविष्णुप्रेरणया श्रीविष्णुप्री
त्यर्थं सायंसंध्यामुपासिष्ये ॥ आपोहि० जनयथाचनः ॥ इतिमार्जनं ॥ अग्निश्चेत्यस्यमंत्र
स्य हिरण्यगर्भऋषिः अग्निमामन्युमन्युपतयश्चदेवताप्रकृतीछंदः जलाभिमंत्रणेविनियोगः ॥

SGDF

आ० ॐ अग्निश्चमामन्युश्चमन्युपतयश्चमन्युकृतेभ्यः॥ पापेभ्योरक्षंतां यदन्हापापमकार्षं मनसावाचा प०
७४ हस्ताभ्यांपद्भ्यामुदरेणशिश्ना अहस्तदवलुंपतु यत्किंचदुरितंमयि इदमहंमाममृतयोनौ सत्येज्यो
तिषिजुहोमिस्वाहा ॥ केशव २४ आपोहि० शन्नोदेवी० पुनर्मार्जनं ॥ ऋतंच० मथोस्वः ॥
इतिपापपुरुषविसर्जनं ॥ केशव २४ प्रणव०वःस्वरोम् ॥ सवित्रंतर्गत श्रीनारायणप्रीत्यर्थं सा
यमर्घ्यप्रदानंकरिष्ये ॥ गायत्र्याविश्वामित्रः सवितागायत्री प्रतिचक्ष्ववसिष्ठइंद्रासोमावनुष्टुप् ॥
सायमर्घ्यदानेविनियोगः ॥ प्रत्यङ्मुखःसन्नर्घ्यत्रयंदत्वा ॥ प्रतिंच० मोष्व१घ्यदुर्हणावांत्सायंकर
दारेअस्मत् अश्रीरिईवजामाता उत्तिष्ठो० ॥ असावादित्योब्रह्म ॥ केशव २४ ततोभूतोच्चाटना
सनन्यासध्यानांतंकृत्वा कृष्णवर्ण अग्निमुख० यथाशक्तिगायत्रीमंत्रजपंकरिष्ये १० ॥ जपा
नंतरंपुनर्न्यासध्यानांतंकृत्वा कृष्णवर्ण० गायत्रीमंत्रजपःसंपूर्णः श्रीकृष्णार्पणमस्तु ॥ ततःप्रत्य
ङ्मुखःसन्संमुखहस्तौकृत्वाजातवेदसेतिमंत्रेणोपस्थानांते दिग्देवान्नत्वाकामोकार्षीत्यादिपठि ७४
त्वोपविश्य स्वनामगोत्रोच्चारणंकृत्वाऽहंभो अभिवादयेति अभिवादयेत् ॥ यस्यस्मृत्या० अने
न सायंकालसंध्यावंदनेन भगवान् श्रीमदनंतात्मक श्रीलक्ष्मीनृसिंहःप्रीयतां ॥ केशव २४ ॥

SGDF
Sri Gargeshwari Digital Foundation

अथ यजुर्वेदिनां सायंसंध्या ॥ केशव २४ प्रणवस्य ॐ भूः० । अग्निश्चमामन्युश्चमन्युपतयश्चम
न्युकृतेभ्यः । पापेभ्योरक्षंतां । यदन्हापापमकार्षं । मनसावाचाहस्ताभ्यां पद्भ्यामुदरेणशिश्ना ।
अहस्तदवलुंपतु । यत्किंचदुरितंमयि । इदमहंमाममृतयोनौ । सत्येज्योतिषिजुहोमिस्वाहा ।
केशव २४ । दधिक्रावुण्णो० । केशव० २४ । प्रणवस्य० ॐ भूः० पूर्वोक्तएवं० सायंसंध्या
र्घ्यंप्रदानंकरिष्ये । ॐ भूर्भुवस्वः० । ३ ॥ ॐ मित्येकाक्षरंब्रह्मेत्यारभ्यप्रातःसंध्यावत् जपांतं
कृत्वा । जपानंतरं । इमंमेवरुणश्रुधीहवमद्याचमृडया । त्वामवस्युराचके । तत्वायामिब्रह्मणा
वंदमानस्तदाशास्तेयजमानोहविर्भिः । अहेडमानोवरुणेहबोध्युरुशंसमानआयुःप्रमोषीः ।
यच्चिद्धितेविशोयथाप्रदेववरुणव्रतं । मिनिमसिद्यविद्यवि । यत्किंचेदंवरुणदैव्येजनेभिद्रोहंमनु
ष्याश्चरामसि ।अचित्तीयत्तवधर्मीयुयोपिममानस्तस्मादेनसोदेरीरिषः । कितवासोयद्रिरिपुर्नदि
वियद्वाघासत्यमुतयंनविद्म । सर्वाताविष्यशिथिरेवदेवाथतेस्यामवरुणप्रियासः । ॐ नमःप्रती
च्यैदिशेयाश्चदेवताएतस्यांप्रतिवसंतिएताभ्यश्चनमोनमः । उदीच्यै०प्राच्यै० दक्षिणायै० ऊर्ध्वा
यै० अधरायै० अंतरिक्षायै० ॥ प्रातःसंध्यावत् । सर्वंपठित्वा समापयेत् ॥ केशव० २४ ॥

SGDF
Sri Gargeshwari Digital Foundation

आ० अथ तीर्थीगारग्रहणं ॥ श्रीधन्वंतरयेनमः अच्युतानंतगोविंदनामोच्चारणभेषजात ॥ नश्यंतिस प०
७५ कलारोगाःसत्यंसत्यंवदाम्यहं ॥ संसारसागरसमुत्तरणैकमंत्रं ब्रह्मादिदेवमुनिपूजितसिद्धमंत्रं॥
दारिद्र्यदुःखभवरोगविनाशमंत्रं वंदेमहाभयहरंनरसिंहमंत्रं ॥ १ ॥ ॥ अथ शिवस्तुतिः ॥
स्फुटंस्फटिकसप्रभंस्फुटितहाटकश्रीजटं शशांकदलशेखरंकपिलफुल्लनेत्रत्रयं ॥ तरक्षवरकृत्तिमद्
जगद्भूषणंभूतिमत्कदातु शितिकंठतेवपुरवेक्ष्यतेवीक्षणं ॥ १ ॥ त्रिलोचनविलोचनेलसतितेल
लामायिते स्मरोनियमघस्मरोनियमिनामभूद्भस्मसात् ॥ स्वभक्तिलतयावशीकृतवतीसतीयंसती
स्वभक्तवशतोभवानपिवशीप्रसीदप्रभो ॥ २ ॥ महेशमहितोसितत्पुरुषपूरुषाग्र्योभवानघोर
रिपुघोरतेनवमवामदेवांजलिः ॥ नमःसपदिजाततेत्वामितिपंचरूपांचितः प्रपंचयचपंचवृन्मभम
नस्तमस्ताडय ॥ ३ ॥रसाघनरसानलानिलवियद्विवस्वद्विधुप्रयष्टृषुनिविष्टमित्यजभजामिमूर्त्य
ष्टकं ॥ प्रशांतमुतभीषणंभुवनमोहनंचेत्यहो वपुंषिगुणपुंषितेहमहमात्मनोहंभिदे ॥ ४ ॥ विमु ७५
क्तिपरमाध्वनांतवषडध्वनामास्पदंपदंनिगमवेदिनोजगतिवामदेवादयः ॥ कथंचिदुपशिक्षिता
भगवतैवसंविद्रते वयंतुविरलांतराःकथमुमेशतन्मन्महे ॥ ५ ॥ कठोरितकुठारयाललितशूलया

वाहया रणडमरयास्फुरत्धरिणयासखट्वांगया ॥ चलाभिरचलाभिरप्यगणिताभिरुन्नृत्यतश्चतुर्द
शजगंतितेजयजयेत्ययुर्विस्मयं ॥६॥ पुरत्रिपुररंधनंविविधदैत्यविध्वंसनंपराक्रमपरंपराअपिपरा
नतेविस्मयः॥अमर्षबलहर्षितक्षुभितवृत्तनेत्रोज्ज्वलज्ज्वलज्ज्वलनहेलयाशलभितंहिलोकत्रयं॥७॥
सहस्रनयनोग्रहःसहसहस्ररश्मिर्विधुर्बृहस्पतिरुताप्पतिःससुरसितधविद्याधराः॥ भवत्पदपरायणाः
श्रियमिमामयुःप्रार्थिनां भवान्सुरतरुर्दृशंदिशशिवांशिवावल्लभ ॥ ८ ॥ तवप्रियतमादतिप्रिय
तमंसदैवांतरं पयस्युपहितंघृतंस्वयमिवश्रियोवल्लभं॥विभिद्यलघुबुत्धयःस्वपरपक्षलक्षायितं पठंति
हिलुठंतितेशठहृदःशुचाशुंठिताः॥ ९ ॥ निवासनिलयश्रितातवशिरस्ततिर्मालिका कपालमपि
तेकरेत्वमशिवोस्यनंतार्धियां ॥ तथापिभवतः पदंशिवशिवेत्यदोजल्पता मकिंचननकिंचन
वृजिनमस्त्यभस्मीभवत् ॥ १० ॥ त्वमेवकिलकामधक्सकलकाममापूरयन् सदात्रिनयनो
भवान्वहसिचात्रिनेत्रोद्भवं॥ विषंविषधरान्दधात्पिबसितेनचानंदवान् विरुत्धचरितोचिताजगद
धीशतेभिक्षुता ॥११॥ नमःशिवशिवाशिवाशिवशिवार्धकृंताशिवंनमोहरहराहराहरहरांतरींमेदृ
शं॥ नमोभवभवाभवप्रभवभूतयेमेभवं नमोमृडनमोनमोनमउमेशतुभ्यंनमः॥१२॥ सतांश्रवणप

SGDF

त्वर्तिसरत्तुसन्नतोक्तेत्यसौ शिवस्यकरुणांकुरात्प्रतिकृतात्सदासोदिता ॥ इतिप्रथितमानसोव्य
धितनामनारायणः शिवस्तुतिमिमांशिवांलिकुचसूरिसूनुःसुधीः ॥ २३ ॥ इति श्रीमन्नारा
यणपंडिताचार्यविरचिता शिवस्तुतिः समाप्ता ॥ ॥ ॥ ॥
अथ देवस्यतुलसीसमर्पणं नैवेद्यादिकंच ॥ ॥ रात्रौदेवस्य केशवादिचतुर्विंशतिनामभिः तुल
सीदलसमर्पणंकृत्वा ॥ नैवेद्यं ॥ नानाफलानिदिव्यानिस्वादूनिसुरभीणिच ॥ अनिषित्धानि
देवेशभक्त्यादत्तानिगृह्यतां ॥ नैवेद्यंसमर्पयामि ॥ महार्तिक्यदीपं समर्पयामि ॥ श्रियेजातः
श्रियआनिरियायश्रियंवयोजरितृभ्योदधाति ॥ श्रियंवसानाअमृतत्वमायन्भवंतिसत्यासमि
थामितद्रौ ॥ श्रियएवैनंतच्छ्रियामादधाति संततमृचावषट्कृत्यं संतत्यैसंधीयतेप्रजयापशुभि
र्यएवंवेद ॥ याज्ययायजतिप्रत्तिर्वैयाज्या पुण्यैवलक्ष्मीः पुण्यामेवतंलक्ष्मींसंभावयतिपुण्यांल
क्ष्मींसंस्कुरुते ॥ संसृष्टं० ॥ अस्तुश्रीःमंगलानिभवंतु संततं श्रीरस्तु श्रीलक्ष्मीनृसिंहार्पणमस्तु॥
मातानृसिंहश्चपितानृसिंहोभ्रातानृसिंहश्चसखानृसिंहः ॥ विद्यानृसिंहोद्रविणंनृसिंहःस्वामीनृसिं
हःसकलंनृसिंहः ॥ इतोनृसिंहःपरतोनृसिंहोयतोयतोयामिततोनृसिंहः ॥ नृसिंहदेवादपरंनकिं

SGDF
Sri Gangeshwar Digital Foundation

चित्तस्तान्नृसिंहंशरणंप्रपद्ये ॥ भर्जनंभवबीजानांसर्जनंसर्वसंपदां ॥ त्रासनंयमदूतानांनृहरेर्नाम
गर्जनं ॥ नृसिंहनृसिंहनृसिंह ॥ ॥ अथदेवस्यप्रदक्षिणकालेगोपीगीतापठणं ॥
गोप्यऊचुः ॥ जयतितेधिकंजन्मनाव्रजःश्रयतइंदिरासाधुतत्राहि ॥ दयितदृश्यतांत्वादिदृक्षतां
त्वयिधृतासवस्त्वांविचिन्वते ॥ १ ॥ व्रजजनार्तिहन्वीरयोषितांनिजजनस्मयध्वंसनस्मित ॥ भ
जसखेभवेकिंकरीःस्मनोजलरुहाननंचारुदर्शयन् ॥ २ ॥ शरदुदाशयेसाधुजातसत्सरसिजोदरश्री
मुषादृशा ॥ सुरतनाथतेशुल्कदासिकावरदनिघ्नतोनेहकिंवधः ॥ ३ ॥ विषजलाशयाद्व्यालराक्ष
साद्वर्षमारुताद्वैद्युतानलात्॥वृषमयाद्भयाद्विश्वतोमुखाद्वृषभतेवयंरक्षितामुहुः॥४॥सखलुगोपिका
नंदनोभवानखिलदेहिनामंतरात्मदृक् ॥ विखनसार्चितोविश्वगुप्तयेसखउदेयिवान्सात्वतांकुले॥५॥
विरचिताभयंवृष्णिवर्यतेशरणमीयुषांसंसृतेर्भयात्॥करसरोरुहंकांतकामदंशिरसिधेहिनःश्रीकरग्र
हं ॥ ६ ॥ प्रणतदेहिनांपापकर्शनंतृणचरानुगंश्रीनिकेतनं ॥ फणिफणार्पितंतेपदांबुजंकृणुकुचे
षुनःकृंधिहृच्छयं॥ ७ ॥ मधुरयागिरावल्गुवाक्यययाबुधमनोज्ञयापुष्करेक्षण॥ विधिकरीरिमावीरमु
ह्यतीरधरसीधुनाप्याययस्वनः॥ ८ ॥तवकथामृतंतप्तजीवनंकविभिरीडितंकल्मषापहं ॥ श्रवणमं

SGDF
Sri Gangeshwari Digital Foundation

आ० गलंश्रीमदाततंभ्रुविसृणंतितेंभ्रूरिदाजनाः॥९॥प्रहसितंप्रियप्रेमवीक्षणंविहरणंचतेध्यानमंगलं॥ प०
७७ रहसिसंविदोयाहृदिस्पृशःकुहकनोमनःक्षोभयंतिहि ॥ १० ॥ चलसियद्व्रजाच्चारयन्पशून्नलि
नसुंदरंनाथतेपदं ॥ शिलतृणांकुरैःसीदतीतिनःकलिलतांमनःकांतगछति ॥ ११ ॥ दिनपरिक्ष
येनीलकुंतलैर्वनरुहाननं बिभ्रदावृतं ॥ वनरजस्वलंदर्शयन्मुहुर्मनसिनःस्मरंवीरयच्छसि ॥१२॥
प्रणतकामदंपद्मजार्चितंधरणिमंडलंध्येयमापदि ॥ चरणपंकजंशंतमंचतेरमणनस्तनेष्वर्पयाधिह
न् ॥ १३ ॥ सुरतवर्धनंशोकनाशनंस्वरितवेणुनासुष्ठुचुंबितं ॥ इतररागविस्मारणंनृणांवितरवीर
नस्तेधरामृतं ॥ १४ ॥ अटतियद्भवानन्हिकाननंत्रुटियुगायतेत्वामपश्यतां ॥ कुटिलकुंतलंश्री
मुखंचतेजडवदीक्षतांपक्ष्मकृदृशां ॥१५॥ पतिसुतान्वयभ्रातृबांधवानतिविलंघ्यतेह्यच्युतागताः॥
गतिविदस्तवोद्गीतमोहिताः कितवयोषितःकस्त्यजेन्निशि ॥१६ ॥ रहसिसंविदंहृच्छयोदयंप्रह
सिताननंप्रेमवीक्षणं ॥ बृहदुरःश्रियोवीरवीक्ष्यतेमुहुरतिस्पृहामुह्यतेमनः ॥ १७ ॥ व्रजवनौक
सांव्यक्तिरंगतेवृजिनहंत्र्यलंविश्वमंगलं ॥ भजमनाक्चनस्त्वत्स्पृहात्मनांस्वजनहृद्रुजांयन्निषू ७७
दनं ॥ १८ ॥ श्रीशुकः ॥ इतिगोप्यःप्रगायंत्यःप्रलपंत्यश्चचित्रधा ॥ रुरुदुःसुस्वरंराजन्कृष्णद

र्शनलालसाः ॥ तासामाविरभूच्छौरिःस्मयमानमुखांबुजः ॥ पीतांबरधरःस्रग्वीसाक्षान्मन्मथम
न्मथः ॥ इति गोपीगीता समाप्ता ॥ श्रीकृष्णार्पणमस्तु ॥ ॥ ॥
॥ अथ वेणुगीताप्रारंभः ॥ ॥ श्रीशुकउवाच ॥ गोप्यःकृष्णेवनंयातेतमनुद्रुतचेतसः ॥ कृष्ण
लीलांप्रगायंत्योनिन्युर्दुःखेनवासरान् ॥ १ ॥ गोप्यऊचुः ॥ वामबाहुकृतवामकपोलोवल्गितभ्रु
रधरार्पितवेणुः ॥ कोमलांगुलिभिराश्रितमार्गंगोप्यईरयतियत्रमुकुंदः ॥ २ ॥ व्योमयानवनि
ताःसहसिद्धैर्विस्मितास्तदुपधार्यसलज्जाः ॥ काममार्गणसमर्पितचित्ताः कश्मलंययुरपस्मृत
नीव्यः॥ ३ ॥ हंतचित्रमबलाःशृणुतेदंहारभासउरसिस्थितविद्युत् ॥ नंदसूनुरयमार्तजनानांशर्मदो
यर्हिकूजितवेणुः ॥ ४ ॥ वृंदशोव्रजवृषामृगगावोवेणुवाद्यहृतचेतसएत्य ॥ दंतदष्टकवलाधृतकर्णा
निद्रितालिखितचित्रमिवासन् ॥५॥ बर्हिणस्तबकधातुपलाशैर्बद्धमल्लपरिबर्हविडंबः कर्हिचित्सबल
आलिसगोपैर्गाःसमाव्हयतियत्रमुकुंदः॥६॥ तर्हिभग्नगतयःसरितोवैतत्पदांबुजरजोऽनिलनीतं॥
आमृशन्पयसिवाबहुपुण्याःप्रेमवेपितभुजाहृतवेगाः॥ ७ ॥ अनुचरैःसमनुवर्णितवीर्यआदिपूरुष
इवाचलभूतिः॥ वनचरोगिरितटेषुचरंतीर्वेणुनाऽऽव्हयतिगाःसयदाहि ॥८॥ वनलतास्तरवआत्म

SGDF
Sri Gangeshwar Digital Foundation

आ० निविष्णुंव्यंजयंतइवपुष्पफलाढ्याः ॥प्रणतभारविटपामधुधाराःप्रेमहृष्टतनवाःससृजुःस्म ॥ ९ ॥ प०
७८ दर्शनीयविकचोत्पलमालादिव्यगंधतुलसीमधुमत्तैः ॥ अलिकुलैरलघुगीतमभीष्टमाद्रियद्यर्हिसं
धितवेणुः॥ १०॥सरसिसारसहंसविहंगाश्चारुगीतहृतचेतसएत्य ॥ हरिमुपासततेयतचित्ताहंतमी
लितदृशोधृतमौनाः ॥ ११ ॥ सहबलःस्रगवतंसविलासःसानुषुक्षितिभृतोव्रजदेव्यः॥ हर्षयन्यर्हि
वेणुरवेणजातहर्षउपरंभतिविश्वं ॥ १२ ॥ महदतिक्रमणशंकितचेतामंदमंदमनुगर्जतिमेघः ॥
सुहृदमभ्यवर्षत्सुमनोभिश्छाययाचाविदधेवितपत्रं ॥ विविधगोपचरणेषुविदग्धोवेणुवाद्यमधुरां
निजशिक्षां ॥ तवसुतःसतियदाधरबिंबेदत्तवेणुरनयत्स्वरजातीः ॥ १४ ॥ सवनशस्तदुपधार्य
सुरेशाःशक्रशर्वपरमेष्ठिपुरोगाः ॥ कवयआनतकंधरगात्राःकश्मलंययुरनिश्चिततत्वाः ॥ १५ ॥
निजपदाब्जदलैर्ध्वजवज्रनीरजांकुशविचित्रललामैः ॥ व्रजभुवःप्रशमयन्खुरतोदंवर्ष्मधुर्यगति
रीरितवेणुः ॥ १६ ॥ व्रजमितेनवयंसविलासवीक्षणार्पितमनोभववेगाः ॥ व्रजगतिंगमितान
विदामःकश्मलेनवसनंकबरंवा ॥ १७ ॥ मणिधरःक्वचिदागमयन्गामालयादयितगंधतुलस्याः ॥
प्रणयिनोऽनुचरस्यकदांसेप्रक्षिपन्भुजमगायतयत्र ॥ १८ ॥ क्वणितवेणुरवंचितचित्ताःकृष्णमी

७८
SGDF
Sri Gangeshwari Digital Foundation

157

युरनुकृष्णगृहिण्यः ॥ गुणगणार्णमनुगम्यहरिण्योगोपिकाइवविमुक्तगृहेशाः ॥ १९ ॥ कुंददा
मकृतकौतुकवेषोगोपगोधनवृतोयमुनायां॥नंदसूनुरनघेतववत्सोनर्मदः प्रणयिनांविजहार।२०।
मंदवायुरुपवात्यनुकूलंमानयन्मलयजस्पर्शेन ॥ बंदिनस्तमुपदेवगणायेवाद्यगीतबलिभिःपरि
वव्रुः ॥ २१ ॥ वत्सलोव्रजगवांयदगाधोवंद्यमानचरणःपथिवृद्धैः ॥ कृत्स्नगोधनमपोह्यदिनां
तेगीतवेणुरनुगोत्धृतकीर्तिः ॥ २२ ॥ उत्सवंश्रममपोह्यदृशीनामुद्वहन्खुररजश्छुरितस्रक् ॥
दित्सयैतिसुहृदाशिषएषदेवकीजठरभूरुडुराजः ॥ २३ ॥ मदविघूर्णितलोचनईषन्मानदःस्व
सुहृदांवनमाली ॥ बदरपांडुवदनोमृदुगंडंमंडयन्कनककुंडललक्ष्म्या ॥ २४ ॥ यदुपतिर्द्विरदरा
जविहारोयामिनीपतिरिवैषदिनांते ॥ मुदितवक्त्रउपयातिदुरंतंमोचयन्व्रजगवांदिनतापं ॥
॥ २५ ॥ श्रीशुकउवाच ॥ एवंव्रजस्त्रियोराजन्कृष्णलीलानुगायतीः ॥ रेमिरेहस्सुतच्चित्ता
स्तन्मनस्का महोदयाः ॥ २६ ॥ ॥ इति श्रीमद्भागवते वेणुगीता समाप्ता ॥ ॥
अथ भ्रमरगीताप्रारंभः ॥ काचिन्मधुकरंदृष्ट्वाध्यायंतीकृष्णसंगमं ॥ प्रियप्रस्थापितंदूतंकल्प
यित्वेदमब्रवीत्॥गोप्युवाच॥ मधुपकितवबंधो मास्पृशास्मान्सपत्न्याः कुचविलुलितमालाकुंकुम

SGDF
Sri Gurugobindsing Digital Foundation

आ० ७९

श्मश्रुभिस्त्वं ॥ वहतुमधुपतिस्तन्मानिनीनांप्रसादंयदुसदसिविडंब्यंयस्यदूतस्त्वमीदृक् ॥ १ ॥ प०
सकृदधरसुधांस्वांमोहिनींपाययित्वासुमनसइवसद्यःकस्त्यजेन्मांभवादृक् ॥ परिचरतिकथंतत्प
द्मकिंजल्कपादंअपिबतहृतचित्ताउत्तमश्लोकजल्पैः ॥ २ ॥ किमिह बहुषडंघ्रेगायसित्वंयदूना
मधिपतिमगृहाणामग्रतोनः पुराणं ॥ विजयसखसखीनांगायतांतत्प्रसंगः क्षपितकुचरुजस्ते
कल्पयंतीष्टमिष्टाः ॥ ३ ॥ दिविभुविचरसायांकाःस्त्रियस्तद्दुरापाः कपटरुचिरहासभ्रूविजृंभस्य
यास्युः ॥ चरणरजउपास्तेयस्यभूतिर्वयंकाअपिचकृपणपक्षेत्युत्तमश्लोकशब्दः ॥ ४ ॥ विसृज
शिरसिपादंवेद्म्यहंचाटुकारैरलमनुनयसारैर्याहिदौत्येमुकुंदं ॥ स्वकृतइहविसृष्टापत्यपत्यासलो
काव्यसृजदकृतचेताः किंनुसंधेयमस्य ॥ ५ ॥ मृगयुरिवकपींद्रंविव्यधेयःकिरातःस्त्रियमकृत
विरूपांस्त्रीजितःकामयानां ॥ बलिमपिबलिवासंवेदविद्धर्गवद्यस्तदलमसितसख्यैर्दुस्त्यजस्त
त्कथार्थः ॥ ६ ॥ यदनुचरितलीलाकर्णपीयूषविप्लुड्सकृददनविधूतद्वंद्वधर्माविनष्टाः ॥ सपदि ७९
गृहकुटुंबंदीनमुत्सृज्यदीनाबहवइहविहंगाभिक्षुचर्यांचरंति ॥ ७ ॥ वयमृतमिवजिह्मव्याहृतंश्र
द्दधानाः कुलिकरुतमिवाज्ञाःकृष्णवध्वोहरिण्यः ॥ ददृशिमसकृदेतत्तन्नखस्पर्शतीव्रस्तनरुजपर

मार्तिं भण्यतामस्यवार्ता ॥ ८ ॥ प्रियसखपुनरागाःप्रेयसाप्रेषितस्त्वंवरयकिमनुरुंधेमाननीयो
ऽसिमेंऽग ॥ नयसिकथमिहास्मान्दुस्त्यजंबंधुपार्श्वंसततमुरसिसौम्यश्रीवधूः साकमास्ते ॥ ९ ॥
अपिबतमधुपूर्यामार्यपुत्रोऽधुनास्तेस्मरतिसपितृगेहंसौम्यबंधूंश्चगोपान् ॥ क्वचिदपिसकथांनःकिं
करीणांगृणीतेभुजमगुरुसुगंधंमूर्ध्न्यधास्यत्कदानु ॥ १० ॥ श्रीशुकउवाच ॥ ॥ अथोद्ध
वोनिशम्यैवंकृष्णदर्शनलालसाः ॥ सांत्वयन्प्रियसंदेशैर्गोपीरिदमभाषत ॥ ११ ॥ ॥ उद्धवउ
वाच ॥ ॥ अहोयूयंस्मपूर्णार्था भवत्योलोकपूजिताः ॥ वासुदेवेभगवतियासामित्यार्पितंमनः
॥ १२ ॥ दानव्रततपोहोमजपस्वाध्यायसंयमैः ॥ श्रेयोभिर्विविधैश्चान्यैः कृष्णेभक्तिर्हिसाध्यते
॥ १३ ॥ भगवत्युत्तमश्लोके भवतीभिरनुत्तमा ॥ भक्तिःप्रवर्तितादिष्ट्यामुनीनामपिदुर्लभा
॥ १४ ॥ दिष्ट्यापुत्रान्पतीन्देहान्स्वजनान् भवनानिच ॥ हित्वाऽवृणीतयूयंयत्कृष्णाख्यं
पुरुषंपरम् ॥ १५ ॥ सर्वात्मभावोऽधिकृतोभवतीनामधोक्षजे ॥ विरहेणमहाभागामहान्वोऽनु
ग्रहःकृतः ॥ १६ ॥ श्रूयतांप्रियसंदेशोभवतीनांसुखावहः ॥ यमादाय यतोभद्राअहंभर्तुर्हिकिं
करः ॥ १७ ॥ इति श्रीमद्भागवतेमहापुराणेदशमस्कंधेभ्रमरगीता समाप्ता ॥ श्रीकृष्णार्पणमस्तु ॥

SGDF
Sri Gargeshwari Digital Foundation

160

आ० श्रीगुरुभ्योनमः अथ गर्भस्तुतिप्रारंभः ॥ ब्रह्माभवश्चतत्रैत्यमुनिभिर्नारदादिभिः ॥ देवैःसा प०
८० नुचरैःसाकंगीर्भिर्विष्णुमथास्तुवत् ॥ १ ॥ ब्रह्मभवावूचतुः ॥ सत्यंव्रतंसत्यपरंत्रिसत्यंसत्यस्ययो
निंनिहितंचसत्ये ॥ सत्यस्यसत्यमुतसत्यनेत्रंसत्यात्मकंत्वांशरणंप्रपन्नाः ॥२॥ एकायनोसौद्विफ
लस्त्रिमूलश्चतूरसःपंचशिफःषडात्मा ॥ सप्तत्वगष्टविटपोनवाक्षोदशछदीद्विखगोह्यादिवृक्षः ॥३॥
त्वमेकएवास्यसतःप्रसूतिःस्थानंनिधानंत्वमनुग्रहश्च ॥ त्वन्माययासंवृतचेतसस्त्वांपश्यंतिना
नानविपश्चितोये ॥ ४ ॥ बिभर्षिरूपाण्यवबोधआत्मन्क्षेमायलोकस्यचराचरस्य ॥ सत्वोपप
न्नानिसुखावहानिसतामभद्राणिमुहुःखलानां ॥ ५॥ त्वय्यंबुजाक्षाखिलसत्वधाम्निसमाधिनावे
शितचेतसोये ॥ त्वत्पादपोतेनमहत्कृतेन कुर्वंतिगोवत्सपदंभवाब्धिं ॥ ६ ॥ स्वयंसमुत्तीर्यसु
दुस्तरंद्युमन् भवार्णवंभीममदभ्रसौहृदाः ॥ भवत्पदांभोरुहनावमत्रते निधाययाताःसदनुग्रहो
भवान् ॥ ७ ॥ येन्येरविंदाक्षविमुक्तमानिनस्त्वय्यस्तभावादविशुद्धबुद्धयः ॥ आरुह्यकृच्छ्रेणप ८०
रंपदंततःपतंत्यधोनादृतयुष्मदंघ्रयः ॥ ८ ॥ तथानतेमाधवतावकाःक्वचिद्भ्रश्यंतिमार्गात्त्वयिबद्ध
सौहृदाः ॥ त्वयाभिगुप्ताविचरंतिनिर्भयाविनायकानीकपमूर्धसुप्रभो ॥ ९ ॥ सत्वंविशुद्धंश्रयते

SGDF
Sri Gargeshwari Digital Foundation

भवान्स्थितौशरीरिणांश्रेयउपायनंवपुः ॥ वेदक्रियायोगतपःसमाधिभिस्तवार्हणंयेनजनःसमी
हते ॥१०॥ सत्वंनचेत्धातरिदंनिजंभवेद्विज्ञानमज्ञानभिदापमार्जनं ॥ गुणप्रकाशैरनुमीयतेभवा
न्प्रकाशतेयस्यचयेनवागुणः ॥ ११ ॥ ननामरूपेगुणकर्मजन्मभिर्निरूपितव्येतवतस्यसाक्षिणः॥
मनोवचोभ्यामनुमेयवर्त्मनोदेवक्रियायांप्रतियंत्यथापिहि ॥ १२ ॥ शृण्वन्गृणन्संस्मरयंश्चचिं
तयन्नामानिरूपाणिचमंगलानिते ॥ क्रियासुयस्त्वच्चरणारविंदयोराविष्टचित्तोनभवायकल्पते
॥ १३ ॥ दिष्ट्याहरेस्याभवतःपदोभुवोभारोपनीतस्तवजन्मनेशितुः ॥ दिष्ट्यांकितांत्वत्पदकैःसु
शोभनैर्द्रक्ष्यामगांद्यांचतवानुकंपितां॥ १४ ॥ नतेभवस्येशभवस्यकारणंविनाविनोदंबततर्कयाम
हे ॥ भवोनिरोधःस्थितिरप्यविद्ययाकृतायतस्त्वय्यभवाश्रयात्मनि ॥ १५ ॥ मत्स्याश्वकच्छपनृ
सिंहवराहहंसराजन्यविप्रविबुधेषुकृतावतारः ॥ त्वंपासिनस्त्रिभुवनंचतथाधुनेशभारंभुवोहरयदूत्त
मवंदनंते ॥ १६ ॥ दिष्ट्यांबतेकुक्षिगतःपरःपुमानंशेनसाक्षाद्भगवान्भवायनः ॥ माभूद्भयंभोजप
तेर्मुमूर्षोर्गोप्तायदूनांभवितातवात्मजः ॥ १७ ॥ श्रीशुकउवाच ॥ इत्यभिष्टूयपुरुषंयद्रूपमनिदंय
था ॥ ब्रह्मेशानौपुरोधायदेवाःप्रतिययुर्दिवं ॥१८॥ ॥ इतिश्री भागवते गर्भस्तुतिःसमाप्ता॥

SGDF
Sri Gangeshwari Digital Foundation

आ० ॥ श्रीगुरुभ्योनमः ॥ अथ भीष्मकृतभगवत्स्तुतिप्रारंभः ॥ भीष्मउवाच ॥ इतिमतिरुपकल्पि प०
८१ तावितृष्णाभगवतिसात्वतपुंगवेविभूम्नि ॥ स्वसुखउपगतेक्कचिद्विहर्तुंप्रकृतिमुपेयुषियद्भवप्रवा
हः ॥ १ ॥ त्रिभुवनकमनंतमालवर्णंरविकरगौरवरांबरंदधाने ॥ वपुरलककुलावृताननाब्जंवि
जयसखेरतिरस्तुमेनवद्या ॥ २ ॥ युधितुरगरजोविधूम्रविध्यत्कचलुलितश्रमवार्यलंकृतास्ये ॥
ममनिशितशरैर्विभिद्यमानत्वचिविलसत्कवचैस्तुकृष्णआत्मा ॥ ३ ॥ सपदिसखिवचोनिशम्य
मध्येनिजपरयोर्बलयोरथंनिवेश्य ॥ स्थितवतिपरसैनिकायुरक्ष्णाहृतवतिपार्थसखेरतिर्ममास्तु
॥ ४ ॥ व्यवसितपृतनामुखंनिरीक्ष्यस्वजनवधाद्विमुखस्यदोषबुध्या ॥ कुमतिमहरदात्मविद्य
यायश्चरणरतिःपरमस्यतस्यमेस्तु ॥५॥ स्वनियममपहायमत्प्रतिज्ञामृतमधिकर्तुमवप्लुतोरथस्थः॥
धृतरथचरणोभ्ययाद्बलाग्रेहरिरिवहंतुमिभंगतोत्तरीयः ॥ ६ ॥ शितविशिखहतोविशीर्णदंशःक्षत
जपरिप्लुतआततायिनोमे ॥ प्रसभमभिससारमद्वधार्थंसभवतुमेभगवान्मुदेमुकुंदः ॥ ७ ॥ ८१
विजयरथकुटुंबआत्ततोत्रेधृतहयरश्मिजितश्रमेक्षणीये ॥ भगवतिरतिरस्तुमेमुमूर्षोर्यमिहनिरी
क्ष्यहतागताःस्वरूपं ॥ ८ ॥ ललितगतिविलासवल्गुहासप्रणयनिरीक्षणकल्पितोरुमानाः ॥ कृ

तमनुकृतवत्यउन्मदांधाःप्रकृतिमगुःकिलयस्यगोपवध्वः ॥ ९ ॥ मुनिगणनृपवर्यसंकुलेंतःसदसि
युधिष्ठिरराजसूयएषां ॥ अर्हणमभिपेदईक्षणीयोममदृशिगोचरएषआविरात्मा ॥ १० ॥ तमि
ममहमजंशरीरभाजांहृदिहृदिविष्ठितमात्मकल्पितानां।प्रतिदृशमिवनैकधार्कमेकंसमधिगतोस्मि
विधूतभेदमोहः ॥ ११ ॥ क्षितिभरमवरोपितुंकुरूणांश्वसनइवासृजदक्षवंशवन्हिं ॥ तमिममज
मनुव्रतार्तिहांघ्रिंहृदिपरिरभ्यजहामिमर्त्यनीडं ॥ १२ ॥ सूतउवाच ॥ कृष्णएवंभगवतिमनोवा
ग्दृष्टिवृत्तिभिः ॥ आत्मन्यात्मानमावेश्यसोंतः श्वासउपारमत् ॥ १३ ॥ संपद्यमानमाज्ञायभी
ष्मंब्रह्मणिनिष्कले ॥ सर्वेबभूवुस्तेतूष्णींवयांसीवदिनात्यये ॥१४॥ तत्रदुंदुभयोनेदुर्देवगंधर्ववादि
ताः॥शशंसुःसाधवोब्रह्मन्नरवात्पेतुःपुष्पवृष्टयः॥१५॥ इति श्रीभागवते भीष्मकृत भगवत्स्तुतिः॥
अथ वेंकटेशस्तोत्रप्रारंभः ॥ हरिः ॐ ॥ वेंकटेशोवासुदेवः प्रद्युम्नोमितविक्रमः ॥ संकर्षणोऽ
निरुद्धश्वशेषाद्रिपतिरेवच ॥ १ ॥ जनार्दनःपद्मनाभो वेंकटाचलवासनः ॥ सृष्टिकर्ताजगन्ना
थो माधवो भक्तवत्सलः ॥ २ ॥ गोविंदोगोपतिःकृष्णः केशवोगरुडध्वजः ॥ वराहोवामनश्चै
व नारायणअधोक्षजः ॥ ३ ॥ श्रीधरःपुंडरीकाक्षः सर्वदेवस्तुतोहरिः ॥ श्रीनृसिंहोमहासिंहः

SGDF
Sri Gargeshwari Digital Foundation

स्त्राकारःपुरातनः ॥ ४ ॥ रमानाथोमहीभर्ता भूधरःपुरुषोत्तमः ॥ चोळपुत्रप्रियःशांतो ब्रह्मा
दीनांवरप्रदः ॥ ५ ॥ श्रीनिधिःसर्वभूतानां भयकृद्भयनाशनः ॥ श्रीरामोरामभद्रश्च भवबंधैक
मोचकः ॥ ६ ॥ भूतावासोगिरावासः श्रीनिवासःश्रियःपतिः ॥ अच्युतानंतगोविंदो विष्णु
र्वेंकटनायकः॥७॥ सर्वदेवैकशरणं सर्वदेवैकदैवतं ॥ समस्तदेवकवचं सर्वदेवशिखामणिः ॥८॥
इतीदंकीर्तितंयस्य विष्णोरमिततेजसः ॥ त्रिकालेयःपठेन्नित्यं पापंतस्यनविद्यते ॥ ९ ॥ राज
द्वारेपठेद्घोरे संग्रामेरिपुसंकटे ॥ भूतसर्पपिशाचादिभयंनास्तिकदाचन ॥ १० ॥ अपुत्रोलभ
तेपुत्रान् निर्धनोधनवान्भवेत् ॥ रोगार्तोमुच्यतेरोगाद्बद्धोमुच्येतबंधनात् ॥ ११ ॥ यद्यदिष्ट
तमंलोके तत्तत्प्राप्नोत्यसंशयः ॥ ऐश्वर्यंराजसन्मानं भुक्तिमुक्तिफलप्रदं ॥ १२ ॥ विष्णोर्लोकै
कसोपानंसर्वदुःखैकनाशनं ॥ सर्वैश्वर्यप्रदन्नृणांसर्वमंगलकारकं ॥ १३ ॥ मायावीपरमानंदंत्य
क्त्वावैकुंठमुत्तमं ॥ स्वामिपुष्करिणीतीरेरमयासहमोदते ॥ १४ ॥ कल्याणाद्भुतगात्राय का
मितार्थप्रदायिने ॥ श्रीमद्वेंकटनाथाय श्रीनिवासायतेनमः॥ १५ ॥ इति श्रीब्रह्मांडपुराणे ब्रह्म
नारदसंवादे वेंकटगिरिमाहात्म्ये श्रीमद्वेंकटेशस्तोत्रं संपूर्णं ॥ श्रीकृष्णार्पणमस्तु ॥

SGDF
Sri Gurgeshwara Digital Foundation

165

अथ कृष्णाष्टकप्रारंभः ॥ ॥ मध्वमानसपद्मभानुसमंस्मरप्रतिसंस्मर स्निग्धनिर्मलशीतकांति
लसन्मुखंकरुणोन्मुखं ॥ हृद्यकंबुसमानकंधरमक्षयंदुरितक्षयं स्निग्धसंस्तुतरौप्यपीठकृतालयंहरि
मालयं॥ पालयाच्युतपालयाजितपालयाकमलालय लीलयाधृतभूधरांबुरुहोदरस्वजनोदर॥१॥
अंगदादिशुभोभपाणियुगेनसंक्षुभितैनसंतुंगमाल्यमणींद्रहारसरोरसंखलनीरसं ॥ मंगलप्रदमंथ
दामविराजितंभजताजितंतंगृणेवररौप्यपीठकृतालयंहरिमालयं ॥ पालया० ॥ २ ॥ पीनरम्यत
नूदरंभजहेमनःशुभहेमनःस्वानुभावनिदर्शनायदिशंतमर्थिसुशंतमं ॥ आनतोस्मिनिजार्जुन
प्रियसाधकंखलबाधकं हीनतोज्झितरौप्यपीठकृतालयंहरिमालयं ॥ पालया० ॥ ३ ॥ हेमकिं
किणिमालिकारसनांचितंतमवंचितं रत्नकांचनवस्त्रचित्रकटिंघनप्रभयाघनं ॥ कम्रनागकरोप
मोरुमनामयंशुभधीमयंनौम्यहंवररूप्यपीठकृतालयंहरिमालयं ॥ पालया० ॥ ४ ॥ वृत्तजानुम
नोज्ञजंघममोहदंपरमोहदंरत्नकल्पनखत्विषाहृतमुत्तमस्तुतिमुत्तमं ॥ प्रत्यहंरचितार्चनंरमयास्व
यागतयास्वयं चित्तचिंतयरौप्यपीठकृतालयंहरिमालयं ॥ पालया० ॥ ५ ॥ चारुपादसरोजयु
ग्मरुचामरोच्चयचामरो दारमूर्धजभारमंडलरंजकंकलिभंजकं ॥ वीरतोचितभूषणंवरनूपुरंस्वतनू

SGDF
Sri Gurgeshwari Digital Foundation

पुरं धारयात्मनिरौप्यपीठकृतालयंहरिमालयं ॥ पालया० ॥ ६ ॥ शुष्कवादिमनोतिदूरतराग
मोत्सवदागमं सत्कवींद्रवचोविलासमहोदयंमहितोदयं ॥ लक्षयामियतीश्वरैःकृतपूजनंगुणभाज
नं धिक्कृतोपमरौप्यपीठकृतालयंहरिमालयं ॥ पालया० ॥ ७ ॥ नारदप्रियमाविशांबुरुहेक्षणंनि
जलक्षणंद्वारकोपमचारुदीपरुचांतरेगतचिंतरे ॥ धीरमानसपूर्णचंद्रसमानमच्युतमानमद्वारकोप
मरौप्यपीठकृतालयंहरिमालयं ॥ पालया० ॥ ८ ॥ रौप्यपीठकृतालयस्यहरेः प्रियंदुरिताप्रियंत
त्पदार्चकवादिराजयतीरितंगुणपूरितं ॥ गौप्यमष्टकमेतदुच्चमुदेममत्विहनिर्ममप्राप्यशुद्धफलाय
तत्रसुकोमलंहतधीमलं ॥ पालया० ॥ ९ ॥ श्रीकृष्णार्पणमस्तु ॥ ॥ ॥
॥ अथमंगलाष्टकं ॥ लक्ष्मीर्यस्यपरिग्रहःकमलभूःसूनुर्गरुत्मान्रथः पौत्रश्चंद्रविभूषणःसुरगुरुःशे
षश्चशय्यासनः ॥ ब्रह्मांडंवरमंदिरंसुरगणायस्यप्रभोःसेवकाः सत्रैलोक्यकुटुंबपालनपरःकुर्यात्स
दामंगलं ॥ १ ॥ ब्रह्मावायुगिरीशशेषगरुडादेवेंद्रकामौगुरुश्चंद्रार्कौवरुणानलौमनुयमौवित्तेश
विघ्नेश्वरौ ॥ नासत्यौनिर्ऋतिर्मरुद्गणयुताःपर्जन्यमित्रादयः सस्त्रीकाःसुरपुंगवाःप्रतिदिनंकुर्वंतु ८३
वोमंगलं ॥ २ ॥ विश्वामित्रपराशरौर्वभृगवोगस्त्यःपुलस्त्यःक्रतुः श्रीमानत्रिमरीचिकौत्सपुल

हाःशक्तिर्वसिष्ठोंगिराः ॥ मांडव्योजमदग्निगौतमभरद्वाजादयस्तापसाः श्रीमद्विष्णुपदाब्जभ
क्तिनिरताःकुर्वंतुवो० ॥ ३ ॥ मांधातानहुषोंबरीषसगरोराजापृथुर्हैहयः श्रीमान्धर्मसुतोनलो
दशरथोरामोययातिर्यदुः ॥ इक्ष्वाकुश्च विभीषणश्चभरतश्चोत्तानपादध्रुवावित्याद्याभुविभूभुजः
प्रतिदिनंकु० ॥ ४ ॥ श्रीमेरुर्हिमवांश्चमंदरगिरिःकैलासशैलस्तथामाहेंद्रोमलयश्चविंध्यनिषधौ
सिंहस्तथारैवतः ॥ सह्याद्रिर्वरगंधमादनगिरिर्मैनाकगोमंतकावित्याद्याभुविभूभृतःप्रतिदिनं
कु० ॥ ५ ॥ गंगासिंधुसरस्वतीचयमुनागोदावरीनर्मदा कृष्णाभीमरथीचफल्गुसरयूःश्रीगंडकी
गोमती ॥ कावेरीकपिलाप्रयागविनतावेत्रावतीत्यादयोनद्यःश्रीहरिपादपंकजभवाःकु० ॥ ६ ॥
वेदाश्चोपनिषद्गणाश्चविविधाःसांगाः पुराणान्वितावेदांताअपिमंत्रतंत्रसहितास्तर्कास्स्मृतीनां
गणाः॥ काव्यालंकृतिनीतिनाटकगणाःशब्दाश्चनानाविधाःश्रीविष्णोर्गुणराशिकीर्तनपराःकु०
॥ ७ ॥ आदित्यादिनवग्रहाः शुभकरामेषादयोराशयोनक्षत्राणिसयोगकाश्चतिथयस्तद्देवतास्त
द्गणाः ॥ मासाब्दाऋतवस्तथैवदिवसाःसंध्यास्तथारात्रयःसर्वेस्थावरजंगमाःप्रतिदिनंकु० ॥ ८ ॥
इत्येतद्वरमंगलाष्टकमिदंश्रीवादिराजेश्वरैर्व्याख्यातंजगतामभीष्टफलदंसर्वाशुभध्वंसनं॥मांगल्या

SGDF
Sri Gargeshwari Digital Foundation

दिंशुभक्रियासुसततंसंध्यासुवायःपठेत्धर्मार्थादिसमस्तवांछितफलंप्राप्नोत्यसौमानवः॥९॥ ॥
अथदामोदरस्तोत्रप्रारंभः ॥ मत्स्याकृतिधरजयदेवेशवेदविबोधककूर्मस्वरूप ॥ मंदरगिरिधरसू
कररूपभूमिविधारकजयदेवेश ॥ १ ॥ कांचनलोचननरहरिरूपदुष्टहिरण्यकभंजनजयभो ॥
जयजयवामनबलिविध्वंसिन्दुष्टकुलांतकभार्गवरूप ॥२॥ जयविश्रवसःसुतविध्वंसिन्जयकंसारे
यदुकुलतिलक ॥ जयवृंदावनचरदेवेशदेवकिनंदननंदकुमार ॥ ३ ॥ जयगोवर्धनधरवत्सारेधे
नुकभंजनजयकंसारे ॥ रुग्मिणिनायकजयगोविंदसत्यावल्लभपांडवबंधो ॥४॥ खगवरवाहनज
यपीठारेजयसुरभंजनपार्थसखेत्वं ॥ भौमविनाशकदुर्जनहारिन्सज्जनपालकजयदेवेश ॥ ५ ॥
शुभगुणगणपूरितविश्वेशजयपुरुषोत्तमनित्यविबोध ॥ भूमिभरांतककारणरूपजयखरभंजनदेव
वरेण्य ॥ ६ ॥ विधिभवसुखसुरसततसुवंदितसच्चरणांबुजकंजसुनेत्र ॥ सकलसुरासुरनिग्रहका
रिन्पूतनिमारणजयदेवेश ॥ ७ ॥ यद्भ्रूविभ्रममात्रात्तादिदंमाकमलासनशंभुविपाद्यं ॥ सृष्टि
स्थितिलयमृच्छतिसर्वंस्थिरचरवल्लभसत्वंजयभो ॥ ८ ॥ जययमलार्जुनभंजनमूर्तेजयगोपीकुच
कुंकुमांकितांग ॥ पांचालीपरिपालनजयभोजयगोपीजनरंजनजयभो ॥ ९ ॥ जयरासोत्सव

SGDF Sri Gangeshwari Digital Foundation

रतलक्ष्मीशसततसुखार्णवजयकंजाक्ष ॥ जयजननीकरपाश्वसुबत्धहरणान्नवनीतस्यसुरेश ॥१०॥
बालक्रीडनपरजयभोत्वंमुनिवरवंदितपादपद्मेश ॥ कालियफणिफणमर्दनजयभोद्विजपत्न्यार्पि
तमत्सिविभोन्नं ॥ ११ ॥ क्षीरांबुधिकृतनिलयनदेववरदमहाबलजयजयकांत ॥ दुर्जनमोहक
बुत्धस्वरूपसज्जनबोधककल्किस्वरूप ॥ १२ ॥ जययुगकृतदुर्जनविध्वंसिन्जयजयजयभो
जयविश्वात्मन् ॥ इतिमंत्रंपठन्नेवकुर्यान्नीराजनंबुधः ॥ १३ ॥ घटिकाद्वयशिष्टायांस्नानंकुर्याद्य
थाविधि ॥ अन्यथानरकंयातियावदिंद्राश्चतुर्दश ॥ १४ ॥ ॥ इतिदामोदराष्टकं ॥
मध्वगुरो० ॥ कायेनवाचामनसेंद्रियैर्वाबुध्यात्मनावानुसृतःस्वभावं ॥ करोमियद्यत्सकलंपरस्मै
नारायणायेतिसमर्पयेतत् ॥ १ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥
॥ श्रीलक्ष्मीनृसिंहप्रसीद ॥ अथ नारायणवर्मप्रारंभः ॥ राजोवाच ॥ ययागुप्तःसहस्राक्षःसवाहान्रि
पुसैनिकान् ॥ क्रीडन्निवविनिर्जित्यत्रैलोक्यांबुभुजेश्रियं ॥ १ ॥ भगवंस्तन्ममाख्याहिवर्मनारा
यणात्मकं ॥ यथाततायिनःशत्रून्येनगुप्तोजयन्मृधे ॥ २ ॥ श्रीबादरायणिरुवाच ॥ वृतःपुरो
हितस्त्वाष्ट्रोमहेंद्रायानुपृच्छते ॥ नारायणाख्यंवर्माहतदिहैकमनाःश्रुणु ॥ ३ ॥ विश्वरूपउवाच ॥

SGDF
Sri Gargeshwari Digital Foundation

170

आ० धौतांघ्रिपाणिराचम्यसपवित्रउदङ्मुखः ॥ कृतस्वांगकरन्यासोमंत्राभ्यांवाग्यतःशुचिः ॥ ४ ॥ प०
८५ नारायणमयंवर्मसन्नह्येद्भयआगते ॥ दैवभूतात्मकर्मभ्योनारायणमयःपुमान् ॥ ५ ॥ पादयो
र्जानुनोरूर्वोरुदरेहृद्यथोरसि ॥ मुखेशिरस्यानुपूर्व्यादोंकारादीनिविन्यसेत् ॥ ६ ॥ ॐ नमोना
रायणायेतिविपर्ययमथापिवा ॥ करन्यासंततःकुर्याद्द्वादशाक्षरविद्यया ॥ ७ ॥ प्रणवादियका
रांतमंगुल्यंगुष्ठपर्वसु ॥ न्यसेद्धृदयओंकारंविकारमनुमूर्धनि ॥ ८ ॥ षकारंतुभ्रुवोर्मध्येणकारंशि
खयादिशेत् ॥ वेकारंनेत्रयोर्युंज्यान्नकारंसर्वसंधिषु ॥ ९ ॥ मकारमस्त्रमुद्दिश्यमंत्रमूर्तिर्भवेद्बुधः ॥
सविसर्गंफडंतंतुसर्वदिक्षुविनिर्दिशेत् ॥ १० ॥ ॐ विष्णवेनमः ॥ इत्यात्मानंपरंध्यायेद्ध्ये
यंषट्शक्तिभिर्युतं ॥ विद्यातेजस्तपोमूर्तिरिमंमंत्रमुदाहरेत् ॥ ११ ॥ ॐ हरिर्विदध्यान्ममसर्वरक्षां
न्यस्तांघ्रिपद्मःपतगेंद्रपृष्ठे ॥ दरारिचर्मासिगदेषुचापपाशान्दधानोष्टगुणोष्टबाहुः ॥ १२ ॥
जलेषुमांरक्षतुमत्स्यमूर्तिर्यादोगणेभ्योवरुणस्यपाशात् ॥ स्थलेचमायावटुवामनोऽव्यात्त्रिविक्रमः ८५
खेवतुविश्वरूपः ॥ १३ ॥ दुर्गेष्वटव्याजिमखादिषुप्रभुःपायान्नृसिंहोसुरयूथपारिः ॥ विमुंचतो
यस्यमहाट्टहासंदिशोविनेदुर्न्यपतंश्चगर्भाः ॥ १४ ॥ रक्षत्वसौमाध्वनियज्ञकल्पःस्वदंष्ट्रयोन्नीतध

171

रोवराहः ॥ रामोद्रिकूटेष्वथविप्रवासेसलक्ष्मणोव्याद्भरताग्रजोमां ॥ १५ ॥ मामुग्रधन्वाअखिल
प्रमादान्नारायणःपातुनरश्चहासात् ॥ दत्तस्त्वयोगादथयोगनाथःपायाद्गुणेशःकपिलःकर्मबंधात्
॥ १६ ॥ सनत्कुमारोवतुकामदेवाद्धयशीर्षोमांपथिदेवहेलनात् ॥ देवर्षिवर्यःपुरुषांतरार्चनात्कूर्मो
हरिर्मांनिरयादशेषात् ॥ १७ ॥ धन्वंतरिर्भगवान्पात्वपथ्याद्द्वंद्वाद्भयादृषभोनिर्जितात्मा ॥ यज्ञश्चलो
कादुततत्कृतान्नोबलोगणात्क्रोधवशादहींद्रः ॥ १८ ॥ द्वैपायनोभगवान्संप्रमोहाद्बुद्धस्तुपाषं
डगणात्प्रमादात् ॥ कल्कीकलेःकालमलात्प्रपातुधर्मावनायोरुकृतावतारः ॥ १९ ॥ मांकेशवो
गदयाप्रातरव्याद्गोविंदआसंगवआत्तवेणुः ॥ नारायणःपातुसदात्तशक्तिर्मध्यंदिनेविष्णुररींद्रपा
णिः ॥ २० ॥ देवोपराण्हेमधुहोग्रधन्वासायंत्रिधामावतुमाधवोमां ॥ दोषेहृषीकेशउतार्धरात्रे
निशीथएकोवतुपद्मनाभः ॥ २१ ॥ श्रीवत्सलक्ष्मापररात्रईशःप्रत्यूषईशोसिधरोजनार्दनः ॥
दामोदरोव्यादनुसंध्यंप्रभातेविष्णुःश्रीमान्भगवान्कालमूर्तिः ॥ २२ ॥ चक्रंयुगांतानलतिग्मने
मिभ्रमत्समंताद्भगवत्प्रयुक्तं ॥ दंदग्धिदंदग्ध्यरिसैन्यमाशुकक्षंयथावातसखोहुताशः ॥ २३ ॥ गदेश
निस्पर्शनविस्फुलिंगेनिष्पिंढिनिष्पिंढ्यजितप्रियासि ॥ कूष्मांडवैनायकयक्षरक्षोभूतग्रहांश्चूर्णयचू

SGDF

र्णयारीन् ॥२४॥ त्वंयातुधानप्रमथप्रेतमातृपिशाचविप्रग्रहघोरदृष्टीन् ॥ दरेंद्रविद्रावयकृष्णपूरितोभी
मस्वनोरीन्हृदयानिकंपयन् ॥ २५॥ त्वंतिग्मधारासिवरारिसैन्यमीशप्रयुक्तोममछिंधिछिंधि ॥ चक्षूं
षिचर्मन्शतचंद्रछादयद्विषामघंनोहरपापचक्षुषां ॥ २६ ॥ यन्नोभयंग्रहेभ्योभूत्केतुभ्योनृभ्यएवच
॥ सरीसृपेभ्योदंष्ट्रिभ्योभूतेभ्योघेभ्यएवच ॥ २७॥ सर्वाण्येतानिभगवन्नामरूपास्त्रकीर्तनात् ॥ प्रयां
तुसंक्षयंसद्योयेन्येश्रेयःप्रतीपकाः ॥ २८ ॥ गरुडोभगवांस्तोत्रस्तोमछंदोमयःप्रभुः ॥ रक्षत्वशे
षकृछ्रेभ्योविष्वक्सेनःस्वनामभिः ॥ २९ ॥ सर्वापद्भ्योहरेर्नामरूपयानायुधानिनः ॥ बुद्धींद्रिय
मनःप्राणान्पांतुपार्षदभूषणाः ॥ ३० ॥ यथाहिभगवानेववस्तुतःसदसच्चयत् ॥ सत्येनतेननःस
र्वेयांतुनाशमुपद्रवाः ॥ ३१ ॥ यथैकात्म्यानुभावेनविकल्परहितःस्वयं ॥ भूषणायुधलिंगाख्याध
त्तेशक्तीःस्वमायया ॥३२॥ तेनैवसत्यमानेनसर्वज्ञोभगवान्हरिः॥ पातुसर्वैःस्वरूपैर्नःसदासर्वत्रस
र्वगः ॥३३॥ विदिक्षुदिक्षूर्ध्वमधःसमंतादंतर्बहिर्भगवान्नारसिंहः ॥ प्रहापयल्लोकभयंस्वनेनस्वते
जसाग्रस्तसमस्ततेजाः ॥ ३४ ॥ ॥ मघवन्निदमाख्यातंवर्मनारायणात्मकं ॥ विजेष्यस्यं
जसायेनदंशितोसुरयूथपान् ॥ ३५ ॥ एतद्धारयमाणस्तुयंयंपश्यतिचक्षुषा ॥ पदावासंस्पृशेत्

SGDF
Sri Gargeshwari Digital Foundation

सद्यःसाध्वसात्सविमुच्यते ॥ ३६ ॥ नकुतश्चिद्भयंतस्यविद्यांधारयतोभवेत् ॥ राजदस्युग्रहादि
भ्योऽव्याध्यादिभ्यश्चकर्हिचित् ॥३७॥ इमांविद्यांपुराकश्चित्कौशिकोधारयन्द्विजः ॥ योगधारण
यास्वांगंजहौसमरुधन्वनि ॥ ३८ ॥ तस्योपरिविमानेनगंधर्वपतिरेकदा ॥ ययौचित्ररथस्त्रीभि
र्वृतोयत्रद्विजक्षयः ॥ ३९ ॥ सांगनोन्यपतत्सद्यःसविमानोह्यवाक्शिराः ॥ विद्यामिमांधारयतो
मृतस्यास्थिविलंघनात् ॥ ४० ॥ सवालिखिल्यवचनादस्थीन्यादायविस्मितः ॥ प्रास्यप्राचीस
रस्वत्यांस्नात्वाधामस्वमन्वगात् ॥ ४१ ॥ यइदंश्रुणुयात्कालेयोधारयतिचाहृतः ॥ तंनमस्यंति
भूतानिमुच्यतेसर्वतोभयात् ॥ ४२ ॥ एतांविद्यामधिगतोविश्वरूपाच्छतक्रतुः॥ त्रैलोक्यलक्ष्मीं
बुभुजेविनिर्जित्यमृधेसुरान् ॥ ४३ ॥ इति श्रीमद्भागवते षष्ठस्कंधे नारायणवर्मोपदेशोनाम
अष्टमोध्यायः ॥ ८ ॥ ॥ श्रीलक्ष्मीनृसिंहार्पणमस्तु ॥ ॥ ॥

श्रीगुरुभ्योनमः॥ श्रीमहालक्ष्म्यैनमः ॥ अथ श्रीलक्ष्मीहृदयप्रारंभः ॥ अस्यश्री आद्यादि श्री महा
लक्ष्मीहृदयस्तोत्रमालामंत्रस्य भार्गवऋषिः शिरसि ॥ अनुष्टुबादिनानाछंदांसि मुखे॥ आद्या
दि श्रीमहालक्ष्मीर्देवता हृदये ॥ श्रीं बीजायनमः हृदये ॥ ऱ्हीं शक्तयेनमः गुह्ये ॥ ऐं कीलकं

SGDF
Sri Gangadharan Digital Foundation

 पादयोः ॥ ॐ श्रीं अंगुष्ठाभ्यांनमः ॥ ॐ ऱ्हीं तर्जनीभ्यांनमः ॥ ॐ ऐं मध्यमाभ्यानमः ॥ ॐ
श्रीं अनामिकाभ्यांनमः ॥ ॐ ऱ्हीं कनिष्ठिकाभ्यांनमः ॥ ॐ ऐं करतलकरपृष्ठाभ्यांनमः ॥ ॐ
श्रीं हृदयायनमः ॥ ॐ ऱ्हीं शिरसेस्वाहा ॥ ॐ ऐं शिखायैवौषट् ॥ ॐ श्रीं कवचायहुं ॥ ॐ
ऱ्हीं नेत्रत्रयायवौषट् ॥ ॐ ऐं अस्त्रायफट् ॥ ॐ भूर्भुवःस्वरोमितिदिग्बंधः ॥ अथध्यानं ॥
वंदेलक्ष्मींपरशिवमयींशुद्धजांबूनदाभां तेजोरूपांकनकवसनांसर्वभूषोज्वलांगीं ॥ बीजापूरंक
नककलशंहेमपद्मंदधाना माद्यांशक्तिंसकलजननींविष्णुवामांकसंस्थां ॥१॥ श्रीमत्सौभाग्यज
ननींस्तौमिलक्ष्मींसनातनीं ॥ सर्वकामफलावाप्तिसाधनैकसुखावहां ॥ २ ॥ स्मरामिनित्यंदेवे
शित्वयाप्रेरितमानसः ॥ त्वदाज्ञांशिरसाधृत्वाभजामिपरमेश्वरीं ॥ ३ ॥ समस्तसंपत्सुखदांमहा
श्रियंसमस्तसौभाग्यकरींमहाश्रियं ॥ समस्तकल्याणकरींमहाश्रियंभजाम्यहंज्ञानकरींमहाश्रियं
॥ ४ ॥ विज्ञानसंपत्सुखदांसनातनींविचित्रवाग्भूतिकरींमनोहरां ॥ अनंतसंमोदसुखप्रदायि
नींनमाम्यहंभूतिकरींहरिप्रियां ॥ ५ ॥ समस्तभूतांतरसंस्थितात्वंसमस्तभोक्त्रीश्वरिविश्वरूपे ॥ ८७
तन्नास्तियत्त्वद्व्यतिरिक्तवस्तुत्वत्पादपद्मंप्रणमाम्यहंश्रीः ॥ ६ ॥ दारिद्र्यदुःखौघतमोपहंत्रित्वत्पा

दपद्मंमयिसन्निधत्स्व ॥ दीनार्तिविच्छेदनहेतुभूतेकृपाकटाक्षैरभिषिंचमांश्रीः ॥ ७ ॥ अंबप्रसी
दकरुणासुधयार्द्रदृष्ट्यामांत्वत्कृपाद्रविणगेहमिमंकुरुष्व ॥ आलोकयप्रणतहृद्गतशोकहंत्रित्वत्पा
दपद्मयुगलंप्रणमाम्यहंश्रीः ॥ ८ ॥ शांत्यैनमोस्तुशरणागतरक्षणायैकांत्यैनमोस्तुकमनीयगुणा
श्रयायै ॥ क्षांत्यैनमोस्तुदुरितक्षयकारणायैधात्र्यैनमोस्तुधनधान्यसमृद्धिदायै ॥ ९ ॥ शक्त्यैन
मोस्तुशशिशेखरसंस्तुतायैरत्यैनमोस्तुरजनीकरसोदरायै ॥ भक्त्यैनमोस्तुभवसागरतारकायैम
त्यैनमोस्तुमधुसूदनवल्लभायै ॥ १० ॥ लक्ष्म्यैनमोस्तुशुभलक्षणलक्षितायैसिध्यैनमोस्तुशिवसि
द्धसुपूजितायै ॥ धृत्यैनमोस्त्वमितदुर्गतिभंजनायैगत्यैनमोस्तुवरसद्गतिदायकायै ॥ ११ ॥
देव्यैनमोस्तुदिविदेवगणार्चितायैभूत्यैनमोस्तुभुवनार्तिविनाशनायै ॥ दांत्यैनमोस्तुधरणीधरव
ल्लभायैपुष्ट्यैनमोस्तुपुरुषोत्तमवल्लभायै ॥ १२ ॥ सुतीव्रदारिद्र्यविदुःखहंत्र्यैनमोस्तुतेसर्वभयाप
हंत्र्यै ॥ श्रीविष्णुवक्षस्थलसंस्थितायैनमोनमःसर्वविभूतिदायै ॥ १३ ॥ जयतुजयतुलक्ष्मीर्लक्ष
णालंकृतांगीजयतुजयतुपद्मापद्मसद्माभिवंद्या ॥ जयतुजयतुविद्याविष्णुवामांकसंस्थाजयतुज
यतुसम्यक्सर्वसंपत्करीश्रीः ॥ १४ ॥ जयतुजयतुदेवीदेवसंघाभिपूज्याजयतुजयतुभद्राभार्ग

SGDF Sri Gangadhar Digital Foundation

आ० वीभाग्यरूपा ॥ जयतुजयतुनित्यानिर्मलज्ञानवेद्याजयतुजयतुसत्यासर्वभूतांतरस्था ॥ १५ ॥ प०
८८ जयतुजयतुरम्यारत्नगर्भांतरस्थाजयतुजयतुशुद्धाशुद्धजांबूनदाभा ॥ जयतुजयतुकांताकां
तिमद्भासितांगीजयतुजयतुशांताशीघ्रमागच्छसौम्ये ॥ १६ ॥ यस्याःकलायाःकमलोद्भ
वाद्यारुद्राश्चशक्रप्रमुखाश्चदेवाः ॥ जीवंतिसर्वाअपिशक्तयस्ताःप्रभुत्वमाप्ताःपरमायुषस्ते ॥ १७॥
ॐ ईं यं रं वं लं हं ॥ लिलेखनिटिलेविधिर्ममलिपिंविसृज्यांतरंत्वयाविलिखितव्यमेतदितितत्फल
प्राप्तये ॥ तदंतरमलेस्फुटंकमलवासिनिश्रीरिमांसमर्पयसुमुद्रिकांसकलभाग्यसंसूचिकां ॥ १८ ॥
ॐ ऱ्हां ऱ्हीं ऐं आं ऋं यं वं सं ॥ कलयातेयथादेविजीवंतिसचराचराः ॥ तथासंपत्करेलक्ष्मिसर्व
दासंप्रसीदमे॥ १९॥ यथाविष्णुर्ध्रुवेनित्यंस्वकलांसंन्यवेशयेत्॥ तथैवस्वकलांलक्ष्मिमयिसम्यक्स
मर्पय ॥ २० ॥ सर्वसौख्यप्रदेदेविभक्तानामभयप्रदे ॥ अचलांकुरुयत्नेनकलांमयिनिवेशितां
॥ २१ ॥ मुदास्तांमद्भालेपरमपदलक्ष्मिस्फुटकलासदावैकुंठश्रीर्निवसतुकलामेनयनयोः ॥
नयनबीजं ॥ ॐ घ्रां घ्रीं घ्रूं घ्रैं घ्रौं घ्रः ॥ वसेत्सत्येलोकेममवचसिलक्ष्मीवरकलाश्रियःश्वेतद्वी ८८
पेनिवसतुकलामेस्वकरयोः ॥ २२ ॥ तावन्नित्यंममांगेषुक्षीराब्धौश्रीकलावसेत् ॥ सूर्याचंद्रमसौ

SGDF
Sri Gangadharan Digital Foundation

177

यावद्यावल्लक्ष्मीपातिः श्रिया ॥ २३ ॥ सर्वमंगळसंपूर्णासर्वैश्वर्यसमन्विता ॥ आद्यादिश्रीमहाल
क्ष्मीस्त्वत्कलामयितिष्ठतु ॥ २४ ॥ अज्ञानतिमिरंहंतुंशुद्धज्ञानप्रकाशिका ॥ सर्वैश्वर्यप्रदामेस्तु
त्वत्कलामयिसंस्थिता ॥ २५ ॥ अलक्ष्मींहरतुक्षिप्रंतमः सूर्यप्रभायथा ॥ वितनोतुममश्रेयस्त्वत्क
लामयिसंस्थिता ॥ २६ ॥ ऐश्वर्यमंगलोत्पत्तिस्त्वत्कलायांनिधीयते ॥ मयितस्मात्कृतार्थोस्मि
पात्रमस्मिस्थितेस्तव ॥ २७ ॥ भवदावेशभाग्यार्होभाग्यवानस्मिभार्गवि ॥ त्वत्प्रसादात्पवित्रो
हंलोकमातर्नमोस्तुते ॥ २८ ॥ जानुबीजं ॥ ॐ ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः ॥ पुनासिमांत्वत्कल
यैवयस्मादतः समागच्छममाग्रतस्त्वं ॥ परंपदंश्रीर्भवसुप्रसन्नामय्यच्युतेनप्रविशादिलक्ष्मीः ॥ २९ ॥
श्रीवैकुंठस्थितेलक्ष्मिसमागच्छममाग्रतः ॥ नारायणेनसहमांकृपादृष्ट्यावलोकय ॥ ३० ॥ सत्य
लोकस्थितेलक्ष्मित्वंममागच्छसंनिधिं ॥ वासुदेवेनसहिताप्रसीदवरदाभव ॥ ३१ ॥ श्वेतद्वीप
स्थितेलक्ष्मिशीघ्रमागच्छसुव्रते ॥ विष्णुनासहितेदेविजगन्मातः प्रसीदमे ॥ ३२ ॥ क्षीरांबुधि
स्थितेलक्ष्मिसमागच्छसमाधवे ॥ त्वत्कृपादृष्टिसुधयासततंमांविलोकय ॥ ३३ ॥ रत्नगर्भस्थिते
लक्ष्मिपरिपूर्णहिरण्मयि ॥ समागच्छसमागच्छस्थित्वाशुपुरतोमम ॥ ३४ ॥ स्थिराभवमहालक्ष्मि

SGDF
Sri Gargeshwari Digital Foundation

निश्चलाभवनिर्मले ॥ प्रसन्नेकमलेदेविप्रसन्नहृदयाभव ॥ ३५ ॥ श्रीधरेश्रीमहाभूतेत्वदंतस्थंम
हानिधिं ॥ शीघ्रमुत्धृत्यपुरतःप्रदर्शयसमर्पय ॥ ३६ ॥ वसुंधरेश्रीवसुधेवसुदोग्ध्रिकृपामयि ॥
त्वत्कुक्षिगतसर्वस्वंशीघ्रंमेसंप्रदर्शय ॥ ३७ ॥ विष्णुप्रियेरत्नगर्भेसमस्तफलदेशिवे ॥ त्वद्गर्भगत
हेमादीन्संप्रदर्शयदर्शय ॥ ३८ ॥ रसातळगतेलक्ष्मिशीघ्रमागच्छमेपुरः ॥ नजानेपरमंरूपंमात
र्मेसंप्रदर्शय ॥ ३९ ॥ आविर्भवमनोवेगाच्छीघ्रमागच्छमेपुरः ॥ मावत्सभैरिहेत्युक्त्वाकामगौरि
वरक्षमां ॥ ४० ॥ देविशीघ्रंसमागच्छधरिणीगर्भसंस्थिते ॥ मातस्त्वद्भृत्यभृत्योहंमृगये
त्वांकुतूहलात् ॥ ४१ ॥ उत्तिष्ठजागृहित्वंमेसमुत्तिष्ठसुजागृहि ॥ अक्षय्यान्हेमकलशान्सुवर्णे
नसुपूरितात् ॥ ४२ ॥ निक्षेपान्मेसमाकृष्यसमुत्धृत्यममाग्रतः ॥ समुन्नताननाभूत्वासमाधेहि
धरांतरात् ॥ ४३ ॥ मत्संनिधिंसमागच्छमदाहितकृपारसात् ॥ प्रसीदश्रेयसांदोग्ध्रिलक्ष्मीर्मेन
यनाग्रतः ॥ ४३ ॥ अत्रोपविशलक्ष्मित्वंस्थिराभवहिरण्मयि ॥ सुस्थिराभवसंप्रीत्याप्रसीदवर
दाभव ॥ ४५॥ आनीतांस्त्वंत्वयादेविनिधीन्मेसंप्रदर्शय ॥ अद्यक्षणेनसहसादत्वासंरक्षमांसदा
॥ ४६ ॥ मयितिष्ठतथानित्यंयथेंद्रादिषुतिष्ठसि ॥ अभयंकुरुमेदेविमहालक्ष्मिनमोस्तुते ॥ ४७॥

179

समागच्छमहालक्ष्मिशुद्धजांबूनदस्थिते ॥ प्रसीदपुरतःस्थित्वाप्रणतंमांविलोकय ॥४८॥ लक्ष्मी
र्भुवंगताभासियत्रयत्राहिरण्मयी ॥ तत्रतत्रस्थितात्वंमेतवरूपंप्रदर्शय ॥ ४९ ॥ क्रीडसेबहुधाभू
मौपरिपूर्णहिरण्मयि ॥ ममभूर्धनितेहस्तमविलंबितमर्पय ॥ ५० ॥ फलद्भाग्योदयेलक्ष्मिसम
स्तपुरवासिनि ॥ प्रसीदमेमहालक्ष्मिपरिपूर्णमनोरथे ॥ ५१ ॥ अयोध्यादिषुसर्वेषुनगरेषुसमा
स्थिते ॥ वैभवैर्विविधैर्युक्तासमागच्छबलान्विता ॥ ५२ ॥ समागच्छसमागच्छममाग्रेभवसु
स्थिरा ॥ करुणारसनिष्पंदनेत्रद्वयविलासिनि ॥ ५३ ॥ संनिधत्स्वमहालक्ष्मित्वत्पाणिंममम
स्तके ॥ करुणासुधयामांत्वमभिषिंचस्थिरंकुरु ॥ ५४ ॥ सर्वराजगृहेलक्ष्मिसमागच्छमुदान्विते ॥
स्थित्वाशुपुरतोमेद्यप्रसादेनाभयंकुरु ॥ ५५ ॥ सादरंमस्तकेहस्तंममत्वंकृपयार्पय ॥ सर्वराज
गृहेलक्ष्मित्वत्कलामयितिष्ठतु ॥ ५६ ॥ आद्यादिश्रीमहालक्ष्मिविष्णुवामांकसंस्थिते॥ प्रत्यक्षंकुरु
मेरूपंरक्षमांशरणागतं ॥ ५७ ॥ प्रसीदमेमहालक्ष्मिसुप्रसीदमहाशिवे ॥ अचलाभवसंप्रीत्यासु
स्थिराभवमद्गृहे ॥ ५८ ॥ यावत्तिष्ठंतिवेदाश्चयावत्वन्नामातिष्ठति ॥ यावद्विष्णुश्चयावत्वंताव
त्कुरुकृपांमयि ॥ ५९ ॥ चांद्रीकलायथाशुक्लेवर्धतेसादिनेदिने ॥ तथादयातेमय्येववर्धतामभि

SGDF Foundation

आ० वर्धतां ॥ ६० ॥ यथावैकुंठनगरेयथावैक्षीरसागरे ॥ तथामद्भवनेतिष्ठस्थिरंश्रीविष्णुनासह॥६१॥ ५०
६० योगिनांहृदयेनित्यंयथातिष्ठसिविष्णुना ॥ तथामद्भवनेतिष्ठस्थिरंश्रीविष्णुनासह ॥ ६२ ॥ ना
रायणस्यहृदयेभवतीयथास्तेनारायणोपितवहृत्कमलेयथास्ते ॥ नारयणस्त्वमपिनित्यमुभौतथै
वतौतिष्ठतांहृदिममापिदयावतिश्रीः ॥ ६३ ॥ विज्ञानवृधिंहृदयेकुरुश्रीःसौभाग्यवृधिंकुरुमेगृहे
श्रीः ॥ दयासुवृत्धिंकुरुतांमयिश्रीःसुवर्णवृत्धिंकुरुमेगृहेश्रीः ॥ ६४ ॥ नमांत्यजेथाश्रितकल्प
वल्लिसद्भक्तचिंतामणिकामधेनो ॥ विश्वस्यमातर्भवसुप्रसंनागृहेकळत्रेषुचपुत्रवर्गे ॥ ६५ ॥ कु
क्षिबीजं ॥ ॐ आं ईं ऊं ऐं औं ॥ आद्यादिमायेत्वमजांडबीजंत्वमेवसाकारनिराकृतिस्त्वं ॥ त्वया
धृताश्चाब्जभवांडसंघाश्चित्रंचरित्रंतवदेविविष्णोः ॥ ६६ ॥ ब्रह्मरुद्रादयोदेवावेदाश्चापिनश
क्नुयुः ॥ महिमानंतवस्तोतुंमंदोहंशक्नुयांकथं ॥ ६७ ॥ अंबत्वद्भक्तसवाक्यानिसूक्तासूक्तानि
यानिच ॥ तानिस्वीकुरुसर्वज्ञेदयालुत्वेनसादरं ॥६८॥ भवतींशरणंगत्वाकृतार्थास्युःपुरातनाः॥ ९०
इतिसंचिंत्यमनसात्वामहंशरणंव्रजे ॥ ६९ ॥ अनंतानित्यसुखिनस्त्वद्भक्तास्त्वत्परायणाः ॥
इतिवेदप्रमाणाद्धिदेवित्वांशरणंव्रजे ॥ ७० ॥ तवप्रतिज्ञामद्भक्तानानश्यंतीत्यपिक्कचित् ॥

SGDF
Sri Gargeshwari Digital Foundation

इतिसंचिंत्यसंचिंत्यप्राणान्संधारयाम्यहं ॥ ७१ ॥ त्वदधीनस्त्वहंमातस्त्वत्कृपामयिविद्यते ॥
यावत्संपूर्णकामःस्यांतावद्देविदयानिधे ॥ ७२ ॥ क्षणमात्रंनशक्नोमिजीवितुंत्वत्कृपांविना ॥
नजीवंतीहजलजाजलंत्यक्त्वाजलग्रहाः ॥ ७३ ॥ यथाहिपुत्रवात्सल्याज्जननीप्रस्नुतस्तनी ॥
वत्संत्वरितमागत्यसंप्रीणयतिवत्सला ॥ ७४ ॥ यदिस्यांतवपुत्रोहंमातात्वंयदिमामकी ॥
दयापयोधरस्तन्यसुधाभिरभिषिंचमां ॥ ७५ ॥ मृग्योनगुणलेशोपिमयिदोषैकमंदिरे ॥ पांसू
नांवृष्टिबिंदूनांदोषाणांचनमेमितिः ॥ ७६ ॥ पापिनामहमेकोग्र्योदयालूनांत्वमग्रणीः ॥ दय
नीयोमदन्योस्तितवकोत्रजगत्त्रये ॥ ७७ ॥ विधिनाहंनसृष्टश्चेन्नस्यात्तवदयालुता ॥ आमयो
वानसृष्टश्चेदौषधस्यवृथोदयः ॥ ७८ ॥ कृपामदग्रजाकिंतेअहंकिंवातदग्रजः ॥ विचार्यदेहि
मेवित्तंतवदेविदयानिधे ॥ ७९ ॥ मातापितात्वंगुरुसद्गतिःश्रीस्त्वमेवसंजीवनहेतुभूता ॥ अ
न्यंनमन्येजगदेकनाथेत्वमेवसर्वंममदेविसत्यं ॥ ८० ॥ हृदयबीजं ॥ ॐ ऊं आं ईं ऋं यों फट्कुरु
स्वाहा॥ आद्यादिलक्ष्मीर्भवसुप्रसंनाविशुद्धविज्ञानसुखैकदोग्ध्री ॥ अज्ञानहंत्रीत्रिगुणातिरिक्ताप्र
ज्ञाननेत्रीभवसुप्रसंना ॥ ८१ ॥ अशेषवाग्जाड्यमलापहंत्रीनवंनवंस्पष्टसुवाक्प्रदायिनी ॥

SGDF
Sri Gargeshwari Digital Foundation

182

आ० ममेहजिव्हाग्रसुरंगनर्तकीभवप्रसंनावदनेचमेश्रीः ॥ ८२ ॥ समस्तसंपत्सुविराजमानासमस्त प०
९१ तेजश्श्रयभासमाना ॥ विष्णुप्रियेत्वंभवदीप्यमानावाग्देवतामेनयनेप्रसंना ॥ ८३ ॥ सर्वप्रदर्शे
सकलार्थदेत्वंप्रभासुलावण्यदयाप्रदोग्ध्री ॥ सुवर्णदेत्वंसुमुखीभवश्रीर्हिरण्मयीमेनयनेप्रसंना
॥ ८४ ॥ सर्वार्थदासर्वजगत्प्रसूतिःसर्वेश्वरीसर्वभयापहंत्री ॥ सर्वोन्नतात्वंसुमुखीभवश्रीर्हिर
ण्मयीमेनयनेप्रसन्ना ॥ ८५ ॥ समस्तविघ्नौघविनाशकारिणीसमस्तभक्तोत्धरणेविचक्षणा ॥
अनंतसौभाग्यसुखप्रदायिनीहिरण्मयीमेनयनेप्रसन्ना ॥ ८६ ॥ देविप्रसीददयनीयतमायमह्यं
देवाधिनाथभवदेवगणाभिवंद्ये ॥ मातस्तथैवभवसंनिहितादृशोर्मेपत्यासमंममसुखेभवसुप्र
सन्ना ॥ ८७ ॥ मावत्सभैरभयदानकरोर्पितस्तेमौलौममेनिमयिदीनदयानुकंपे ॥ मातःसमर्प
यमुदाकरुणाकटाक्षंमांगल्यबीजमहिमानमजस्रमंतः ॥ ८८ ॥ कटाक्षइहकामधुक्तवमनस्तुचिं
तामणिःकरःसुरतरुःसदानवनिधिस्त्वमेवेंदिरे ॥ भवेत्तवदयारसोममरसायनंचान्वहंसुखंतवक ९१
लानिधिर्विविधवांछितार्थप्रदं ॥ ८९ ॥ यथारसस्पर्शनतोयसोपिसुवर्णतास्यात्कमलेतथाते ॥ कटा
क्षसंस्पर्शनतोजनानाममंगलानामपिमंगलत्वं ॥ ९० ॥ देहीतिनास्तीतिवचःप्रवेशाद्भीतोरमेत्वांशर

183

णंप्रपद्ये ॥ अतःसदास्मिन्नभयप्रदात्वंसहैवपत्यामयिसंनिधेहि ॥ ९१ ॥ कल्पद्रुमेणमणिनासाहितासु
रभ्याश्रीस्तेकलामयिरसेनरसायनेन ॥ आस्तांयतोममचदृक्शिरपाणिपादस्पृष्टाःसुवर्णवपुषःस्थि
रजंगमास्युः ॥ ९२ ॥ आद्यादिविष्णोःस्थिरधर्मपत्नीत्वमंबपत्यामयिसंनिधेहि ॥ आद्यादिल
क्ष्मीस्त्वदनुग्रहेणपदेपदेमेनिधिदर्शनंस्यात् ॥ ९३ ॥ आद्यादिलक्ष्मीहृदयंपठेद्यःसराज्यलक्ष्मी
मचलांतनोति ॥ महादरिद्रोपिभवेत्धनाढयस्तदन्वयेश्रीःस्थिरतांप्रयाति ॥ ९४ ॥ यस्यस्मरण
मात्रेणतुष्टास्याद्विष्णुवल्लभा ॥ तस्याभीष्टंददात्याशुतंपालयतिपुत्रवत् ॥ ९५ ॥ इदंरहस्यंहृद
यंसर्वकामफलप्रदं ॥ जपःपंचसहस्रंतुपुनश्चरणमुच्यते ॥ ९६ ॥ त्रिकालमेककालंवानरोभक्ति
समन्वितः ॥ यःपठेत्छृणुयाद्वापिसयातिपरमांश्रियं ॥ ९७ ॥ महालक्ष्मींसमुद्दिश्यनिशिभार्ग
ववासरे ॥ इदंश्रीहृदयंजप्त्वापंचवारंधनीभवेत् ॥ ९८ ॥ अनेनहृदयेनान्नंगर्भिण्याअभिमंत्रि
तं ॥ ददातितत्कुलेपुत्रोजायतेश्रीपतिःस्वयं ॥ ९९ ॥ नरेणवाथवानार्यालक्ष्मीहृदयमंत्रिते ॥
जलेपीतेचतद्वंशेमंदभाग्योनजायते ॥ १०० ॥ यआश्विनेमासिचशुक्लपक्षेरमोत्सवेसंन्निहितैर्भ
भक्त्या ॥ पठेत्तथैकोत्तरवारवृध्यालभेत्ससौवर्णमयींसुवृष्टिं ॥ १०१ ॥ यएकभक्तोन्वहमेकवर्षं

SGDF
Sri Gangadharan Digital Foundation

1854

विशुत्यधीःसप्ततिवारजापि ॥ समंदभाग्योपिरमाकटाक्षान्नवेत्सहस्त्राक्षशताधिकश्रीः ॥१०२॥ प०
श्रीशांघ्रिभक्तिंहरिदासदास्यंप्रपन्नमंत्रार्थदृढैकनिष्ठं ॥ गुरोःस्मृतिंनिर्मलबोधबुद्धिंप्रदेहिमातःपर
मंपदंश्रीः ॥ १०३ ॥ पृथ्वीपतित्वंपुरुषोत्तमत्वंविभूतिवासंविविधार्थसिद्धिं ॥ संपूर्णकीर्तिंबहुव
र्षभोगंप्रदेहिमेलक्ष्मिपुनःपुनस्त्वं ॥ १०४ ॥ वादार्थसिद्धिंबहुलोकवश्यंवयःस्थिरत्वंललनासु
भोगं ॥ पौत्रादिलब्धिंसकलार्थसिद्धिंप्रदेहिमेभार्गविजन्मजन्मनि ॥ १०५ ॥ सुवर्णवृद्धिंकु
रुमेगृहेश्रीःसुधान्यवृद्धिंकुरुमेगृहेश्रीः ॥ कल्याणवृद्धिंकुरुमेगृहेश्रीःविभूतिवृद्धिंकुरुमेगृहेश्रीः
॥ १०६ अथशिरोबीजं ॥ ॐ यं हं कं लं पं श्रीं ॥ ध्यायेल्लक्ष्मींप्रहसितमुखींकोटिबालार्कभासां
विद्युद्वर्णांबरवरधरांभूषणाढ्यांसुशोभां ॥ बीजापूरंसरसिजयुगंबिभ्रतींस्वर्णपात्रंभर्त्रायुक्तांमुहुर
भयदांमह्यपप्यच्युतश्रीः ॥ १०७ ॥ गुह्यातिगुह्यगोप्त्रीत्वंगृहाणास्मत्कृतंजपं ॥ सिद्धिर्भवतुमे
देवित्वत्प्रसादात्त्वयिस्थिता ॥१०८॥ इति श्रीअथर्वणरहस्ये लक्ष्मीहृदयस्तोत्रं संपूर्णं ॥ श्री ९२
महालक्ष्मीनृसिंहार्पणमस्तु ॥ ॥ पुनर्नारायणवर्मपठित्वासमापयेत् ॥
अथ लक्ष्मीसूक्तप्रारंभः ॥ ॐ हिरण्यवर्णांहरिणींसुवर्णरजतस्रजां ॥ चंद्रांहिरण्मयींलक्ष्मींजातवे

SGDF
Sri Gangadharan Digital Foundation

दोममावह ॥ तांमआवहजातवेदोलक्ष्मीमनपगामिनीं ॥ यस्यांहिरण्यंविंदेयंगामश्वंपुरुषानहं॥
अश्वपूर्वांरथमध्यांहस्तिनादप्रबोधिनीं ॥ श्रियंदेवीमुपव्हयेश्रीर्मादेवीजुषतां ॥ कांसोस्मितां
हिरण्यप्राकारामार्द्रांज्वलंतींतृप्तांतर्पयंतीं ॥ पद्मेस्थितांपद्मवर्णांतामिहोपव्हयेश्रियं ॥ चंद्रांप्रभा
सांयशसाज्वलंतींश्रियंलोकेदेवजुष्टामुदारां॥ तांपद्मिनीमींशरणमहंप्रपद्येअलक्ष्मीर्मेनश्यतांत्वां
वृणे ॥ आदित्यवर्णेतपसोधिजातोवनस्पतिस्तववृक्षोथबिल्वः ॥ तस्यफलानितपसानुदंतुमयांत
रायाश्चबाह्याअलक्ष्मीः ॥ उपैतुमांदेवसखःकीर्तिश्चमणिनासह ॥ प्रादुर्भूतोस्मिराष्ट्रेस्मिन्कीर्तिमृ
द्धिंददातुमे ॥ क्षुत्पिपासामलांज्येष्ठामलक्ष्मींनाशयाम्यहं ॥ अभूतिमसमृद्धिंचसर्वांनिर्णुदमेगृ
हात् ॥ गंधद्वारांदुराधर्षांनित्यपुष्टांकरीषिणीं ॥ ईश्वरींसर्वभूतानांतामिहोपव्हयेश्रियं ॥ मन
सःकाममाकूतिंवाचःसत्यमशीमहि ॥ पशूनांरूपमन्नस्यमयिश्रीःश्रयतांयशः ॥ कर्दमेनप्रजाभू
तामयिसंभ्रमकर्दम ॥ श्रियंवासयमेकुलेमातरंपद्ममालिनीं ॥ आपःस्रजंतुस्निग्धानिचिक्लीतव
समेगृहे ॥ निचदेवींमातरंश्रियंवासयमेकुले॥ आर्द्रांपुष्करिणींपुष्टिंसुवर्णांहेममालिनीं ॥ सूर्यां
हिरंण्मयींलक्ष्मींजतवेदोममावह ॥ आर्द्रांयःकरिणींयष्टींपिंगलांपद्ममालिनीं ॥ चंद्रांहिरण्मयीं

SGDF
Sri Gurgeshwari Digital Foundation

लक्ष्मींजातवेदोममावह ॥ तांमआवहजातवेदोलक्ष्मीमनपगामिनीं ॥ यस्यांहिरण्यंप्रभूतंगावो
दास्योश्वान्विंदेयंपुरुषानहं ॥ यःशुचिःप्रयतोभूत्वाजुहुयादाज्यमन्वहं ॥ श्रियःपंचदशर्चंचश्री
कामःसततंजपेत् ॥ पद्मानिनेपद्मऊरुपद्माक्षीपद्मसंभवे ॥ यन्मांभजासिपद्माक्षियेनसौख्यंलभा
म्यहं ॥ अश्वदायीगोदायीधनदायीमहाधने ॥ धनंमेजुषतांदेविसर्वकामार्थसिद्धये ॥ पुत्रपौ
त्रधनंधान्यंहस्त्यश्वादिगवेरथं ॥ प्रजानांभजसिमातआयुष्मंतंकरोतुमां ॥ धनमग्निर्धनंवायुर्धनं
सूर्योधनंवसुः ॥ धनमिंद्रोबृहस्पतिर्वरुणंधनमश्नुते ॥ वैनतेयसोमंपिबसोमंपिबतुवृत्रहा ॥ सोमं
धनस्यसोमिनोमह्यंददातुसोमिनि ॥ नक्रोधोनचमात्सर्यंनलोभोनाशुभामतिः ॥ भवंतिकृत
पुण्यानांभक्तानांश्रीसूक्तंजपेत्सदा ॥ चंद्राभांलक्ष्मीमीशानांसूर्याभांश्रियमैश्वरीं ॥ चंद्रसूर्याग्निवर्णा
भांमहालक्ष्मीमुपास्महे ॥ वर्षंतुतेविभावरिदिवोअभ्रस्यविद्युतः ॥ रोहंतुसर्वबीजान्यवब्रम्हद्वि
षोजहि ॥ पद्मप्रियेपद्मिनिपद्महस्तेपद्मानिनेपद्मदलायताक्षि ॥ विश्वप्रियेविष्णुमनोनुकूलेत्वत्पा ९३
दपद्मंमयिसन्निधत्स्व ॥ यासापद्मासनस्थाविपुलकटितटीपद्मपत्रायताक्षी गंभीरावर्तनाभिःस्त
नभरनमिताशुभ्रवस्त्रोत्तरीया ॥ लक्ष्मीर्दिव्यैर्गजेंद्रैर्मणिगणखचितैःस्नापिताहेमकुंभैर्नित्यंसा

पद्महस्तामनवसतुगृहेसर्वमांगल्ययुक्ता ॥ सिद्धलक्ष्मीर्मोक्षलक्ष्मीर्जयलक्ष्मीःसरस्वती ॥ श्रीर्ल
क्ष्मीर्वरलक्ष्मीश्चप्रसन्नांममसर्वदा ॥ वरांकुशपाशमभीतिमुद्रांकरैर्वहंतींकमलासनस्थां ॥ बालार्क
कोटिप्रतिभांत्रिनेत्रांभजेहमाद्यांजगदीश्वरींतां ॥ सर्वमंगलमांगल्येशिवेसर्वार्थसाधके ॥ शर
ण्येत्र्यंबकेगौरीनारायणिनमोस्तुते ॥ श्रीवर्चस्वमायुष्यमारोग्यमायुधात्पवमानंमहीयते ॥
धान्यंधनंपशुंबहुपुत्रलाभंशतसंवत्सरंदीर्घमायुः ॥ ॥ ॥ ॥
अथसरस्वतीसूक्तप्रारंभः ॥ ॐपावकानःसरस्वतीवाजेभिर्वाजिनीवती ॥ यज्ञंवष्टुधियावसुः ॥
चोदयित्रीसूनृतानांचेतंतीसुमतीनां ॥ यज्ञंदधेसरस्वती ॥ महोअर्णःसरस्वतीप्रचेतयतिकेतुना
धियोविश्वाविराजति ॥ यागुंगूर्यासिनीवालीयाराकायासरस्वती ॥ इंद्राणीमह्वऊतयेवरुणा
नींस्वस्तये ॥ १ ॥ अंबितमेनदीतमेदेवितमेसरस्वति ॥ अप्रशस्ताइवस्मासिप्रशस्तिमंबनस्कृ
धि ॥ त्वेविश्वासरस्वतिश्रितायूंषिदेव्यां ॥ शुनहोत्रेषुमत्स्वप्रजांदेविदिदिड्ढिनः ॥ इमाब्रह्मसर
स्वतिजुषस्ववाजिनीवति ॥ यातेमन्मगृत्समदाऋतावरिप्रियादेवेषुजुव्हति ॥ प्रेतांयज्ञस्यशंभु
वायुवामिदावृणीमहे ॥ अग्निंचहव्यवाहनं ॥ द्यावानःपृथिवीइमंसिध्रमद्यदिविस्पृशं ॥ यज्ञंदे

SGDF
Sri Gangeshwari Digital Foundation

आ० वेषुयच्छतां ॥ आवामुपस्थमद्रुहादेवाःसीदंतुयज्ञियाः ॥ इहाद्यसोमपीतये ॥ २ ॥ इयमददाद्र प०
१४ भसमृणच्युतंदिवोदासंवध्र्यश्वायदाशुषे ॥ याशश्वंतमाचखादावसंपणिंतातेदात्राणितविषास
रस्वति ॥ इयंशुष्मेभिर्बिसखाइवारुजत्सानुगिरीणांतविषेभिरूर्मिभिः ॥ पारावतघ्नीमवसेसुवृक्ति
भिःसरस्वतीमाविवासेमधीतिभिः ॥ सरस्वतिदेवनिदोनिबर्हयप्रजांविश्वस्यबृसयस्यमायिनः ।
उतक्षितिभ्योवनीरविंदोविषमेभ्योअश्रवोवाजिनीवति ॥ प्रणोदेवीसरस्वतीवाजेभिर्वाजिनीव
ती ॥ धीनामवित्र्यवतु ॥ यस्त्वादेविसरस्वत्युपब्रूतेधनेहिते ॥ इंद्रंनवृत्रतूर्ये ॥ ३ ॥ त्वंदेविसर
स्वत्यवावाजेषुवाजिनि ॥ रदापूषेवनःसनिं ॥ उतस्यानःसरस्वतीघोराहिरण्यवर्तनिः ॥ वृत्र
घ्नीवष्टिसुष्टुतिं ॥ यस्याअनंतोअह्रुतस्त्वेषश्चरिष्णुरर्णवः ॥ अमश्चरतिरोरुवत् ॥ सानोविश्वाअ
तिद्विषःस्वसॄरन्याऋतावरी ॥ अतन्नहेवसूर्यः ॥ उतनःप्रियाप्रियासुसप्तस्वसासुजुष्टा ॥ सरस्व
तीस्तोम्यांभूत् ॥ ४ ॥ आपप्रुषीपार्थिवान्युरुरजोअंतरिक्षं ॥ सरस्वतीनिदस्पातु ॥ त्रिषधस्था
सप्तधातुःपंचजातावर्धयंती ॥ वाजेवाजेहव्याभूत् ॥ प्रयामहिम्नामहिनासुचेकितेद्युम्नेभिर १४
न्याअपसामपस्तमा ॥ रथंइवबृहतीविभ्वनेकृतोपस्तुत्याचिकितुषासरस्वती ॥ सरस्वत्यभिनोने

SGDF
Sri Gargeshwari Digital Foundation

षिवस्योमापस्फरीःपयसामानआधक् ॥ जुषस्वनःसख्यावेश्याचमात्वत्क्षेत्राण्यरणानिगन्म ॥५॥
प्रक्षोदसाधायसासस्रएषासरस्वतीधरुणमायसीपूः ॥ प्रबाबधानारथ्येवयातिविश्वाअपोमहिना
सिंधुरन्याः ॥ एकाचेतत्सरस्वतीनदीनांशुचिर्यतीगिरिभ्यआसमुद्रात् ॥ रायश्चेतंतीभुवनस्य
भूरेर्घृतंपयोदुदुहेनाहुषाय ॥ सवावृधेनर्योयोषणासुवृषाशिशुर्वृषभोयज्ञियासु ॥ सवाजिनंमघव
द्भ्योदधातिविसातयेतन्वंमामृजीत ॥ उतस्यानःसरस्वतीजुषाणोपश्रवत्सुभगायज्ञेअस्मिन् ॥
मितज्ञुभिर्नमस्यैरियानारायायुजाचिदुत्तरासखिभ्यः ॥ इमाजुव्हानायुष्मदानमोभिःप्रतिस्तो
मंसरस्वतिजुषस्व ॥ तवशर्मन्प्रियतमेदधानाउपस्थेयामशरणंनवृक्षं ॥ अयमुतेसरस्वतिवसिष्ठो
द्वारावृतस्यसुभगेव्यावः ॥ वर्धशुभ्रेस्तुवतेरासिवजान्यूयंपातस्वस्तिभिःसदानः ॥ ६ ॥ बृहदुगा
यिषेवचोसुर्यानदीनां ॥ सरस्वतीमिन्महयासुवृक्तिभिस्तोमैर्वसिष्ठरोदसी ॥ उभेयत्तेमहिनाशु
भ्रेअंधसीअधिक्षियंतिपूरवः ॥ सानोबोध्यवित्रीमरुत्सखाचोदराधोमघोनां ॥ भद्रमिद्भद्राकृणव
त्सरस्वत्यकवारीचेततिवाजिनीवति ॥ गृणानाजमदग्निवत्स्तुवानाचवसिष्ठवत् ॥ जनीयंतोन्व
ग्रवःपुत्रीयंतःसुदानवः ॥ सरस्वंतंहवामहे ॥ येतेसरस्वऊर्मयोमधुमंतोघृतश्चुतः ॥ तेभिर्नोवि

SGDF
Sri Gangeshwari Digital Foundation

ताभव ॥ पीपिवांसंसरस्वतस्तनंयोविश्वदर्शतः ॥ भक्षीमहिप्रजामिषं ॥७॥ देवींवाचमजनयंतदे
वास्तांविश्वरूपाःपशवोवदंति ॥ सानोमंद्रेषमूर्जंदुहानाधेनुर्वागस्मानुपसुष्टुतैतु ॥ ॥ ॥
अथ देवाः ॥ ॐ नमोमहद्भ्योनमोअर्भकेभ्योनमोयुवभ्योनमआशिनेभ्यः ॥ यजामदेवान्य
दिशक्नवाममाज्यायसःशंसमावृक्षिदेवाः ॥ १ ॥ ममत्तुनःपरिज्मावसर्हाममत्तुवातोअपांवृष
ण्वान् ॥ शिशीतमिंद्रापर्वतायुवंनस्तन्नोविश्वेवरिवस्यंतुदेवाः ॥ २ ॥ कथातेअग्नेशुचयंतआ
योर्ददाशुर्वाजेभिराशुषाणाः ॥ उभेयत्तोकेतनयेदधानाऋतस्यसामन्रणयंतदेवाः ॥ ३ ॥ यज्ञे
नयज्ञमयजंतदेवास्तानिधर्माणिप्रथमान्यासन् ॥ तेहनाकंमहिमानःसचंतयत्रपूर्वेसाध्याःसंति
देवाः ॥ ४ ॥ परांशुभ्राअयासोयव्यासाधारण्येवमरुतोमिमिक्षुः ॥ नरोदसीअपनुदंतघोराजु
षंतवृधंसख्यायदेवाः ॥ ५ ॥ त्वेरायइंद्रतोशतमाःप्रणेतारःकस्यचिदृतायोः ॥ तेषुणोमरुतोमृळ
यंतुयेस्मापुरागातूयंतीवदेवाः ॥६॥ उभाशंसानर्यामामविष्टामुभेमामूतीअवसासचेतां ॥ भूरि
चिदर्यः सुदास्तरायेषामदंतइषयेमदेवाः ॥७॥ उतनईंमरुतोवृद्धसेनास्मद्रोदसीसमनसःसदंतु ॥
पृषदश्वासोवनयोनरथारिशादसोमित्रयुजोनदेवाः ॥ ८ ॥ तवस्यामपुरुवीरस्यशर्मन्नुरुशंस

स्यवरुणप्रणेतः ॥ यूयंनःपुत्राअदितेरदब्धाअभिक्षमध्वंयुज्यायदेवाः ॥ ९ ॥ दिवश्चिदातेरुचयं
तरोकाउषोविभातीरनुभासिपूर्वीः ॥ अपोयदग्नउशधग्वनेषुहोतुर्मंद्रस्यपनयंतदेवाः ॥ १० ॥
शंसामहामिंद्रंयस्मिन्विश्वाआकृष्टयःसोमपाःकाममव्यन् ॥ यंसुक्रतुंधिषणेविभ्वतष्टंघनंवृत्राणां
जनयंतदेवाः ॥ ११ ॥ त्रिरुत्तमादूणशारोचनानित्रयोराजंत्यसुरस्यवीराः ॥ ऋतावानइषिराद्
ळभासस्त्रिरादिवोविदथेसंतुदेवाः ॥ १२ ॥ नापांभूतनवोतीतृषामानिःशस्ताऋभवोयज्ञेअसि
न् ॥ समिंद्रेणमदथसंमरुद्भिसंराजभीरत्नधेयायदेवाः ॥ १३ ॥ अप्रतीतोजयतिसंधनानिप्रति
जन्यान्युतयासजन्या ॥ अवस्यवेयोवरिवःकृणोतिब्रह्मणेराजातममवंतिदेवाः ॥ १४ ॥ कोवस्त्रा
तावसवःकोवरूताद्यावाभूमीअदितेत्रासीथांनः ॥ सहीयसोवरुणमित्रमर्तात्कोवोध्वरेवरिवोधा
तिदेवाः ॥ १५ ॥ त्वमपोयदवेतुर्वशायारमयःसुदुघाःपारइंद्र ॥ उग्रमयातमवहोहकुत्संसंहय
द्वामुशनारंतदेवाः ॥१६॥मूर्धानंदिवोअरतिंपृथिव्यावैश्वानरमृतआजातमग्निं॥ कविंसम्राजमति
थिंजनानामासंनापात्रंजनयंतदेवाः॥ १७॥ नाभिं यज्ञानांसदनंरयीणांमहामाहावमभिसंनवंत॥
वैश्वानरंरथ्यमध्वराणांयज्ञस्यकेतुंजनयंतदेवाः॥ १८॥तेनोरायोद्युमतोवाजवतोदातारोभूतनृवतः

SGDF Sri Gurugeshwari Digital Foundation

पुरुक्षोः ॥ दशस्यंतोदिव्याःपार्थिवासोगोजाताअप्यामृळताचदेवाः॥१९॥ येकेचज्मामहिनोअ
हिमायादिवोजज्ञिरेअपांसधस्थे॥ तेअस्मभ्यमिषयेविश्वमायुःक्षपउस्त्रावरिवस्यंतुदेवाः ॥२०॥अ
स्मेरुद्रामेहनापर्वतासोवृत्रहत्येभरहूतौसजोषाः ॥ यःशंसतेस्तुवतेधायिपज्रइंद्रज्येष्ठाअस्मांअवंतुदे
वाः।२१।परिप्रधन्वेंद्रायसोमस्वादुर्मित्रायपूष्णेभगाय॥ इंद्रस्तेसोमसुतस्यपेयाःक्रत्वेदक्षायविश्वेच
देवाः॥२२॥ प्रयाजान्मेअनुयाजांश्चकेवलानूर्जस्वंतंहविषोदत्तभागं ॥ घृतंचापांपुरुषंचौषधीना
मग्नेश्चदीर्घमायुरस्तुदेवाः ॥२३॥ ऐभिर्देवृष्ण्यापौंस्यानियेभिरौक्षद्वृत्रहत्यायवज्री ॥ येकर्मणः
क्रियमाणस्यमन्हऋतेकर्ममुदजायंतदेवाः ॥ २४ ॥ अनृक्षराऋजवःसंतुपंथायेभिःसखायोयंति
नोवरेयं ॥ समर्यमासंभगोनोनिनीयात्संजास्पत्यंसुयममस्तुदेवाः ॥ २५ ॥ गृभ्णामितेसौभग
त्वायहस्तंमयापत्याजरदष्टिर्यथासः॥ भगोअर्यमासवितापुरंधिर्मह्यंत्वादुर्गार्हपत्यायदेवाः ॥२६॥
समस्मिन्जायमानआसतग्नाउतेमवर्धन्नद्य १ स्वगूर्ताः ॥ महेयत्वापूरुरवोरणायावर्धयंदस्युह
त्यायदेवाः ॥ २७ ॥ ब्रह्मचारीचरतिवेविषद्विषःसदेवानांभवत्येकमंगं ॥ तेनजायामन्वविंदद्बृ
हस्पतिःसोमेननीतांजुह्वं १ नदेवाः ॥ २८ ॥ सद्योजातोव्यमिमीतयज्ञमग्निर्देवानामभवत्पु

रोगाः ॥ अस्यहोतुःप्रदिश्यृतस्यवाचिस्वाहाकृतंहविरदंतुदेवाः ॥ २९ ॥ इदंतेपात्रंसनवित्तमिं
द्रपिबासोमंमेनाशतक्रतो॥ पूर्णआहावांमदिरस्यमध्वोयंविश्वइदाभिहर्यतिदेवाः॥ ३०॥गणनां०॥
जातवेद०॥ गौरीर्मिमायसलिलानितक्षत्येक पदीद्विपदीसाचतुष्पदी ॥ अष्टापदीनवपदीब
भूवुषीसहस्राक्षरापरमेव्योमन् ॥ सक्तुमिवतितउनापुनंतोयत्रधीरामनसावाचमक्रत ॥ अत्रास
खायःसख्यानिजानतेभद्रैषांलक्ष्मीर्निहिताधिवाचि ॥ प्रणोदे० ॥ यागुंगू० ॥ दुर्गेचिं० ॥
वषट्तेविष्णवासआकृणोमितन्मेजुषस्वशिपिविष्टहव्यं ॥ वर्धंतुत्वासुष्टुतयोगिरोमेयूयंपातस्व
स्तिभिःसदानः ॥ राजाधिरा० सदइति ॥ अयंमेहस्तोभगवानयंमेभगवत्तरः ॥ अयंमेविश्व
भेषजोऽयंशिवाभिमर्शनः ॥ अयंमाताअयंपिताअयंजीवातुरागमत् ॥ इदंतवप्रसर्पणंसुबंधवे
हिनिरिः ॥ त्वंविश्वादधिषेकेवलानियान्याविरियाचगुहावसूनि ॥ काममिन्मेमघवन्माविताारी
स्त्वमाज्ञातात्वमिंद्रासिदाता ॥ ब्रह्मणातेब्रह्मयुजायुनज्मिहरीसखायासधमादआशू ॥ स्थिरं
रथंसुखमिंद्राधितिष्ठन्प्रजानन्विद्वाँउपयाहिसोमं ॥ ॥

॥ अथ रात्रिसूक्तप्रारंभः ॥ ॥ रात्रीव्यख्यदायतीपुरुत्रादेव्य १ क्षभिः ॥ विश्वाअधिश्रियोधि

SGDF
Sri Gargeshwari Digital Foundation

 त ॥ ओर्वप्राअमर्त्यानिवतोदेव्यु १ द्वतः ॥ ज्योतिषाबाधतेतमः ॥ निरुस्वसारमस्कृतोषसंदे
व्यायती ॥ अपेदुहासतेतमः ॥ सानोअद्ययस्यावयंनितेयामंनविक्ष्महि ॥ वृक्षेनवसतिंवयः ॥
निग्रामासोअविक्षतनिपद्वंतोनिपक्षिणः ॥ निश्येनासश्चिदर्थिनः ॥ यावयावृक्यं १ वृकंयवय
स्तेनमूर्म्ये ॥ अथानःसुतराभव ॥ उपमापेपिशत्तमःकृष्णंव्यक्तमस्थित ॥ उषऋणेवयातय ॥
उपतेगाइवाकरंवृणीष्वदुहितर्दिवः ॥ रात्रिस्तोमंनजिग्युषे॥१॥आरात्रिपार्थिवंरजःपितरःप्रायुधा
माभिः ॥ दिवःसदांसिबृहतीवितिष्ठसआत्वेषंवर्ततेतमः ॥ येतेरात्रीनृचक्षसोयुक्तासोनवतिर्नव ॥
अशीतिःसंत्वष्टाउतोतेसप्तसप्तती ॥ रात्रींप्रपद्येजननींसर्वभूतनिवेशनीं ॥ भद्रांभगवतींकृष्णां
विश्वस्यजगतोदिशां ॥ संवेशनींसंयमनींग्रहनक्षत्रमालिनीं ॥ प्रपन्नोहंशिवांरात्रींभद्रेपारमशी
महिभद्रेपारमशीमह्योंनमः ॥ स्तोष्यामिप्रयतोदेवीं शरण्यांबव्हृचप्रियां ॥ सहस्रसंमितांदुर्गां
जातवेदसेसुनवामसोमं ॥ शांत्यर्थंतद्विजातीनामृषिभिःसोमपाश्रिताः ॥ ऋग्वेदेत्वंसमुत्पन्ना
मरातीयतोनिदहातिवेदः ॥ येत्वांदेविप्रपद्यंतिब्राह्मणाहव्यवाहनीं ॥ अविद्याबहुविद्यावासनः
पर्षदतिदुर्गाणिविश्वा ॥ येअग्निवर्णांशुभांसौम्यांकीर्तयिष्यंतियेद्विजाः ॥ तांतारयतिदुर्गाणि

नावेवसिंधुंदुरितात्यग्निः ॥ २ ॥ दुर्गेषुविषमेघोरेसंग्रामेरिपुसंकटे ॥ अग्निचोरनिपातेषुसर्वग्रहनि
वारिणिसर्वग्रहनिवारिण्योंनमः ॥ दुर्गेषुविषमेषुत्वंसंग्रामेषुवनेषुच ॥ मोहयित्वाप्रपद्यंतेतेषांमे
अभयंकुरुतेषांमेअभयंकुर्वोंनमः ॥ केशिनींसर्वभूतानांपंचमीतुचनामुच ॥ सामांसमांदिशादे
वीसर्वतःपरिरक्षतुसर्वतःपरिरक्षत्वोंनमः ॥ तामग्निवर्णांतपसाज्वलंतींवैरोचनींकर्मफलेषुजुष्टां ॥
दुर्गांदेवींशरणमहंप्रपद्ये सुतरसितरसेनमःसुतरसितरसेनमोनमः ॥ दुर्गादुर्गेषुस्थानेषुशन्नोदेवी
रभिष्टये ॥ यइमंदुर्गास्तवंपुण्यंरात्रौरात्रौसदापठेत् ॥ रात्रिःकुशिकःसौभरोरात्रिर्वाभारद्वाजीरा
त्रिस्तवेगायत्रं ॥ रात्रीसूक्तंजपेन्नित्यंतत्कालउपपद्यते ॥ ३ ॥ उलूकयातुंशुशुलूकयातुंजहिश्व
यातुमुतकोकयातुं ॥ सुपर्णयातुमुतगृध्रयातुंदृषदेवप्रमृणरक्षइंद्र ॥ पिशंगभृष्टिमंभृणंपिशाचिमिं
द्रसंमृण॥ सर्वंरक्षोनिर्बर्हय ॥ यतइंद्रभयामहेततोनोअभयंकृधि ॥ मघवंछग्धितवतन्नऊतिभिर्विद्वि
षोविमृधोजहि ॥ त्वंहिराधस्पतेराधसोमहःक्षयस्यासिविधतः॥ तंत्वावयंमघवन्निंद्रगिर्वणःसुताव
तोहवामहे॥ इंद्रस्पळुतवृत्रहापरस्पानोवरेण्यः॥सनोरक्षिषच्चरमंसमध्यमंसपश्चात्पातुनःपुरः॥त्वंनः
पश्चादधरादुत्तरात्पुरइंद्रनिपाहिविश्वतः॥आरेअस्मत्कृणुहिदैव्यंभयमारेहेतीरदेवीः॥ अद्याद्याश्वश्व

SGDF Sri Gurgaonkar Digital Foundation

इंद्रत्रास्वपरेचनः॥ विश्वाचनोजरित्रृन्त्सत्पतेअह्नादिवानक्तंचरक्षिषः॥प्रभंगीशूरोमघवातुवीमघः
संमिश्लोवीर्यायकं॥उभातेबाहूवृषणाशतक्रतोनियावज्रंमिमिक्षतुः॥ स्वस्तिदाविशस्पतिर्वृत्रहाविं
मृधोवशी॥वृषेंद्रःपुरएतुनःसोमपाअभयंकरः॥४॥हिमस्यत्वाजरायुणाशालेपरिव्ययामसि॥उतद्ह
दोहिनोभुवोग्निर्ददातुभेषजं ॥ शिशीतद्हदोहिनोभुवोग्निर्ददातुभेषजं॥अंतिकामग्निर्मजनयदूर्वा
दःशिशुलागमत् ॥अजातपुत्रपक्षायाहृदयंममदूयते॥विपुलंवनंबव्हाकाशंचरजातवेदःकामाय॥
मांचरक्षपुत्रांश्चशरणमभूतव॥ पिंगाक्षलोहितग्रीवकृष्णवर्णनमोस्तुते॥अस्मांद्विबर्हणस्योनांसाग
रस्योमयोयथा ॥ इंद्रःक्षत्रंददातुवरुणमभिषिंचतु ॥ शत्रवोनिधनंयांतुजयत्वंब्रह्मतेजसा ॥ कपि
लजटींसर्वंभक्षंचाग्निःप्रत्यक्षदैवतं ॥ वरुणंचवशाम्यग्रेममपुत्रांश्चरक्षतुममपुत्रांश्चरक्षत्योनमः ॥ सा
ग्रंवर्षशतंजीवपिबखादचमोदंच ॥ दुःखितांश्चद्विजांश्चैवप्रजांचपशुपालय ॥ यावदादित्यस्तप
तियावद्भ्राजतिचंद्रमाः॥ यावद्वायुःप्लवांजतितावज्जीवजयाजय॥येनकेनप्रकारेणकोविनामनुजी ९८
वति॥ परेषामुपकारार्थंयज्जीवातिसजीवाति॥एतांवैश्वानरंसर्वदेवनमोस्तुते॥ नचचोरभयंनचसर्प
भयंनचव्याघ्रभयंनचमृत्युभयं ॥ यस्यापमृत्युर्नचमृत्युःसर्वंलभतेसर्वंजयते ॥ रक्षाणोअग्नेतवरक्ष

SGDF
Sri Gargeshwari Digital Foundation

णेभीरारक्षाणःसुमखप्रीणानः ॥ प्रतिष्फुरविरुजवीड्वंहोजहिरक्षोमहिंचिद्वावृधानं ॥ अद्याद्या० ॥
प्रभंगी० ॥ स्वप्नःस्वप्नाधिकरणेसर्वंनिष्वापयाजरं ॥ आसूर्यमन्यांस्वापयव्युष्टहंजाग्रयाव
हं ॥ अजगरोनामसर्पःसर्पिर्विषोमहान् ॥ तस्मिन्नुसर्पःसुधितस्तेनत्वास्वापयामासि ॥ सर्पःस
र्पोअजगरःसर्पिर्विषोमहान् ॥ तस्यशुष्कात्सिंधवस्तस्यंगाधमंशीमहि ॥ कालिकोनामसर्पोन
वनागसहस्रफणः ॥ यमुनन्हदेसोजातो योनारायणवाहनः ॥ यदिकालिकदूतस्ययदिकाः
कालिकाद्भयं ॥ जन्मभूमिपरिक्रांतोनिर्विषोयातिकालिकः ॥ आयाहींद्रपथिभिरीळितेभिर्यज्ञ
मिमंनोभागधेयंजुषस्व ॥ तृप्तांजहुर्मातुळस्येवयोषाभागस्तेपैतृष्वसेयीवपामिव ॥ यशस्क
रंबलवंतंप्रभुत्वंतमेवराजाधिपतिर्बभूव ॥ संकीर्णनागाश्वपतिर्नराणांसुमंगल्यंसततंदीर्घमायुः ॥
कर्कोटकोनामसर्पोयोदृष्टिविषउच्यते ॥ तस्यसर्पस्यसर्पत्वंतस्मैसर्पनमोस्तुते ॥ ५ ॥ माबिभे
र्नमरिष्यासिपरित्वापामिसर्वतः ॥ घनेनहन्मिवृश्चिकमहंदंडेनागतं ॥ आदित्यरथवेगेनविष्णो
र्बाहुबलेनच ॥ गरुडपक्षनिपातेनभूमिंगच्छमहायशाः ॥ गरुडस्यजातमात्रेणत्रयोलोकाः प्रकं
पिताः ॥ प्रकंपितामहीसर्वासशैलवनकानना ॥ गगनंनष्टचंद्रार्कंज्योतिषंनप्रकाशते ॥ देवताभ

SGDF
Sri Gangadharan Digital Foundation

 यंभी ताश्वमारुतौनप्लवायतिमारुतौनप्लवायत्योंनमः ॥ भोसर्पभद्रभद्रंतेदूरंगंछमहायशाः ॥
जन्मेजयस्ययज्ञांतेआस्तीकवचनंस्मर ॥ अस्तीकवचनंश्रुत्वायःसर्पोननिवर्तते ॥ शतंधाभिद्य
तेमूर्ध्निशिंशुवृक्षफलंयथा ॥ योजरत्कारुणाजातोजरत्कन्यांमहायशाः ॥ असीतिंचार्थसिद्धिंच
सुनीतिंचापियःस्मरेत् ॥ दिवावायदिवारात्रौनास्तिसर्पभयंहरेत् ॥ अगस्तिर्माधवश्चैवमुचकुं
दोमहामुनिः ॥ कपिलोमुनिरास्तीकःपंचैतेसुखशायिनः ॥ नर्मदायैनमःप्रातर्नर्मदायैनमोनिशि
॥ नमोस्तुनर्मदेतुभ्यंत्राहिमांविषसर्पतः ॥ कषुंभुकस्तदब्रवीद्गिरेःप्रवर्तमानकः ॥ वृश्चिकस्यारसं
विषमरसंवृश्चिकतेविषं ॥ योभैराजन्युज्यौवासखावास्वप्नेभयंभीरवे मह्यमाह ॥ स्तेनोवायोदि
प्संतिनोवृकोवात्वंतस्माद्वरुणपाह्यस्मान् ॥ अधस्वप्नस्यनिर्विदेभुंजतश्चरेवतः ॥ उभाताब
लिनश्यतः ॥ गणानांत्वागणपतिंहवामहेकविंकवीनामुपमश्रवस्तमम् ॥ ज्येष्ठराजंब्रह्मणांब्रह्मण
स्पतआनःशृण्वन्नूतिभिःसीदसादनं ॥ दुर्गेचिंनःसुगंकृधिगृणानइंद्रगिर्वणः ॥ त्वंचमघवन्वशः ॥ ९९
सरस्वत्यभिनोनेषिवस्योमापःस्फरीःपयसामानआधक् ॥जुषस्वनःसख्यावेश्याचमात्वत्क्षेत्राण्यर
णानिगन्म॥ अथ नवग्रहमंत्राः ॥ आकृष्णेनहिरण्यस्तूपःसवितात्रिष्टुप्॥सूर्यप्रीत्यर्थेजपेविनियो

गः ॥ ॐ आकृष्णेनरजसावर्तमानोनिवेशयन्नमृतंमर्त्यंच ॥ हिरण्ययेनसवितारथेनादेवोयाति
भुवनानिपश्यन् ॥ १ ॥ आप्यायस्वगौतमःसोमोगायत्री ॥ चंद्रप्रीत्यर्थेजपेविनियोगः ॥ ॐ
आप्यायस्वसमेतुतेविश्वतःसोमवृष्ण्यं ॥ भवावाजस्यसंगथे ॥ २ ॥ अग्निर्मूर्धाविरूपोंगारकोगाय
त्री ॥ भौमप्रीत्यर्थेजपेविनियोगः ॥ ॐ अग्निर्मूर्धादिवःककुत्पतिःपृथिव्याअयं॥ अपांरेतांसिजि
न्वति ॥ ३ ॥ उद्बुध्यध्वंबुधःसौम्योबुधस्त्रिष्टुप् ॥ बुधप्रीत्यर्थेजपेविनियोगः ॥ ॐ उद्बुध्यध्वं
समनसःसखायःसमग्निमिंध्वंबहवःसनीळाः ॥ दधिक्रामग्निमुषसंच देवीमिंद्रावतोवसेनिव्हयेवः॥
॥ ४ ॥ बृहस्पतेशौनकोग्र्त्समदोबृहस्पतिस्त्रिष्टुप् ॥ गुरुप्रीत्यर्थेजपेविनियोगः ॥ ॐ बृहस्प
तेअतियदर्योअर्हाद्युमाद्विभातिक्रतुमज्जनेषु ॥ यद्दीदयच्छवसऋतप्रजाततदस्मासुद्रविणंधेहिचि
त्रं ॥ ५ ॥ शुक्रःपाराशरःशुक्रोद्विपदाविराट् ॥ भृगुप्रीत्यर्थेजपेविनियोगः ॥ ॐ शुक्रःशुशुक्वां
उषोनजारःपप्रासमीचीदिवोनज्योतिः ॥ ६ ॥ शमग्निरिरिंबिठिःशनिरुष्णिक् ॥ शनिप्रीत्यर्थेज
पेविनियोगः ॥ ॐ शमग्निरग्निभिःकरच्छंनस्तपतुसूर्यः ॥ शंवातोवात्वरपाअपस्त्रिधः ॥ ७ ॥
कयानोवामदेवोराहुर्गायत्री ॥ राहुप्रीत्यर्थेजपेविनियोगः ॥ ॐ कयानश्चित्रआभुवदूतीसदा

SGDF
Foundation

वृधःसखा ॥ कयाशुचिष्ठयावृता ॥ ८ ॥ केतुर्मधुछंदाःकेतुर्गायत्री ॥ केतुप्रीत्यर्थेजपेविनियोगः॥
ॐ केतुंकृण्वन्नकेतवेपेशोमर्याअपेशसे ॥ समुषद्भिरजायथाः ॥ ९ ॥ ॐ क्षेत्रस्यपतिनावयंहि
तेनेवजयामासि ॥ गामश्वंपोषयित्न्वासनोमृळातीदृशे ॥ वास्तोष्पतेप्रतिजानीह्यस्मांत्स्वावे
शोअनमीवोभवानः ॥ यत्वेमहेप्रतितन्नोजुषस्वशन्नोभवद्विपदेशंचतुष्पदे ॥ वास्तोष्पतेप्रतर
णोनएधिगयस्फानोगोभिरश्वेभिरिंदो ॥ अजरासस्तेसख्येस्यामपितेवपुत्रान्प्रतिनोजुषस्व ॥ वा
स्तोष्पतेशग्मयासंसदातेसक्षीमहिरण्वयागातुमत्या ॥ पाहिक्षेमउतयोगेवरंनोयूयंपातस्वस्तिभिः
सदानः ॥ अमीवहावास्तोष्पतेविश्वारूपाण्याविशन् ॥ सखासुशेवएधिनः ॥ त्र्यंबकंयजाम
हेसुगंधिंपुष्टिवर्धनं ॥ उर्वारुकमिवबंधनान्मृत्योर्मुक्षीयमामृतात् ॥ तच्छंयोरा० ॥ शंचतुष्पदे ॥
ॐ नमोब्रह्म० नमोवाचे० महतेकरोमि ॥ शांतापृथिवीशिवमंतरिक्षंद्यौर्नो देव्यभयंनोअस्तु ॥
शिवादिशःप्रदिशउद्दिशोन आपोविद्युतःपरिपांतुसर्वतः शांतिःशांतिःशांतिः ॥ ॥
॥ अथ रात्रौभोजनविधिः ॥ ॥ सायंप्रातर्द्विजातीनामशनंश्रुतिचोदितमितिवचनात् रवि
विवारपर्वसंक्रांतिवैधृतिव्यतीपातमातापितृश्राद्धादिदिनानित्यक्त्वामाध्यान्हभोजनोक्तप्रकारे-

201

ण अनिषिद्धपात्रेपरिवेषणानंतरंऋतंत्वासत्येनपरिषिंचामीतिपरिषिच्य चित्रबलिवर्जंभोजनंकु
र्यात् ॥ ॥ अथ तांबूलचर्वणविधिः ॥ ॥ अह्नःसायंवाभोजनानंतरंघटिकामति
क्रम्यतांबूलचर्वणंकार्यं ॥ संशोधितंचूर्णंप्रक्षालितानिनागवल्लीदलानिखंडितंपूगीफलंचगृहीत्वा
पर्णाग्रंपर्णमूलंपर्णशिरांचवर्जयित्वातांबूलंभक्षयेत् ॥ मुखेपर्णमनिधायपूगीफलंनभक्षयेत् ॥ पां
डुत्वंदंतदौर्बल्यंअक्षिरोगंबलक्षयं ॥ करोतिमुखरोगांश्चतांबूलमतिसेवनात् ॥ विद्याकामोन्हिरा
त्रौत्रातांबूलंतुनभक्षयेत् ॥ यतिश्चब्रह्मचारीचविधवाचरजस्वला ॥ प्रत्येकंमांसतस्तुल्यंमेलनेसुर
यासमं ॥ मातापित्रोःक्षयेश्राद्धेतथैवमृतसूतके॥ तांबूलंचर्वयेद्यस्तुपितृहासानिगद्यतइतिवसिष्ठः ॥
॥ अथ स्त्रीसंगविधिः ॥ ॥ मनुः ॥ ऋतुःस्वाभाविकःस्त्रीणांरात्रयः षोडशस्मृताः ॥ तासामा
द्यास्त्रयोवर्ज्यावर्ज्याएकादशीचया ॥ त्रयोदशीचशेषास्युःप्रशस्तादशरात्रयः ॥ स्नातांचतुर्थे
दिवसेरात्रौगछेद्विचक्षणइति ॥ युग्मासुपुत्राजायंतेकन्यास्त्वविषमासुचेतिभारते ॥ भर्तृपादौन
मस्कृत्यपश्चाच्छय्यांसमाविशेत् ॥ तत्रायंप्रकारः ॥ दशम्यादिपुण्यकालवर्जितसमादिवसेस्त्रीसं
गंकुर्वन्पुरुषःअर्धरात्रंअपररात्रंदिवासंध्याकालंचत्यत्क्वारात्रिप्रथमयामानंतरंपादौप्रक्षाल्य आ

SGDF
Sri Gangeshwari Digital Foundation

 चमनं कृत्वावामदेवयज्ञंकरिष्यइतिसंकल्प्यआत्मपत्न्यांभारत्यंतर्गतलक्ष्मीमनुसंधाय स्वस्मिन्
मुख्यप्राणांतर्गतं विष्णुंस्मृत्वातयोःस्वपत्नीरमणकर्तृत्वंच ध्यात्वा विष्णुर्योनिंकल्पयतुत्वष्टारू
पाणिपिंशतु ॥ आसिंचतुप्रजापतिर्धातागर्भंदधातुते ॥ प्रजापतेनत्वदेतान्यन्योविश्वाजातानि
परिताबभूव ॥ यत्कामास्तेजुहुमस्तन्नोअस्तुवयंस्यामपतयोरयीणां ॥ असुनीतेपुनरस्मासुचक्षु
पुनःप्राणमिहनोधेहिभोगं ॥ ज्योक्पश्येमसूर्यमुच्चरंतमनुमतेमृळयानस्वस्ति ॥ मादृशस्तुभवे
त्पुत्रइतिजप्त्वाहरिंस्मरेत् ॥ बलंधेहितनूषुनोबलमिंद्रानळुत्सुनः ॥ बलंतोकायतनयायजीवसेत्वं
हिबलदाअसि ॥ इतिमंत्रेणयोन्यांशिश्नंप्रवेशयेत् ॥ स्कंधौवापिकटिंधृत्वायथेष्टंमैथुनंचरेत् ॥
दीपेनष्टेतुयःसंगंकरोतिमनुजोयदि ॥ यावज्जन्मदारिद्र्यत्वंभवत्येवनसंशयः ॥ याकंचुकावृतानारी
भर्तारमनुगच्छति ॥ पंचभिःसप्तभिर्मासैःभर्तुरायुःक्षयंकरी ॥ इत्यनुसंधानंस्त्रीसंगकालेकृतंचे
त्वाजपेयफलंभवति ॥ पश्चान्मूत्रपुरीषवत्मृत्तिकाशौचादिकंकृत्वा पादप्रक्षालनानंतरंषोडश
गंडूषान्कृत्वा त्रिराचम्ययस्यस्मृत्येत्यनेनवामदेवयज्ञेनआत्मांतर्यामिमुख्यप्राणांतर्गतश्रीविष्णुः
प्रीयतामितिसमर्पयेत् ॥ ऋतुकालेस्त्रीसंगानंतरंऋतौतुगर्भशंकित्वात्स्नानंमैथुनिनःस्मृतमित्यु

SGDF
Sri Gurgeshwari Digital Foundation

२०३

त्स्नानस्यरात्रावसंभवात्पूर्वोक्तमंत्रस्नानंवाकार्यं ॥ ॥ अथ शयनविधिः ॥
यामात्परतएवाथस्वपेत्ध्यायन्जनार्दनं ॥ अंतरालेततोबुध्वास्मरेतबहुशोहरिं ॥ द्विजःशयीत
रात्रौहिदक्षिणप्राक्शिरास्तथा॥प्रत्यक्शिराःप्रवासेतुस्वगृहेप्राक्शिरास्तथा ॥ श्वशुरगृहेदक्षिणतः
नकदाचिदुदक्शिराइति ॥ अत्रविशेषः ॥ महादेवगृहेमार्गेभूतवेश्मनिनस्वपेत् ॥ मान्यगो
विप्रदेवानांगुरूणांचतथागृहे ॥ नचापिभग्नशयनेनाशुचौनाशुचिस्तथा ॥ नचदेवसमीपेतुनसं
ध्यायांदिवाद्विजइति ॥ निद्रासमयमासाद्यतांबूलंवदनात्त्यजेत् ॥ पुष्पाणिमस्तकाच्चैवह्यन्यथा
दोषवान्भवेत् ॥ अगस्त्यंमाधवंचैवमुचकुंदंमहामुनिं ॥ श्वफल्कमास्तिकंचैवपंचैतानिस्मरेन्नि
शि ॥ नर्मदायैनमःप्रातर्नर्मदायैनमोनिशि ॥ नमोस्तुनर्मदेतुभ्यंत्राहिमांविषसर्पतः ॥ ॥
अथ कृतस्यकर्मणःभगवतिसमर्पणं ॥ ॥ अक्षयंकर्मयस्मिन्परेस्वर्पितंप्रक्षयंयांतिदुःखानिय
न्नामतः ॥ अक्षरोयोजरःसर्वदैवामृतःकुक्षिगंयस्यविश्वंसदाजादिकं ॥ प्रीणयामोवासुदेवंदेवता
मंडलाखंडमंडनं ॥ तपस्विनोदानपरायशस्विनोमनस्विनोमंत्रविदःसुमंगलाः ॥ क्षेमंनविंदंति
विनायदर्पणंतस्मैसुभद्रश्रवसेनमोनमः ॥ कायेनवाचामनसेंद्रियैर्वाबुध्यात्मनावानुसृतःस्वभा

SGDF
Sri Gurgeshwari Digital Foundation

वं ॥ करोमियद्यत्सततंपरस्मैनारायणायेतिसमर्पयेतत् ॥ इष्टंदत्तंहुतंजप्तंपूर्तंयच्चात्मनःप्रियं ॥
दारान्सुतान्प्रियान्प्राणान्परस्मैसंनिवेदयेत् ॥ मंत्रतस्तंत्रतश्छिद्रंदेशकालार्हवस्तुतः ॥ सर्वंक
रोतिनिश्छिद्रमनुसंकीर्तनंतव ॥ स्मर्तव्यःसततंविष्णुर्विस्मर्तव्योनजातुचित् ॥ सर्वेविधिनिषे
धास्युरेतयोरेवकिंकराः ॥ इत्यादिप्रमाणार्थमनस्यनुसंधायहरिस्मरणपूर्वकंहर्यर्पितान्येवकर्माणि
सफलानिभवंतीत्यशेषमतिमंगलं ॥ इति ऋग्यजुर्वेदिवैष्णवानामान्हिकपध्धतिःसमाप्ता ॥

इदं पुस्तकं सामंतोपान्ह भिकाजीसूनु हरिणा स्वकीय (बेळगांवसमाचाराभिध)
मुद्रालये अंकयित्वा प्रकटनमकारि—शकाब्दाः १८१४.

SGDF
Sri Gangeshwari Digital Foundation